इति

तृतीय स्कंधः

Shrimad Bhagavatham
Tritiya Skandha. III

3

अथ

तृतीय स्कंधः

भा॰ तृ॰ १

श्रीकृष्णाय नमः ॥ तृतीये तु त्रयस्त्रिंशदध्यायैः सर्गवर्णनं ॥ ईशेच्छया गुणक्षोभात्सर्गो ब्रह्मांडसंभवः ॥ तत्र तु प्र
थमेध्याये बंधून्हित्वा स्वधामतां युयुत्सोः ॥ निर्गतस्योद्धवेनादौ संवादोनुरुच्यते ॥ अथ तृतीयस्कन्धव्याख्या ॥ भगवद्धर्म
संप्रोक्तं संक्षिप्तं प्रवर्णितं मया ॥ प्राह भागवतं शेषप्रोक्तं विस्तरतः पुनः ॥ द्वेधा हि श्रीभागवतसंप्रदायप्रवृत्तिः ॥ एकतः
संक्षेपतः ॥ श्रीनारायणब्रह्मनारदादिद्वारेण ॥ अन्यतस्तु विस्तरतः शेषसनत्कुमारसांख्यायनादिद्वारेण ॥ तत्र द्विती
ये श्रीनारायणब्रह्मसंवादेन संक्षेपतः चतुःश्लोक्या श्रीभागवतं निरूपितं ॥ तदेव ब्रह्मनारदसंवादेन दशलक्षणेन

श्रीकृष्णाय नमः ॥ श्रीशुक उवाच ॥ एवमेतत्पुरा पृष्टो मैत्रेयो भगवान्किल ॥ क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा
स्वगृहमृद्धिमत् ॥ १ ॥

यत्किंचिद्विस्तरेणोक्तं ॥ तदेव शेषोक्तमतिविस्तरतो वक्तुं तृतीयाद्यारंभः ॥ तत्र तृतीये प्रथमं तावन्मैत्रेयसंगमस्त्वष्ट
भिरध्यायैः ततो दशभिः सविसर्गः सर्गप्रपंचः ॥ ततो विसर्गप्रस्तावेन सप्तभिर्वाराहावतारः ॥ तत एकेन विसर्गसमा
हारः ॥ तत्प्रसंगेन चतुर्भिः कपिलावतारः ॥ ततो नवभिः कपिलाख्यानमिति त्रयस्त्रिंशताध्यायैस्तृतीयस्कंधप्रवृ
त्तिः ॥ तत्र द्वितीयांते परिमाणं च कालस्य कल्पलक्षणविग्रहं ॥ यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु ॥ इति
प्रतिज्ञातमर्थं विस्तरेण निरूपयितुमितिहासं प्रस्तौति भगवान् शुकः ॥ एवमिति द्वाभ्यां ॥ ऋद्धिमत्सर्वसंपद्भिः समृ
द्धं १

१

भा० तृ०
२

कुरुदेवस्य युधिष्ठिरस्य देव्याः द्रौपद्याश्चात्मनः स्नुषायाः स्वीयैरस्रैरस्रुभिः सकुचकुंकुमानि रिपुस्त्रीणां
वातहृद्दर्लवधेन हरंत्या ७ सत्यावलंबस्य सत्याश्रयस्य वनात्प्रत्यागतस्य समयेन एवं कृतेन दायं भागं या
चमानस्य यतः यदा न प्रदात् न ददौ तमोमोहं जुषमाणः ८ यानि स्वजनानि पुंसां भीष्मादीनां अमृतायनानि

यदा सभायां कुरुदेव देव्याः केशाभिमर्शं सुतकर्म गर्ह्यं नवारयामास नृपः स्नुषायाः स्वास्रै
र्हरंत्याः कुचकुंकुमानि ७ द्यूते त्वधर्मेण जितस्य साधोः सत्यावलंबस्य वनागतस्य न याचतोऽदा
त्समयेन दायं तमोजुषाणो यदजातशत्रोः ८ यदा च पार्थप्रहितः सभायां जगद्गुरुर्यानि जगाद कृ
ष्णः न तानि पुंसाममृतायनानि राजोरु मेने क्षतपुण्यलेशः ९ यदोपहूतो भवनं प्रविष्टो मंत्राय पृष्टः कि
ल पूर्वजेन अथाह तन्मंत्रदृशां वरीयान् यन्मंत्रिणो वैदुरिकं वदंति १०

अमृतस्याश्रयाणि राजा धृतराष्ट्रः दुर्योधनो वा उरु बहु न मेने यतो नष्टः पुण्यलेशो यस्यासः न सुखं कीर्तिर्धर्मा
दिहेतुः किंतु राज्यप्राप्तिमात्रहेतुः पुण्यलेश एवास्यापि नष्टत्वात् इत्यर्थः ९ इदानीं विदुरस्यैव
कृतं पराभवं दर्शयति षड्भिः यदा पूर्वजेन धृतराष्ट्रेण मंत्राय उपहूतः अन्तर्गृहं प्रविष्टो मंत्रं पृष्टः सन् अथ अनंत
रं तदाह किं मंत्रिणो यापि यद्वैदुरिकं विदुरवाक्यमिति प्रसिद्धं वदंति १० २

किंच ॥ श्रुति श्लाघ्यं त्यागानर्हमित्याह ॥ यद्वा प्रसिद्धं गृहं ॥ वः पांडवानां मंत्रकृत् दौत्यकर्त्ता सन् ॥ अयं श्रीकृष्णः स्वबुद्धिसन्निधानादयमिति निर्द्देशः ॥ पौरवेंद्रो दुर्योधनः तस्य गृहं हित्वा अनाहूत एव प्रविवेश ॥ तत्र हेतुः ॥ आत्मसात्कृतं आत्मीयत्वेन गृहीतं ॥ २ ॥ कुत्र संगमः आसत्संभवे ॥ ३ ॥ वरीयसि श्रेष्ठे ॥ अल्पस्यार्थस्योदयो यस्मात्तथाभूतो न भवति ॥ साधु

यद्वा अयं मंत्रकृद्वो भगवानखिलेश्वरः ॥ पौरवेंद्रगृहं हित्वा प्रविवेशात्मसात्कृतं ॥ २ ॥ राजोवाच ॥ कुत्र क्षत्तुर्भगवता मैत्रेयेणास संगमः ॥ कदा वा सह संवाद एतद्वर्णय नः प्रभो ॥ ३ ॥ न ह्यल्पार्थोदयस्तस्य विदुरस्यामलात्मनः ॥ तस्मिन्वरीयसि प्रश्नः साधुवादोपबृंहितः ॥ ४ ॥ सूत उवाच ॥ स एवमृषिवर्योऽयं पृष्टो राज्ञा परीक्षिता ॥ प्रत्याह तं सुबहुवित्प्रीतात्मा श्रूयतामिति ॥ ५ ॥ श्रीशुक उवाच ॥ यदा तु राजा स्वसुतानसाधून्पुष्णन्नधर्मेण विनष्टदृष्टिः ॥ भ्रातुर्यविष्ठस्य सुतान्विवंधून्प्रवेश्य लाक्षाभवने ददाह ॥ ६ ॥

२ ॥

वादेन ॥ सन्मानने मोदनेन उपबृंहितः संवर्द्धितः ॥ यद्वा ॥ साधोर्मैत्रेयस्य वादनोत्तरे एव श्लाघित इत्यर्थः ॥ ४ ॥ ५ ॥ त्यागानर्हस्यापि गृहस्य त्यागे हेतुत्वेन कौरवापराधानाह ॥ यदेत्यादि दशभिः ॥ एतेषां च तदा सद्वृत्तात्र्यादित्येकादशश्लोक्या संबंधः ॥ यविष्ठस्य कनिष्ठस्य पांडोः ॥ विबंधून् पितृहीनान् ॥ ६ ॥

ती

भा० टी० इत्यूचिवानित्युक्तवान् असौ क्षत्ता विदुरः सतां स्पृहणीयं शीलं यस्य सः कर्णदुःशासनशकुनिसहि
३ तेन दुर्योधनेन असत्कृतः तिरस्कृतः १४ तिरस्कारमाह क इति दासीसुतो यत्राकोनानेहैः जिह्मश्च
कुटिलः जिह्मतामाह यस्य बलिनः अन्नेन पुष्टः तस्मिन्नेव प्रतीपः प्रतिकूलः परेषां कार्ये वर्तते अतः पुरा
न्निर्वास्यतां श्वसानः श्वसन् जीवनमात्रशेष इत्यर्थः पाठांतरे श्मशानवदमंगलः १५ अथ मूलं श्लोः करी
इत्यूचिवांस्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण असत्कृतः सत्स्पृहणीयशीलः क्षत्ता सकर्णा
नुजसौबलेन १४ क एनमत्रोपजुहाव जिह्मं दास्याः सुतं यद्बलिनैव पुष्टः तस्मिन्प्रतीपः परकृत्य आस्ते
निर्वास्यतामाशु पुरात्श्वसानः १५ स इत्थमत्युल्बणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितोपि स्वयं धनुर्द्वा
रि निधाय मायां गतव्यथो यादुरु मानयानः १६ योर्वीर्यावत्रशिशाड्गिः परुषवाक्यैर्मर्मसु ताडितोपि गत
व्यथः तत्र हेतुः मायां उरु बहु मानयन् अहो मायाया माहात्म्यमिति तामेव तत्र हेतुं मन्यमानः तन्निःसा
रणात्पूर्वं स्वयमेव अयात् निर्जगाम किं कृत्वा एते नूनं मरिष्यंति किं धनुषेति तस्य द्वारि धनुर्निधाय य
यद्वा भीमादिभिः संगत्य अस्माभिर्योत्स्यतीति मा शंकीरिति धनुर्निधानं १६ ॥ ऽऽ ॥ ऽऽ ॥ २

त्तदेवाह अजातशत्रोरितित्रिभिः तव आग अपराधं सहमानस्य दायं प्रतियच्छ देहि यत्रापराधे अनुजः सहद
त्तैमानावृकोदररूपोग्निः क्रोधेन अप्रसन्नवर्त्तते यतयस्मात्त्वमलमत्यर्थं विभेषि ११ ममतादृशाः पुत्रावेदह
वः संतीतिगर्वं माकृथाइत्याह पार्थास्तुमुकुंदः आत्मीयत्वेनगृहीतवान् सचदेवः त्वयापिभगवाननतुप्राकृतः
किंच सहत्तितिदेवविर्पिप्रदेवैः अंद्राग्निदिभिर्वन्नैमानैः यतोसौतत्रैवविप्रादेवा अत्यर्थः स्वपुर्यामिवसुखमास्ते
नतत्पत्रगतः किंच यदुदेवानांदेवः पूज्यः यतोसौतत्रैवयदुप्रवीराइत्यर्थः किंच न्देवेषुमंडलेश्वरेषुदीव्यंति

अजातशत्रोः प्रतियच्छदायंतितिक्षतोदुर्विषहंतवागः महानुजोयत्रवृकोदराग्निःश्वसन्नरुषायत्र
मलं बिभेषि ११ पार्थास्तुदेवोभगवान्मुकुंदोगृहीतवान्सोदितिदेवदेवः १२ सएषदोषः पुरुषद्वि
डास्तेगृहान्प्रविष्टोयममपत्यमत्या पुष्णासिकुरुस्मादिमुखोगतश्रीस्त्यजाश्वशैवंकुलकौशला
य १३

प्रकाशंतइतिन्देवदेवाराजानः विनिर्जिताअशेषान्देवदेवायेन यतोसौतत्रैवसर्वेराजानः अतः पार्थानांदायं
देहीति १२ दुर्योधनस्तन्तमन्यतइतिचेत् अतआ सएषमूर्त्तोदोषएवगृहान्प्रविष्टआस्ते दोषत्वेहेतुः पुरुषद्वि
ट् श्रीकृष्णद्वेष्टा कोसौ यंत्वमपत्यमत्यापुष्णासि नत्वपत्यमसौ नपैत्यस्मादितिह्यपत्यंप्रादुः गताश्रीर्यस्मात्सत
मित्याक्रोशति अतएवअसौवममंगलंआशुत्यज कथंपुनस्त्यागस्तत्राह कुलस्यकौशलाय त्यजेदेकंकुलस्या

र्थेस्त्वपुर्व्यांयदुदेवदेवोविनिर्जिताशेषनृदेवदेवः १२

किटीटिताः ४

भा० त्र० एकस्यैव चक्रं सैन्यं यस्यां एकमेव राजचिह्नं श्वेतातपत्रं यस्यां तां अजितेन श्रीकृष्णेन सहायेन २० त
४ त्र प्रभासे परस्परं स्पर्द्धया निमित्तभूतया सुहृदां कौरवाणां विनष्टिं विनाशं मत्प्रणतः परस्परनाशं दृष्टवान् तः वे
णुजं वह्निं संश्रयते यद्वनं तद्वच्च यथा दग्धं भवति तथेति प्रत्यक् उदङ्मा अभिमुख २१ त्रितादीनामेकादृश
व१ इत्थं व्रजन् भारतमेव वर्षं कालेन यावान् गतवान् प्रभासं तावच्छुश्राव सदिति मेके चक्रामेकातपत्रा
मजितेन पार्थः २० तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निसंश्रयं संस्पर्द्धया दग्ध
मथानुशोचन् सरस्वतीं प्रत्यगियाय तूष्णीं २१ तस्यां त्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वा
योः तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिसेवे २२ अन्यानि चेह द्विजदेवदेवैः कृतानि
ग१ नानायतनानि विष्णोः प्रत्यङ्ग मुख्याङ्कितमन्दिराणि यद्दर्शनात्कृष्णमनुस्मरन्ति २३
तीर्थानि तत्र गत्वा आप्रसिद्धान्यासेवितवान् २२ द्विजदेवैर्ऋषिभिर्देवैश्च कृतानि अङ्गमङ्गं प्रति वर्त्तन्त
इति प्रत्यङ्गानि आयुधानि तेषु मुख्यं चक्रं तेनाङ्कितानि मूर्द्धन्यहेमकुम्भेषु चिह्नितानि मन्दिराणि येषु
तानि नानाविधानि विष्णोरायतनानि क्षेत्राणि तीर्थानि च आसिसेवे येषां चक्राङ्कितमन्दिरवतां दर्शना

[illegible] ४

दुःसंगप्रायश्चित्तेन

ततो निर्गतस्य तीर्थाटनप्रकारमाह स इत्यष्टभिः स गजाह्वयान्निर्गतः सन् तीर्थपादो यस्य तस्य हरेः पदानि क्षे
त्राणि पुण्यचिकीर्षया अन्वाक्रमत प्रत्यपद्यत कौरवाणां पुण्येन लब्धः इति तेषां भाग्यमेव तेन रूपेणागत
मिति सूचितम् उर्व्यां सहस्रमूर्त्तिर्नृसिंहरूपाद्यनेकमूर्त्तिः सन् तीर्थपादः यानि यानि अधिष्ठाय स्थितः तानि
जगामेत्यर्थः १७ पुण्यानि यान्युपवनादीनि तेषु कुंजलतादिगूढस्थानं अपंकानि तोयानि येषां तेषु सरित्स

स निर्गतः कौरवपुण्यलब्धो गजाह्वयात्तीर्थपदः पदानि अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यां स्वधिष्ठितो या
नि सहस्रमूर्त्तिः १७ पुरेषु पुण्योपवनाद्रिकुंजेष्वपंकतोयेषु सरित्सरस्सु अनंतलिंगैः समलंकृतेषु चचार ती
र्थायतनेष्वनन्यः १८ गां पर्यटन्मेध्यविविक्तवृत्तिः सदाप्लुतोऽधःशयनोऽवधूतः अलक्षितः स्वैरवधूतवेषो
व्रतानि चेरे हरितोषणानि १९

रस्सु च तीर्थेषु आयतनेषु च क्षेत्रेषु कीदृशेषु अनंतस्य लिं
गैर्मूर्त्तिभिः सम्यगलंकृतेषु अनन्यः एकाकी १८ किंच गां पर्यटन् व्रतानि चेरे अचरत् मेध्या पवित्रा विवि
क्ता असंकीर्णा वृत्तिर्जीविका यस्य सदाप्लुतः प्रतितीर्थस्नातः अधः शयानं यस्य अवधूतः असंस्कृत
देहः अवधूतवेषो वल्कलादिधारी अत एव स्वैरलक्षितः १९ ॥ राम ॥ राम ॥ राम ॥

भा०टी०
५

वृष्ण्याधिपतिः सेनानीः आदिसर्गे पूर्वजन्मनि स्मरं कामं संतं अभिलेभे प्रद्युम्नं लब्धवती २८ सात्वतादीना
मधिपः उग्रसेनः शतपत्रनेत्रः श्रीकृष्णः नृपासनाशां राज्याभिलाषं परिहृत्य प्राणभयेन दूरात् स्थितः इ
त्यर्थः २९ हे सौम्य हरेः सुतः तेन सदृक्षः सदृशः साधु सुखमास्ते गुहं कार्त्तिकेयं अग्रे पूर्वजन्मनि या भा

कच्चिद्वृष्ण्याधिपतिर्यदूनां प्रद्युम्न आस्ते सुखमंग वीरः यं रुक्मिणी भगवतोऽभिलेभे आराध्य वि
प्रान्स्मरमादिसर्गे २८ कच्चित्सुखं सात्वतवृष्णिभोजदाशार्हकाणामधिपः स आस्ते यमभ्यषिं
चच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात् २९ कच्चिद्धरेः सौम्य सुतः सदृक्ष आस्तेऽग्रणी र
थिनां साधु सांबः असूत यं जांबवती व्रताढ्या देवं गुहं योऽम्बिकया धृतोऽग्रे ३० क्षेमं स कच्चिद्यु
युधान आस्ते यः फाल्गुनाल्लब्धधनूरहस्यः लेभेऽञ्जसाधोक्षजसेवयैव गतिं तदीयां यतिभिर्दु
रापां ३१ कच्चिद्बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः यः कृष्णपादांकितमार्गपांसुष्व
चेष्टत प्रेमविभिन्नधैर्यः ३२

वान्याभर्धृतः तं ३० युयुधानः सात्यकिः क्षेमं कुशलमास्ते फाल्गुनादर्जुनाल्लब्धं धनुषो रहस्यं येन त
दीयां अधोक्षजसंबंधिनीं ३१ श्वफल्कपुत्रोऽक्रूरः बुधो विद्वान् अमीवो भगवत्प्रपन्नः अनुस्मृतः अतएवानमीवो

निष्पापः भक्तोल्लिंगं योचेष्टत व्यलुठत् प्रेम्णा विभि
न्नं विदीर्णं धैर्यं यस्य सः स्वस्ति ह्नमास्ते ३२

अतिव्रज्य अतिक्रम्य यावदुद्धवः प्राप्तस्तावत्स्वयमपि यमुनामुपेत्य २४ स विदुरः प्राक्तनयं बृहस्पतेः शिष्यं नीतिशा
स्त्रे पारंगतं रे प्राक्तनयो नीतिशास्त्रं येन तं प्रतीतं ख्यातं स्वानां ज्ञातीनां भद्रं क्षेमं पृच्छत् प्रश्ने हेतुः भगवतः प्रजा
नां पोष्याणां प्रथमं तावद्रामकृष्णयोः कुशलं पृच्छति कच्चिदिति प्रश्ने स्वनाभ्यो भवः स्वनाभ्यः पाद्मो ब्रह्मा

ततस्त्वतिव्रज्य सुराष्ट्रमृद्धं सौवीरमत्स्यान्कुरुजांगलांश्च। कालेन तावद्यमुनामुपेत्य तत्रोद्धवं भा
गवतं ददर्श २४ स वासुदेवानुचरं प्रशांतं बृहस्पतेः प्राक्तनयं प्रतीतं आलिंग्य गाढं प्रणयेन भद्रं स्वा
नामपृच्छद्भगवत्प्रजानां २५ कच्चित्पुराणौ पुरुषौ स्वनाभ्यपाद्मानुवृत्त्येह किलावतीर्णौ आसात
उर्व्याः कुशलं विधाय कृतक्षणौ कुशलं शूरगेहे २६ कच्चित्कुरूणां परमः सुहृन्नो भामः स आस्ते सुख
मंग शौरिः यो वै स्वसॄणां पितृवद्ददाति वरान्वदान्यो वरतर्पणेन २७

तस्यानुवृत्त्या प्रार्थनया इहावतीर्णौ कुशलमासाते वर्तेते कृतक्षणौ दत्तोत्सवौ सर्वेषां केतौ सवा वितिवा
यो निर्त्य कुशलं हि पिउ के विशेषणं विशिष्टौ शूरगृहे कच्चिदासातमिति प्रश्नः २६ यदूनां कुशलं पृच्छति न
वभिः भामः पूज्यः शौरिर्वसुदेवः यद्वा भामा भगिनी भर्त्ता कुंती वसुदेवस्य भगिनी अतो देवकी पांडोर्भगिनी
ति लोकव्यवहारः वरानर्थान् वदान्यः अत्युदारः वराणां तत्पतीनां तर्पणेन संतोषणेन सह २७

भा०टी
६६

हे सौम्य अपि स्वित् किंचित् अन्ये च स्वस्ति चरंति निजस्य देहादिव्यतिरिक्तस्यात्मनो दैवं श्रीकृष्णं अन
न्यवृत्त्या एकांतभावेन ये सम्यगनुव्रता अनुसृताः हृदीकश्च सत्यभामाया आत्मजाश्च चारुदेष्णश्च गद
आदिर्येषां ते पि २९ इदानीं कुरून् पृच्छति षड्भिः अपि किं दोर्भ्यां स्वबाहुवद्वर्तमानाभ्यां विजयाच्युताभ्यां

अपि स्विदन्ये च निजात्मदैवमनन्यवृत्त्या समनुव्रता ये हृदीकसत्यात्मजचारुदेष्णगदादयः स्व
स्ति चरंति सौम्य ३० अपि स्वदोर्भ्यां विजयाच्युताभ्यां धर्मेण धर्मः परिपाति सेतुम् दुर्योधनोऽत
लक्ष्म्या प्यत यत्सभायां साम्राज्य[illegible] विजयानुवृत्त्या ३१ किं वा कृताघेष्वघमत्यमर्षी भीमोऽहिवद्दीर्घत
मं व्यमुंचत् यस्यांघ्रिपातं रणभूर्न सेहे मार्गं गदायाश्चरतो विचित्रं ३२ ॥ ५५ ॥

अर्जुनकृष्णाभ्यां धर्ममार्गेण धर्मो युधिष्ठिरः सेतुं धर्ममर्यादां परिपाति यस्य सभायां विजयानुवृत्त्या
जयपरंपरया अर्जुनस्य सेवयेति वा एवंभूतं यस्यैश्वर्यमित्यर्थः ३१ कृताघेषु कृतापकारेषु कुरु
षु स्वकर्तृकमघं दीर्घतमं बहुकालानुचिंतितं अहिवदत्यमर्षी भीमः किं व्यमुंचन्नो वा गदाया वि
चित्रं विविधं मार्गं चरतः भ्रमतः ३२

६६

संकर्षणः ३ वासुदेवः प्रद्युम्नः अनिरुद्धः ४

देवकन्नामायोभोजः तस्यपुत्र्यादेवक्याःविष्णुःप्रजाःपुत्रोयस्याःतस्यादेवमातुरदितेरिवकच्चित्शिवंय
ज्ञवितानरूपमर्थंत्रयीयथाप्रकाशतयाविभर्त्तितथादधार ३३ सात्वतानामुपासकानांकामान्दोग्धिपूरय
तीतिकामदुघःभगवत्वेहेतुः यंशब्दस्यशास्त्रस्ययोनिंकारणंआमनंतिवेदाः कुतःमनोमयंमनसःप्रवर्त्तकं
ततुकुतःसत्वस्यांतःकरणस्यचतुर्विधस्यतुरीयंतत्वंचतुर्थमधिदेवं चित्ताहंकारबुद्धिमनसांअंतःकरणभेदानां

कच्चिच्छिवंदेवकभोजपुत्र्याविष्णुप्रजायाइवदेवमातुः यावैस्वगर्भेणदधारदेवंत्रयीयथा
यज्ञवितानमर्थम् ३३ अपिस्विदास्तेभगवान्सुखंवोयःसात्वतांकामदुघोनिरुद्धः
यमामनंतिस्महिशब्दयोनिंमनोमयंसत्वतुरीयतत्वम् ३४

क्रमेणवासुदेवसंकर्षणप्रद्युम्नानिरुद्धाअधिष्ठातारः मनसश्चशब्दयोनित्वंप्रसिद्धं मनःपूर्वरूपंवाउत्त
ररूपमितिश्रुतेः तथाअन्योंतरआत्मामनोमयइतिप्रस्तुत्यतस्ययजुरेवशिरः ऋग्दक्षिणःपक्षः
सामोत्तरःपक्षइत्यादिश्रुतेः तथाचशिक्षायां आत्माबुद्ध्यासमेत्यार्थान्मनोयुंक्तेविवक्षया मनःका
याग्निमाहंतिसप्रेरयतिमारुतं मारुतस्तूरसिचरन्मंद्रंजनयतिस्वरमित्यादि ३४

भा॰ त॰
७

पृथात्रार्भकार्थे जीवतीत्युक्तमेवेत्याह हे सौम्य तं धृतराष्ट्रं जीवंतमनुशोचामि तत्किं यतोऽधःपतंतं तत्र हेतुः परेताय मृता
य भ्रात्रे पाण्डवे तत्पुत्रद्रोहद्वारेण यो विदुद्रुहे द्रोहं कृतवान् किंच जीवतोपि भ्रातुर्मम पापकृतवानित्याह येन सुहृत्त्वे आत्मा अहं स्वस
पुर्याः सकाशान्निर्यापितः विवासितः ४१ अहमवस्तु विस्मयः जानतोपि न स्यवदुःखं प्रेषितं यतस्त्वमाधरपि दुःखं प्राप
तोसीत्यत आह सोऽहं हरेः प्रसादात्तस्य पदवीं माहात्म्यं पश्यन् गतविस्मयः अत्र भूतले नान्योपलक्ष्यः गूढः सन् स्वैरं विच
रामि कथंभूतस्य मर्त्यविडंबनेन ऐश्वर्याच्छादकेन मानुष्यानुकरणेन नृणां दृशश्चित्तवृत्तीश्चालयतः भ्रामयतः ४२ न

सौम्यानुशोचे तमधःपतंतं भ्रात्रे परेताय विदुद्रुहे यः निर्यापितो येन सुहृत्स्वपुर्या अहं स्वपुत्रान्स
मनुव्रतेन ४१ सोऽहं हरेर्मर्त्यविडंबनेन दृशो नृणां चालयतो विधातुः नान्योपलक्ष्यः पदवीं प्रसादा
च्चरामि पश्यन्गतविस्मयोऽत्र ४२ नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः वधा
त्प्रपन्नार्तिजिहीर्षयेशोप्युपैक्षताघं भगवान्कुरूणां ४३

नु हरेः किमेवं लीलया येन स्वभक्तानां वनवासादिक्लेशा भवंति स्वस्य च दौत्ये बंधनोद्यमादिपराभवः
तद्धरेस्तेषां अपराधानंतरमेव हननं नापराधापेक्षेत्यत आह नूनं निश्चितं त्रिभिर्मदैः उत्पथानामुद्धतानां
वधाद्धेतोः प्रपन्नानामार्तिजिहीर्षया ईशः अघसमय एव हंतुं समर्थोपि कुरूणामघमुपैक्षत तदानीमे
व तेषां वधे सर्वदुष्टवधानस्यादित्याशयेनेत्यर्थः विद्यामदो धनमदस्तथैवाभिजनो मदः एते मदा मदा

भागवतस्ववदिमतांरमाइतिव्यामनः ॥ ३
७

रथस्यपानांमध्येयशोधाः कीर्त्तिधारी यद्वा स्वीयानां तेषां कीर्त्तिप्रदः उपजाअरथोयस्मात यस्य शरकू
टेनवाणसमूहेन गूढः आच्छन्नः तुतोष ३८ उतस्थित किंस्वित यमीनकल्लसहदेवौ रेमाते क्रीडितवंतौ यथः
माद्र्यासुतावपि रथायास्तनौ रथायाः पृष्ठैः स्वतोस्तुपर्णीविवरेमाते किंकृत्वा पराते दुर्योधनात स्वरिक्थंस्वी
यंराज्यंउद्धाय आच्छिद्य वज्रिवक्त्रात इंद्रस्यमुखात्स्वरिक्थममृतंगरुड इवेति यद्वास्तुपर्णाविवेति यद्विो
कश्चिद्यशोधारथस्यपानांगांडीवधन्वोपरतारिराजे अलाविलोयच्चरकूटगूढो मायाकिरा
तोगिशुस्ततुतोष ३९ यमावुतस्वितनयौरथायाः पार्श्वेस्ततौ पत्त्राभिरस्तोणीव रेमातउद्धायमध्ये
स्वरिक्थपरात्सुपर्णाविवव ज्रिवक्त्रात ३९ अहोरथापिध्रियते भैकार्थेराजर्षिवयेणविनापि
तेन यस्त्वेकवीरोधिरथो विजित्यधनु द्वितीयः ककुभश्चतस्त्रः ४०
गरुडावमृतमानयेतांतत्सितहत्त अस्तिणीवेतिमणीवादिगणात्वात्संधिः ३९ रथायाः किंतु कुशलंरथ
छेयंयतस्तस्याः पांडुनाविनाप्राणधारणमेवाश्चर्यमित्याह अहोइति ध्रियतेजीवति नचात्याश्चर्यं अभेका
र्थे ध्रियतेनभोगार्थं तथापित्वाश्चर्यमेवेत्याह तेनतथाभूतेनविना तदेवाह यस्त्विति धनुरेवद्वितीयंसहा

१७ नैषध

भा० द०
८

एतद्देवकैमुत्यन्यायेन प्रपंचयति द्वाभ्यां ॥ यः पंचवर्षोपि बाललीलयेति ॥ कृष्णं कंचित्परिकल्प्य परि
कल्प्य नैरेव साधनैः परिचर्य्यां कुर्वन् ॥ मात्रा प्रातर्भोजनार्थं प्रार्थितोपि तन्नेच्छत् ॥ जरसं वृद्धत्वं
गतः प्राप्तः ॥ २ ॥ श्रीकृष्णांघ्रिसुधया साधुनिर्वृतः ॥ तस्यां सेवत्याद्रे एवं विवसत्वापादकेन भक्तियोगेन भ

स्तेन २

यः पंचहायनो मात्रा प्रातराशाय याचितः ॥ तन्नैच्छद्रचयन् यस्य सपर्य्यां बाललीलया ॥ स कथं सेव
या तस्य कालेन जरसं गतः ॥ १ ॥ शिवा तेन प्रतिब्रूयाद्भर्त्तुः पादाववनुस्मरन् ॥ २ ॥ समुहूर्त्तमभून्तूष्णीं कृष्णांघ्रिसुध
या भृशं ॥ तीव्रेण भक्तियोगेन निमग्नः साधुनिर्वृतः ॥ ३ ॥ पुलकाक्लिन्नसर्वांगो मुंचन्मीलद्दृशा शुचः
पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसंप्लुतः ॥ ४ ॥ शनकैर्भगवल्लोकान्नृलोकं पुनरागतः ॥ विमृज्य नेत्रे
विदुरं प्रत्याहोद्धव उत्स्मयन् ॥ ५ ॥ उद्धव उवाच ॥ कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह ॥ किं नु
नः कुशलं ब्रूयां गतश्रीषु गृहेष्वहं ॥ ६ ॥

…निमग्नः ॥ ३ ॥ पुलकैः … ॥ मीलंत्या दृशा शुचः ॥ अश्रूणि मुंचन्
तेन विदुरेण पूर्णार्थः कृतार्थो लक्षितः ॥ यतो भगवति यः स्नेहस्तस्य प्रसरः पूरः तस्मिन् संप्लुतो निमग्नः ॥ ४ ॥ भग
वानेव लोकः तस्मान्नृलोकं देहानुसंधानं उत्स्मयन् यदुकुलसंहारादि … स्मरणेन विस्मयं प्राप्नुवन्
५ ॥ श्रीकृष्णविरहेण संतप्यमानः प्रत्याह ॥ श्रीकृष्ण एव द्युमणिः सूर्यस्तस्य निम्लोचे अस्तमये सति अजग

प्रि २

सर्वदर्शित्वं यथार्थमेवं भगवतो जन्मकर्माणि नान्यथेति कैमुत्यन्यायेनाह ॥ अजस्यापि जन्म ॥ अकर्तुरपि
कर्माणि पुंसां ग्रहणाय कर्मसु प्रवृत्तये अन्यथा न चेदेवं तर्हि भगवतो जन्मादि कथा तावदास्तां कोऽप्य
न्योऽपि गुणानां परो गुणातीतो देहयोगं कर्मविस्तारं वार्हतीति ॥४४॥ तस्मात्तदेवं भूताचिंत्यमायाविनोदस्य कथां
कथयेत्याह ॥ तस्य प्रपन्नाय अखिललोकपालास्तेषां अन्येषां च स्वीये अनुशासने स्थितानां ॥ अर्थाय प्रयोजना

अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसां ॥ नत्वन्यथा कोऽर्हति देहयोगं परो गुणानामु
तकर्मतंत्रं ॥४४॥ तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे ॥ अर्थाय जातस्य यदुष्वजस्य
वार्त्तां सखे कीर्तय तीर्थकीर्त्तेः ॥४५॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे पारमहंस्यां संहितायां वैयासि
क्यां विदुरोद्धवसंवादे प्रथमोऽध्यायः ॥१॥ श्री शुक उवाच ॥ इति भागवतः पृष्टः क्षत्त्रा वार्त्तां प्रियाश्रयां ॥ प्र
तिवक्तुं न चोत्सेहे औत्कंठ्यात्स्मारितेश्वरः ॥१॥

य यदुषु जातस्य ॥ तीर्थं संसारतारणी कीर्त्तिर्यस्येति ॥४५॥ इति तृतीये प्रथमः ॥१॥ द्वितीये कृष्णविश्लेषादनुशो
चन्नथोद्धवः ॥ तत्रैवाल्यचरित्राणि कृष्णस्यावर्णयच्छुसेन ॥ तदेवं प्रियवार्त्तां पृष्टस्योद्धवस्य श्रीकृष्णविरहोत्कं
ठ्यावेशेन प्रतिवचनासामर्थ्यमाह षड्भिः ॥ इतीति ॥ स्मारित ईश्वरो यस्य ॥१॥ रामरामेरामरारामरामराम ॥

भा०तृ०
८

१ तिसय

तदेवं विवर्णयति त्रिभिः यन्मर्त्यलीलास्वुकपयिकं योग्यं स्वस्यापि विस्मयजनकं यतः सौभगर्द्धेः सौभाग्यस्य परं
पदं पराकाष्ठा भूषणानां भूषणम् अंगानि यस्मिन् ११ दृशां स्वस्त्ययनं परमानन्दकरं त्रिभुवनस्थो लोकः आत्मिमा
त्रे अद्य इदानीं इह विधेः अर्वाक्सृतौ अर्वाचीनसंसारनिर्मितौ मनुष्यनिर्माणे वा यावत्कौशलं नैपुण्यं तत्कार्त्स्न्येन गतम् उ
पक्षीणं नातः परं तस्य कौशलमस्तीत्येवं मेने तन्मूर्त्तेर्विधातुः सृष्टत्वाभावेपि लोकस्य दृष्टिरियमुक्ता १२ अनुरागेण

यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतं विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणांगं
११ यद्धर्मसूनोर्वत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः कार्त्स्न्येन चाद्येह गतं विधातुरर्वाक्सृतौ कौशल
मित्यमन्यत १२ यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोवत
स्थुः किल कृत्यशेषाः १२ स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकंपितात्मा परावरेशो महदंशयुक्तो ह्यजोपि जा
तो भगवान्यथाग्निः १४

प्लुतो व्याप्तो हासो रासविनोदः लीलावलोकश्च तैः स्वकृततद्रासाद्यनंतरं प्रतिलब्धो मानो याभिस्ताः दृग्भिः सह अनुप्रवृत्ता गच्छंतं तत
मेवानुगता धियो यासां ताः असमापितकृत्या एव तस्थुः १३ एवंभूतं विग्रहदर्शने कारणमाह स्वीयान्येव शान्तान्यशान्तानि च
रूपाणि तत्र शान्तरूपेषु इतरैः पीड्यमानेषु अनुकंपितः कृतानुकंपः आत्मा यस्य अजोपि जातः आविर्भूतः महाभूतरूपेण
नित्यसिद्ध एव अग्निर्यथा काष्ठेषु आविर्भवति तद्वत् अजस्य जन्मनि हेतुः महान्महत्तत्त्वमंशः कार्य्यं तेशीयस्याः व्यक्तस्य तन्मा

श्रीधरीभागवत ५८

८

अनुशोचन्नाह दुर्भगो भाग्यहीनः येसहवसंतः श्रीहरिरयमितिनविदुः यथाक्षीरसमुद्रेजातमु
डुपंतत्रत्यामीनाःकेवलंकमनीयःकश्चिज्जलचरइत्येवविदुः नत्वमृतमयइतितद्वत् यद्वाजलेप्रति
बिंबितंचंद्रंयथेति ७ भाग्यहीनत्वादेवनविदुः नतुज्ञानसामर्थ्याभावादित्याह इंगितंचित्तस्थंजानंतीतित

दुर्भगोवतलोकोयंयदवोनितरामपि। येसंवसंतोनविदुर्हरिंमीनाइवोडुपं ७ इंगितज्ञाःपुरुप्रौढाए
कारामाश्चसात्वताः सात्वतामृषभंसर्वेभूतावासममंसत ८ देवस्यमाययास्पृष्टायेचान्यदसदाश्रिताः
भ्राम्यतेधीर्नतद्वाक्यैरात्मन्युप्तात्मनोहरौ ९ प्रदर्श्यातप्ततपसामवितृप्तदृशांनृणां आदायांतरधाद्यस्तु
स्वबिंबंलोकलोचनम् १०

याःपुरुअतिशयेनप्रौढानिपुणाः एकस्मिन्नेवस्थानेआरमंतीतितथा एवंभूताअपिभूतानामावासंतंसात्वतामृषभंसात्व
तश्रेष्ठममन्यंत ८ येयादवादेवमाययास्पृष्टाव्याप्ताःयादवोयमस्माकंधुरीतिवदंति येचशिशुपालादयोसदेवान्यदहंकार न्यदै
माश्रिताःनिंदंति तेषांवाक्यैरात्मनिहरौउप्तात्मनोनिक्षिप्तचित्तस्यमादृशस्यबुद्धिर्नभ्राम्यतेमोहंनप्राप्यते अन्येतुमूढाएवे
त्यर्थः ९ कोसौहरिरित्यपेक्षायामाह प्रदर्श्येति नतप्तंतपोयैः अतोऽवितृप्ताःदृशोयेषांतेषांस्वबिंबंमूर्तिं एतावंतंकालंप्रक
र्षेणदर्शयित्वायोंतर्हितवान् लोकस्यलोचनमादायआच्छिद्यतादृशस्यअन्यस्यविलोकनीयाभावात् १०

तदेवं परमैश्वर्ये सत्यपि यदुग्रसेनानुवर्तित्वं तत्तु नः स्मान्त्यंतं व्याथयतीत्याह स्वयं त्विति यस्य एवंभूतस्य तत्कैंकर्यं
नोऽस्मान्विग्लापयतीत्युत्तरेणान्वयः न साम्यातिशयौ यस्य यस्मात् पेक्ष्यान्यस्य साम्यमतिशयश्च नास्तीत्यर्थः तत्र
हेतवः त्र्यधीशः त्रयाणां पुरुषाणामीशः स्वाराज्यलक्ष्म्या परमानंदस्वरूपसंपत्त्यैव प्राप्तसमस्तभोगः बलिं करं
अर्हणं वा हरद्भिः समर्पयद्भिः चिरकालीनैर्लोकपालैः किरीटाग्रेणेडितं स्तुतं पादपीठं यस्य प्रणमतां किरीटसंघ

स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः बलिं हरद्भिश्चिरलोकपालैः किरीटको
टीडितपादपीठः तत्तस्य कैंकर्यमलं भृतान्नो विग्लापयत्यंग यदुग्रसेनं तिष्ठन्निषण्णं परमेष्ठिधि
ष्ण्ये न्यबोधयद्देव निधारयेति २० अहो बकी यं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी ले
भे गतिं धात्र्युचितां ततोन्यं कं वा दयालुं शरणं व्रजेम २१

हन्त ध्वनिरेव स्तुतित्वेनोत्प्रेक्षते अंग हे विदुर भृत्यान् उग्रसेनेय त्किंकरत्वं तद्देवाह परमेष्ठिधिष्ण्ये राजासने निष २४
ण्णं आसीनं स्वयं तिष्ठन् हे देव त्वं अवधारयेति न्यबोधयत् विज्ञापितवान् २० एवमनुवृत्तिः कृपयैवेति सूचयन्नपकारि
ष्वपि तस्य कृपालुत्वं दर्शयन्नाह अहो आश्चर्यं दयालुतायाः हंतुमिच्छयापि स्तनयोः संभृतं कालकूटं विषं यमपायय
त् बकी पूतना असाध्वी दुष्टापि धात्र्याः यशोदायाः उचितां गतिं लेभे भक्तवेषमात्रेण यः सद्गतिं दत्तवानित्यर्थः ततोन्यं कं

ननुकुतोसोपरावराणामीशः पारतंत्र्यप्रतीतेरित्याह द्वाभ्यां मामयेतत् दुर्विभाव्यंदुःखंच खेदयति तदेवाह वसुदेवगेहे
बंधनागारे यज्जन्मतद्विडंबनं अनुकरणं नतुतत्सिद्धेश्वरस्याविर्भावः कंसभयादिवनिर्गत्यव्रजेवासश्च कालयवनादिरिपुभ
यादिवपुरात् मथुरायाव्यवात्सीत्पलायत १५ एतच्चहरेश्चरितंस्मरतोममचेतःकर्मभूतंदुनोतीतिव्यथयति तदेवदर्शयति य
दाहेति हेतातहे अंबयुवांप्रसीदतंप्रसादंकुरुतं नकृतानिनिष्कृतिःगुरुशुश्रूषारूपाणियैस्तेषांनोऽस्माकंइतिवचनंरामाद्यभिप्रायं १६

मांखेदयत्येतदजस्यजन्मविडंबनंयद्वसुदेवगेहे व्रजेचवासोऽरिभयादिवस्वयंपुराद्व्यवात्सीद्यदनंतवीर्यः १५ दुनो
तिचेतःस्मरतोममैतद्यदाहपादावभिवंद्यपित्रोः तातांबकंसादुरुशंकितानांप्रसीदतंनोकृतनिष्कृतीनां १६ कोवाअ
मुष्यांघ्रिसरोजरेणुंविस्मर्तुमीशीतपुमान्विजिघ्रन् योविस्फुरद्भ्रूविटपेनभूमेर्भारंकृतांतेनतिरश्चकार १७ दृष्टा
भवद्भिर्ननुराजसूयेचैद्यस्यकृष्णंद्विषतोपिसिद्धिः यांयोगिनःसंस्पृहयंतिसम्यग्योगेनकस्तद्विरहंसहेत १८ तथैवचान्ये
नरलोकवीरायआहवेकृष्णमुखारविंदं नेत्रैःपिबंतोनयनाभिरामंपार्थास्त्रपूताःपदमापुरस्य १९

ननुतर्हिनीश्वरएवकिंनस्यात् नतुकृपामात्रमेतत्तत्राहत्रिभिः कोवाअंघ्रिसरोजरेणुंसकृदपिविजिघ्रन्सेवमानः पुमान्
विस्मर्तुमीशीतशक्नुयात् विस्फुरत्भ्रूविटपःभ्रूलतासएवकृतांतस्तेन १७ नचतस्यैश्वर्यंसाधनीयं भवद्भिरपिदृष्टत्वा
दित्याह दृष्टेति यांसिद्धिंसम्यग्योगेनयोगिनःप्राप्तुमिच्छंति १८ आहवेयुद्धेपार्थस्यास्त्रैःपूताःनिष्पापाःसंतः १९ ॥

भा०टी० सएवाधिकंवयः॥प्राप्तःसन्गोधनंचारयन्॥कथंभूतंगोधनंलक्ष्म्याःशोभादिसंपदोनिकेतनं॥सित
११ गोवृषायस्मिन्॥नानावर्णैर्गोसंघैः॥रणन्शब्दंकुर्वन्वेणुर्यस्य॥अरीरमन्तरमयामास॥२६॥व्यनुदत्तजघान
क्रीडनकान्॥तरणादिनिर्मितान्सिंहादीन्यथा॥२८॥विपन्नान्मृतान्गोपान्गावइतिगाश्चोत्थाप्य तदे

सएवगोधनंलक्ष्म्यानिकेतंसितगोवृषं॥चारयन्ननुगान्गोपान्रणद्वेणुररीरमत्॥२७॥प्रयुक्तान्भो
जराजेनमायिनःकामरूपिणः॥लीलयाव्यनुदत्तांस्तान्बालःक्रीडनकानिव॥२८॥विपन्नान्विषपा
नेननिगृह्यभुजगाधिपं॥उत्थाप्यापाययद्गावस्तत्तोयंप्रकृतिस्थितं॥२९॥अयाजयद्गोसवेनगोपराजंद्वि
जोत्तमैः॥वित्तस्यचोरुभारस्यचिकीर्षन्सद्व्ययंविभुः॥३०॥वर्षतीन्द्रेव्रजःकोपाद्भग्नमानेतिविह्वलः॥गोत्र
लीलातपत्रेणत्रातोभद्रानुगृह्णता॥३१॥शरच्छशिकरैर्मृष्टंमानयन्रजनीमुखं॥गायन्कलपदंरेमेस्त्री
णांमंडलमंडनः॥३२॥इतिश्रीमद्भागवतेमहापुराणेतृतीयस्कंधेविदुरोद्धवसंवादेद्वितीयोऽध्यायः२

वतोयंप्रकृतिस्थितंनिर्विषं॥२९॥इंद्रयज्ञाभंगेनकृतागवांयज्ञैव॥तेनगोपराजंनंदं॥वित्तस्यचेतिचकाराद्इंद्रस्य
मानभंगंचकुर्वन्॥उरुभारस्यअतिसमृद्धस्य॥३०॥कोपाद्वर्षति॥गोत्रःपर्वतएवलीलातपत्रंतेन॥हेभद्र॥३१॥मृ
ष्टमुज्ज्वलं॥स्त्रीणांमंडलंमंडयतीतितथा॥३२॥इतितृतीयेद्वितीयः॥२॥ ११

ननु भागवतानेव भगवाननुगृह्णातीति प्रसिद्धं सत्यं असुरानप्यहं भागवतानेव मन्ये यतो भागवता इव तेपि भगवद्धामा
भिनिवेशेन भगवन्तमपरोक्षं पश्यन्तीत्याह संरंभः क्रोधावेशः तेन मार्गेणाभिनिविष्टं चित्तं येषां तान् अत एव ये संग्रामे तार्
क्ष्यः कश्यपः तस्य पुत्रं गरुडं अंसे स्कंधे सुनाभायुधं चक्रायुधो हरिर्यस्य तं अचक्षत अपश्यन् तस्मात्तेप्यनुग्रहयुक्ता
एवेत्यर्थः वक्ष्यति च तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेदिति २२ इदानीं तस्यान्तर्धानप्रकारं वक्तुमादित आरभ्यत

मन्येऽसुरान्भागवतांस्त्र्यधीशे संरंभमार्गाऽभिनिविष्टचित्तान् ये संयुगेऽचक्षत तार्क्ष्यपुत्रमंसे सुनाभायुधमा
पतंतं २२ वसुदेवस्य देवक्यां जातो भोजेंद्रबंधने चिकीर्षुर्भगवानस्याः शमग्रजेनाभियाचितः २३ ततो नंद
स्त ३ व्रजमितः पित्रा कंसाद्विबिभ्यता एकादश समास्तत्र गूढार्चिः सबलोऽवसत् २४ परीतो वत्सपैर्वत्सांश्चारयन्
व्यहरद्विभुः यमुनोपवने कूजद्द्विजसंकुलितांघ्रिपे २५ कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसां रुदन्नि
व हसन्मुग्धबालसिंहावलोकनः २६

चरितं संक्षेपतः कथयति वसुदेवस्य भार्य्यायां जातः भोजेंद्रः कंसः तस्य बंधनागारे अस्याः पृथिव्याः शं सुखं स्वयं
चिकीर्षुः अग्रजेन ब्रह्मणाभियाचितः सन् २३ पित्रा हेतुभूतेन नंदव्रजं इतो गतः समाः संवत्सरान् गूढार्चिः गुप्ततेजाः
२४ व्यवहरत् अक्रीडत् कूजद्भिर्द्विजैः पक्षिभिः संकुलिता व्याप्ता अंघ्रिपा यस्मिन् २५ रुदन्निवेति इवशब्दस्य
यथायोगं सर्वत्रान्वयः मुग्धो बालस्य यः सिंहस्तद्वदवलोकनं यस्य सः २६ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥

भा० तृ०
१२

ककुद्मिनो वृषभान् अच्छिन्ननासिकान् छिन्नासिकान् कृत्वेतिवा तैर्वृषभैस्तद्दमनेनच भग्नो मानो येषां तथापि तां गृ
ध्यतः कामयमानान् अतएवाज्ञान् शस्त्रभृतो राज्ञः तच्छस्त्रैस्तत एव जघान ४ यदा अदित्याः कुंडले दातुं स्वर्गं गतः
तदा प्रभुः स्वतंत्रोपि ग्राम्यः स्त्रीपरतंत्र इव प्रियायाः सत्यभामायाः प्रियं विधातुमिच्छुः द्युतरुं पारिजातं मानीतवान् यदर्थेय

ककुद्मिनोऽविद्धनसो दमित्वा स्वयंवरे नाग्नजितीमुवाह तद्भग्नमानानपि गृध्यतोऽज्ञान् जघ्नेऽक्षतः शस्त्र
२२ भृतः स्वशस्त्रैः ४ प्रियं प्रभुर्ग्राम्य इव प्रियाया विधित्सुरार्छद्द्युतरुं यदर्थे वज्र्याद्रवत्तं सगणो रुषांधः क्री
डामृगो नूनमयं वधूनां ५ सुतं मृधे खं वपुषा ग्रसंतं दृष्ट्वा सुनाभोन्मथितं धरित्र्या आमंत्रितस्तत्तनयाय शे
षं दत्वा तदंतःपुरमाविवेश ६ तत्राहृतास्ता नरदेवकन्याः कुजेन दृष्ट्वा हरिमार्तबंधुं उत्थाय सद्यो जगृहुः प्र
हर्षव्रीडानुरागप्रहितावलोकैः ७

तन्निमित्तं क्रुद्धः सन् वज्री स्त्रीप्रेरितः योद्धुमन्वधावत् स्वकार्यसाधकेन तेन युद्धोद्यमस्तस्यायुक्त एवेत्याह क्रीडामृग इति
अयं वज्री ५ सुनाभेन चक्रेण उन्मथितं भौमं दृष्ट्वा तस्य मात्रा धरित्र्या भूम्या आमंत्रितः सन् तस्य तनयाय भगदत्ता
य हृतशेषं राज्यं दत्वा ६ तत्रांतःपुरे कुजेन भौमेन या आहृतास्ताः प्रहर्षश्च व्रीडा च अनुरागश्च तैः प्रहिता ये अवलो
कास्तैर्जगृहुः स्वीकृतवत्यः ७ ॥ रामराम रामराम ॥ ॥ ॥ रामराम ॥ ॥ १२

तृतीयेमथुरामेत्यव्रजात्कंसवधादिकं यत्कृतंद्वारकायांचक्रेसेनतद्वर्णयत् प्राभित्यव्ययं पित्रोःसुखस्यचिकी
र्षयेत्यर्थः तुंगात्राजमंचात् रिपुरथपानांनाथंकंसं व्यसोरपिविकर्षणंपित्रोःसुखार्थं १ ब्रह्मवेदंसविस्तरष
डंगादिसहितं पंचजनोदरविदारणाद्गुरुपुत्रमानीयेत्यर्थः २ भीष्मककन्ययारुक्मिण्यायेराजानःसमाहूताः
कृष्णस्त्वेमार्षं समाहृताइतिपाठेश्राकृष्टाइत्यर्थः केनसाधनेन श्रियोलक्ष्म्याःसवर्णेनसमानेनरूपेण यद्यपितया
केवलंश्रीकृष्णएवाहूतःनसर्वे तथापितस्यालावण्यंतेषामागमनेहेतुरितितयैवाहूताइत्युच्यते तेषांमिषतांपश्यतां
उद्धव उवाच॥ ततःसत्रागत्यपुरंस्वपित्रोश्चिकीर्षयाशंबलदेवसंयुतः निपात्यतुंगाद्रिपुयूथनाथं
हतंव्यकर्षद्व्यसुमोजसोर्व्याम् १ सांदीपनेःसकृत्प्रोक्तंब्रह्माधीत्यसविस्तरं तस्मैप्रादाद्वरंपुत्रंमृ
तंपंचजनोदरात् २ समाहुताभीष्मककन्ययायेश्रियःसवर्णेनबुभूषयैषां गांधर्ववृत्यामिष
तांस्वभागंजह्रेपदंमूर्ध्निदधत्सुपर्णः ३
पश्यतांमूर्ध्निपदंदधत् तयासहगांधर्ववृत्यापरस्परसमयरूपयाबुभूषयाभवितुमिच्छयाजहार कथंभूतंस्वभागं
लोकेस्वांशत्वात् तयास्वात्मनोर्पितत्वाच्च सुपर्णःसुपतनः शोभनागमन यद्वा सुपर्णइवस्वभागेसुधामित्यर्थः यद्वा
श्रियारुक्मिण्याःसमानंवर्णंरूपंवाचकंयस्यसः श्रियःसुपर्णोरुक्मीतेनसमाहूताःयेशिशुपालादयः किमर्थंभी
ष्मककन्ययासहतेषांबुभूषयाभर्तृभिर्भवितुमित्येतदर्थं तत्रशिशुपालस्याकांक्षितवरत्वेनबुभूषया जरासंधादीनां

तद्विवाहोत्सवेनशेषंपूर्ववत् ३

भा० तृ० अनभिनंदनप्रकारमाह कियानिति द्रोणादिभिर्मूलैः कारणभूतैः यदितियः अष्टादशाक्षौहिणीयुक्तः कुरुसत्वमपि
१३ क्षपितउरुभारोभुवः अयंकियान् अल्पइत्यर्थः यस्मान्मदंशैः प्रद्युम्नादिभिर्हेतुभूतैर्दुर्विषहंबलमास्ते १३ नचात्रान्य
उपायःप्रभवति किंतुमधुनायश्रीमदःसर्वतोमद्रस्तेन आताम्रविलोचनानामेषांविवादोयदाभविष्यतितदा इयानेवैषांव

कियान्भुवोयंक्षपितोरुभारोयद्द्रोणभीष्मार्जुनभीममूलैः अष्टादशाक्षौहिणिकोमदंशैरास्तेबलंदुर्वि
षहंयदूनां १३ मिथोयदैषांभविताविवादोमाध्वामदाताम्रविलोचनानां नैषांवधोपायइयानतोन्यो
मय्युद्यतेंतर्दधतेस्वयंस्म १४ एवंसंचिंत्यभगवान्स्वराज्येस्थाप्यधर्मजं नंदयामाससुहृदःसाधू
नांवर्त्मदर्शयन् १५ उत्तरायांधृतःपूरोर्वंशःसाध्वभिमन्युना सवैद्रौण्यस्त्रसंछिन्नःपुनर्भगवता
धृतः १६ अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्विभुः सोपिक्ष्मामनुजैरक्षन्रेमेकृष्णमनुव्रतः
१७ भगवानपिविश्वात्मालोकवेदपथानुगः कामान्सिषेवेद्वार्वत्यामसक्तःसांख्यमास्थितः १८

धोपायः अतोन्योनास्ति एकात्मानोपिमय्युद्यतेसति स्वयमेव विवादे नांतर्द्धीरन्नित्यर्थः १४ एवं
श्लोकद्वयेनोक्तंक्रमेणसंचिंत्य स्वराज्येस्थापयित्वा १५ धृतःरक्षितः १६ अनुजैःभीमादिभिःसह १७
सांख्यप्रकृतिपुरुषविवेकम् १८

स्व: २

आसांयोषितांपाणीन्तत्तदनुरूपःसन्सविधंविवाहोचितप्रकारसहितंयथाभवति ८ सर्वतःसर्वैर्गुणैःस्वतुल्या
निप्रकृतेर्मायायाविविधंभवनंविस्तारस्तदिच्छया यद्वा यद्वाप्रकृतेर्हेतोर्विविधंभवितुमिच्छया ९ कालःका
लयवनःरुंधतआवरएवतःमुचुकुंदभीमादिभिर्निमित्तमात्रैःस्वयमेवअजीघनत्घातितवान् तेनतेषांस्वपुं

आसांमुहूर्तएकस्मिन्नानागारेषुयोषितां सविधंजगृहेपाणीननुरूपःस्वमायया ८ तास्वपत्यान्य
जनयदात्मतुल्यानिसर्वतः एकैकस्यांदशदशप्रकृतेर्विबुभूषया ९ कालमागधसाल्वादीननी
कैःरुंधतःपुरं अजीघनत्स्वयंदिव्यंस्वपुंसांतेजआदिशत् १० शंवरंद्विविदंवाणंमुरंबल्वलमेव
च अन्यांश्चदंतवक्रादीनवधीत्कांश्चघातयत् अथतेभ्रातृपुत्राणांपक्षयोःपतितान्नृपान्
चचालभूःकुरुक्षेत्रंयेषामापततांबलैः ११ सकर्णदुःशासनसौवलानांकुमंत्रपाकेनहतश्रियायु
षं सुयोधनंसानुचरंशयानंभग्नोरुमुर्व्यांननंदपश्यन् १२

सांतेजःप्रभावंकीर्त्तिंचदत्तवान् १० शंवरद्विविदवल्वलानन्यानपिकांश्चित्प्रद्युम्नरामादिभिर्घातयत् अघातयत् या
तयन्नितिवापाठः दंतवक्रादीन्स्वयमवधीत् नृपान्घातयदित्यनुषंगः कथंभूतान् कुरुक्षेत्रमापततांगच्छतांयेषांव
लैःसैन्यैःभूःसर्वापिचचालचकंपे ११ सहतस्मः हताश्रीःआयुश्चयस्य भग्नऊरुर्यस्यतंउर्व्यांशयानंपश्यन्नपिननंद

भागवत प १२

भा० तृ० भगवत्पर्यणं यथाभवति गोविप्रार्थो ऽसवो येषां २५ ॥ इति तृतीये तृतीयः ॥ ३ ॥ चतुर्थे बंधुनिधनं श्रुत्वात्मज्ञानलब्धये
१४ उद्धवस्योपदेशेन हेतुना मैत्रेयमागमत् तैर्ब्राह्मणैर् तु ज्ञाताः वारुणीं पेयीं मदिरां ॥ १ ॥ वारुणीपेयमैरेयं तस्य दोषेण वो
निम्लोचति अस्तंगच्छति सति मईनेकदनं ॥ २ ॥ उपस्पृश्य सरस्वत्यामाचम्य ॥ ३ ॥ अहं चोक्तः पूर्वमेव द्वारकायां ४

अन्तं चो हरसंते भ्योस्त्वा भगवत्पर्यणं ॥ गोविप्रार्थासवः सूरयः प्रणेमुर्भुवि मूर्द्धभिः ॥ २५ ॥ इति श्रीमद्भाग
वते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां तृतीयस्कंधे विदुरोद्धवसंवादे तृतीयोऽध्यायः ॥ ३ ॥ उद्धव उवा
च ॥ अथ ते तदनुज्ञाता भुक्त्वा पीत्वा च वारुणीं तया विभ्रंशितज्ञाना दुरुक्तैर्मर्म पस्पृशुः १ तेषां मैरे
यदोषेण विषमीकृतचेतसां निम्लोचति रवावासीद्वेणूनामिव मर्दनम् २ भगवान्स्वात्ममायाया गतिं
तामवलोक्य सः सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् ३ अहं चोक्तो भगवता प्रपन्नार्तिहरेण ह
बदरीं त्वं प्रयाहीति स्वकुलं संजिहीर्षुणा ४ अथापि तदभिप्रेतं जानन्नहमरिंदम पृष्ठतोऽन्वगमं भ
र्तुः पादविश्लेषणाक्षमः ५ अद्राक्षमेकमासीनं विचिन्वन्दयितं पतिं श्रीनिकेतं सरस्वत्यां कृतकेतम
केतनं श्यामावदातं विरजं प्रशान्तारुणलोचनं दोर्भिश्चतुर्भिर्विदितं पीतकौशांबरेण च ॥
तदभिप्रेतम् कलसंहारादिकम् ५ कृतकेतं कृतावासम् अकेतनम् अनाश्रयम् विरजम् ॥
विरजसम् शुद्धसत्वमयम् विदितम् लक्षितम् कौषं कौशेयम् ॥ ॥ ऽऽ ऽऽ ॥ १४

स्निग्धोयःस्मितसहितोवलोकस्तेनपीयूषकल्पयासुधातुल्यया पागांतरेसुधाप्रवाहरूपया श्रीत्मनादेहेन क्षण
दयारात्र्यादत्तःक्षणः अवसरःउत्सवोयासांस्त्रीणांतासुक्षणंसौहृदंयस्यसः १९ गृहमेधेषुगृहधर्मेषुकामभोगोपा
येषुविरागःसौदासीन्यंजातमित्यर्थः २० यदास्वाधीनेष्वपिभगवतोविरागस्तदादैवाधीनेषुकोविस्रंभेत विश्वासं प्रीतिं

स्निग्धास्मितावलोकेनवाचापीयूषकल्पया चरित्रेणानवद्येनश्रीनिकेतेनचात्मना इमंलोकममुंचैव
रमयन्सुतरांयदून् रेमेक्षणदयादत्तक्षणस्त्रीक्षणसौहृदः १९ तस्यैवंरममाणस्यसंवत्सरगणान्
बहून् गृहमेधेषुयोगेषुविरागःसमजायत २० दैवाधीनेषुकामेषुदैवाधीनःस्वयंपुमान् कोविश्रं
भेतयोगेनयोगेश्वरमनुव्रतः २१ पुर्य्यांकदाचित्क्रीडद्भिर्यदुभोजकुमारकैः कोपितामुनयःशेपु
र्भगवन्मतकोविदाः २२ ततःकतिपयैर्मासैर्वृष्णिभोजांधकादयः ययुःप्रभासंसंहृष्टारथैर्देववि
मोहिताः तत्रस्नात्वापितॄन्देवानृषींश्चैवतदंभसा तर्प्पयित्वाथविप्रेभ्योगावोबहुगुणाददुः २३ हि
रण्यंरजतंशय्यांवासांस्यजिनकंबलान् हयान्रथानिभान्कन्याधरांवृत्तिकरीमपि २४

वाकुर्य्यात् योगेनचेत् योगेश्वरंकृष्णमनुव्रतः २१ शेपुःशापंददुः भगवतोमतेअभिप्रायेकोविदाःअभि
ज्ञाः २२ २३ वयःशीलादिबहुगुणोपेताःयाःगावस्ताः कन्याश्चवृत्तिकरीजीविकापर्य्याप्ता २४ ॥ ऽऽ॥

भा० टी० इदानीमित्ययुक्तंतदेवनिर्दिशति पुरेतिपूर्वस्मिन्पाद्मेकल्पे आदिसर्गे सर्गोपक्रमेमेमहिमालीलावभास्यतेये
१५ नेतत् ११ इत्येवमादृतस्ततःसोद्धवःआह प्रतीक्षितेणंकृपावलोकएवानुग्रहस्तस्यभाजनःपात्रंभूतः पादयोर्
प्रतिक्षितेणमनुग्रहस्यपात्रमिति शुचःअश्रूणिमुंचन्नु आवभाषेउक्तवानस्मि १२ नहिस्वाज्ञाननिवृत्तिमात्रकामो
हं किंतुत्वन्निषेवणोत्सुकः त्वयिचाघटमानाचरणंदृष्ट्वामेमोहोभवति अतस्त्वंतत्त्वज्ञानंदेहीतिप्रार्थयितु

पुरामयाप्रोक्तमजायनाभ्येपाद्मेनिषण्णायममादिसर्गे ज्ञानंपरंमन्महिमावभासंयत्सूरयोभागवतं
वदंति ११ इत्यादृतोक्तःपरमस्यपुंसःप्रतीक्षितानुग्रहभाजनोहं स्नेहोत्थरोमास्खलिताक्षरस्तंमुंचन्
शुचःप्रांजलिराबभाषे १२ कोन्वीशतेपादसरोजभाजांसुदुर्लभोर्थेषुचतुर्ष्वपीह तथापिनाहं
प्रवृणोमिभूमन्भवत्पदांभोजनिषेवणोत्सुकः १३ कर्माण्यनीहस्यभवोभवस्यतेदुर्गाश्रयोथारिभ
यात्पलायनं कालात्मनोयत्प्रमदायुताश्रयःस्वात्मन्रतेःखिद्यतिधीर्विदामिह १४

माह कोन्विति चतुर्षुधर्मादिषु तथापितान्नहंनवृणोमि हेभूमन्भवत्पदांभोजनिषेवणोत्सुकोहं १३ अघ
टमानाचरणंदर्शयति कर्माण्यनीहस्यनिस्पृहस्यनिष्क्रियस्यवा अभवस्यअजन्मनोभवोजन्मकालात्मन
स्तवारिभयाद्दुर्गाश्रयःपलायनंचस्वात्मनिरतिर्यस्यतस्यवह्वीभिःस्त्रीभिर्गृहस्थाश्रमइतियत्तत् इह अस्मिन्
विषयेविदुषामपिधीःसंशयंनखिद्यते १४ १५

अधिश्रित्य उपरि स्थापयित्वा अपाश्रितः पृष्ठतोऽवष्टब्धः अर्भकः बालः कोमलोऽश्वत्थो येन तं त्यक्तपि
प्पलं विषयसुखं येन तथापि अकृशं आनंदपुष्टं ६ द्वैपायनः सुहृत्सखा च यस्य सः स्वगुरुपुत्रत्वात्
पराशरशिष्यो मैत्रेय इत्यर्थः ७ प्रमोदेन भावेन च आनता कंधरा यस्य पाठांतरे प्रमोदस्य भारेण अनुरागेण

वामऊरावधिश्रित्य दक्षिणांघ्रिसरोरुहं अपाश्रितार्भकाश्वत्थमकृशं त्यक्तपिप्पलं ६ तस्मिन्म
हाभागवतो द्वैपायनसुहृत्सखः लोकाननुचरन्सिद्ध आससाद यदृच्छया ७ तस्यानुरक्तस्य मुनेर्मुकुंदः
प्रमोदभावानतकंधरस्य आशृण्वतो मामनुरागहाससमीक्षया विश्रमयन्नुवाच ॥ ८ ॥ श्रीभगवानुवाच ॥
वेदाहमंतर्मनसीप्सितं ते ददामि यत्तद्दुरवापमन्यैः सत्रे पुरा विश्वसृजां वसूनां मत्सिद्धिकामेन वसो त्व
येष्टः ९ स एष साधो चरमो भवानामासादितस्ते मदनुग्रहो यत् यन्मां नृलोकान्रह उत्सृजंतं दिष्ट्या द
दृश्वान्विशदानुवृत्त्या १०

सहहासो यस्यां तया समीक्षया विश्रमयन् विगतश्रमं कुर्वन् ८ ते मनसीप्सितं अहं अंतःस्थितो वेद वेद्मि दानेहेतुः
विश्वसृजां वसूनां च मिलितानां सत्रे हे वसो इति पुरा पूर्वजन्मनि त्वं वसुरभूः तदा मत्प्राप्तिकामेन त्वया अहमिष्टः अत
स्तत्साधनं ददामि दास्यामि अन्यैर्मत्पराङ्मुखैर्दुष्प्रापं ९ तस्य भाग्यमभिनंदति स एष भवो जन्म ते भवानां मध्ये चरमः
यद्यस्मिन्मदनुग्रहः आसादितो लब्धः यत्पुनर्मां रहः एकांते विशदानुवृत्त्या एकांतभक्त्या दृष्टवानसि एत

दिष्ट्या भद्रं जातमित्यर्थः नृलोकान्नरशरीरेण जीवात्ते
यां लोकान्नुत्सृजंतं वैकुंठं गच्छंतमित्यर्थः १०

ज्ञानेन विवेकेन ॥२१॥ विश्रंभात् विश्वासात् ॥२२॥ यद्यस्माद्भृत्यप्रयोजनसाधकाः संतश्चरंति ॥ नहि कृतार्थानाम
न्यत्कृत्यमस्तीत्यर्थः ॥२३॥ तत्त्वाय संराध्य इत्ययं भावः ॥ भगवतैव स्मरणमात्रेण तवाप्तित्वमुपदिष्टं प्रायं केवल
मसंभावनादिनिवृत्तये ज्ञानी कश्चिदाराध्यः स च तवाराध्यो मैत्रेयो न त्वहं ॥ ममांतिकमेव तदुपदेशे तस्यादिष्ट

श्रीशुक उवाच ॥ इत्युद्धवादुपाकर्ण्य सुहृदां दुःसहं वधं ॥ ज्ञानेनाशमयत्क्षत्ता शोकमुत्पतितं
बुधः ॥२१॥ स तं महाभागवतं व्रजंतं कौरवर्षभः ॥ विश्रंभादभ्यधत्तेदं मुख्यं कृष्णपरिग्रहे ॥२२॥ ज्ञा
नं परं स्वात्मरहःप्रकाशं यदाह योगेश्वर ईश्वरस्ते ॥ वक्तुं भवान्नोर्हति यद्धि विष्णोर्भृत्याः स्वभृत्यार्थ
कृतश्चरंति ॥२३॥ उद्धव उवाच ॥ ननु ते तत्त्वसंराध्य ऋषिः कौषारवोंतिके साक्षाद्भगवतादिष्टो म
र्त्यलोकं जिहासता २४ श्रीशुक उवाच ॥ इति सह विदुरेण विश्वमूर्तेर्गुणकथया सुधया प्लावितोरु
तापः ॥ क्षणमिव पुलिने यमस्वसुस्तां समुषित औपगविर्निशां ततोगात् ॥२५॥ राजोवाच ॥ निधनमुपगते
षु वृष्णिभोजेष्वधिरथयूथपयूथपेषु मुख्यः ॥ स तु कथमवशिष्ट उद्धवो यद्धरिरपि तत्यज आकृतिं त्र्यधीशः २६

त्वादिति २४ प्लावितः अपनीतः उरुस्तापो यस्य यमस्वसुर्यमुनायाः पुलिने तीरे तां निशां क्षणमिव समुषितः औ
पगविरुद्धवः २५ ब्रह्मशापेन निधनं प्राप्तेषु यद्यस्मात्त्रयाणां ब्रह्मादीनां ईशो हरिरपि आकृतिं मनुष्याकारं त्य

किंच मंत्रेषु अस्तु तेषु सत्सु मा माद्भ्यय वै अहं षट्छेः अच्छः अकुंठितः कालादिना अखंडः संततः सदात्मा संशया
दिरहितो वोधो विद्याशक्तिर्यस्य मुग्धवत् अज्ञवत् अप्रमत्तः अवहितः सन् १४ स्वात्मनस्तव रहः रहस्यं तत्त्वं तस्य
प्रकाशकं कस्मै ब्रह्मणे सर्वनामत्वमार्षं नोऽस्माकं ग्रहणेऽपि इदमेयद्यदि योग्यं तर्हि विदंभ र्तः स्वामिन् यतयतः छ्

मंत्रेषु मां वाउपद्भ्यय त्वमकुंठिताखंडसदात्मवोधः षट्छेः प्रभो मुग्ध इवाप्रमत्तस्त्वन्नो मनो मोहयतीव
देव १५ स्वात्मनं परं स्वात्मरहः प्रकाशं प्रोवाच कस्मै भगवान्समग्रं अपि त्वमं नोग्रहणाय भर्त्तर्वेदं जसा यह
जिनं त्वरेम १६ इत्यावेदितहार्दीयमह्यं सभगवान्परः आदिदेशारविंदाक्ष आत्मनः परमां स्थितिं १७ स
एव मा राधितपादतीर्थादधीततत्त्वात्मविवोधमार्गः प्रणम्य पादौ परिवृत्य देवमिहागतोहं विरहातुरात्मा
१८ सोहं तद्दर्शनाह्लादवियोगार्तियुतः प्रभो गमिष्ये दयितं तस्य वदर्याश्रममंडलं १९ यत्रो नारायणो देवो
नरश्च भगवानृषिः मृदु तीव्रं तपो दीर्घं तेपाते लोकभावनौ २० जिनं संसारदुःखं अनायासेन तरिष्यामः छ्
आवेदितो हार्दः हृदि स्थितोऽभिप्रायो येन तस्मै १७ आराधितपादो भगवान्स एव तीर्थं गुरु तस्मात् अधीतः अधिगतः
तत्त्वात्मविवोधस्य परमार्थज्ञानस्य मार्गो येन सोऽहं देवं श्रीकृष्णं परिहृत्य प्रदक्षिणीकृत्य १८ तस्य दर्शनेन आह्लादो वियो
गेनार्तिश्च ताभ्यां युतो वदर्याश्रमं स्थानं गमिष्यामि १९ मृदु परोपद्रवशून्यं तीव्रं दुश्चरं दीर्घं आकल्पांतं तेपाते तप

भा० तृ०
१७

इति तृतीये चतुर्थोध्यायः ॥४॥ पंचमे भगवल्लीलां क्षत्त्रा पृष्टो महामुनिः ॥ प्रोवाच महदादीनां सर्गं तैश्च हरेः स्तुतिं ॥ तत्रैश्चतु
भिरध्यायैः क्षत्तुर्मैत्रेयसंगमः ॥ संवादस्तु तयोः किं च द्वयेनाथ निगद्यते द्युनद्या गंगाया हारिद्वारे आसीनं न तु क
र्मव्यग्रं तत्र हेतुः ॥ अगाधः अपरिच्छिन्नो बोधो यस्येति मैत्रेयस्य सौशील्यं आर्जवादि गुणाश्च करुणादय
स्तैरभितृप्तः ॥ पाठांतरे तु सौशील्यादिभिः अभितृप्तं संतुष्टं मैत्रेयं १ प्रश्नानेवाह सुखायेति पंच

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां तृतीयस्कंधे विदुरोद्धवसंवादे चतुर्थोध्या
यः ॥४॥ श्रीशुक उवाच ॥ द्वारि द्युनद्या ऋषभः कुरूणां मैत्रेयमासीनमगाधबोधं क्षत्तोपसृत्याच्यु
तभावशुद्धः पप्रच्छ सौशील्यगुणाभितृप्तः ॥१॥ विदुर उवाच ॥ सुखाय कर्माणि करोति लोको न तैः
सुखं वान्यदुपारमं वा ॥ विंदेत भूयस्तत एव दुःखं यदत्र युक्तं भगवान्वदेन्नः ॥२॥ जनस्य कृष्णाद्वि
मुखस्य दैवादधर्मशीलस्य सुदुःखितस्य ॥ अनुग्रहायेह चरंति नूनं भूतानि भव्यानि जनार्दनस्य ३

दशभिः तैः कर्मभिः सुखं वान्यस्य दुःखस्योपारमं चेत्यर्थः अथवा अन्यद्वा न विंदेत किं तदपेक्षायां तस्मै
चनिर्दिष्टः उपारमं वेति ततस्तैः कर्मभिः भूयः पुनः पुनर्दुःखमेव विंदेत अत्र एवंविधे संसारे नोऽस्माकं यत्तयु
क्तं कर्तुं योग्यं तत्सर्वज्ञो भगवान्वदेत निरूपयितु २ दैवात्प्राचीनकर्मणो निमित्तभूतात्कृष्णाद्विमुखस्य
अतः अधर्मशीलस्य अतः सुदुःखितस्य जनस्यानुग्रहाय भव्यानि मंगलानि भवंतः परोपकारस्वभावा एवेत्य १७

ब्रह्मशापः अपदेशोमिषंयस्यतेनकालेनस्वशक्तिरूपेण अमोघंवांछितंयस्य नह्यब्रह्मशापःप्रभुःकिंतु
भगवदिच्छैवेत्यर्थः ॥२७॥ मयितुपरतेसतिज्ञानमर्हतीति ज्ञानयोग्योभवतीनचान्यः २८ मत्तःसकाशाद्दीप
दपिन्यूनोनभवति ॥ यद्यस्माद्गुणैर्विषयैर्नक्षोभितः मद्धुनंमद्विषयंज्ञानंलोकस्योपदिशन्निहभूतले

श्रीशुकउवाच ॥ब्रह्मशापापदेशेनकालेनामोघवांछितः संहृत्यस्वकुलंनूनंत्यक्ष्यन्देहमचिंत
यत् २७ अस्माल्लोकादुपरतेमयिज्ञानंमदात्मकं अर्हत्युद्धवएवाद्धासंप्रत्यात्मवतांवरः २८ नो
द्धवोण्वपिमन्न्यूनोयद्गुणैर्नार्दितःप्रभुः अतोमद्वयुनंलोकंग्राहयन्निहतिष्ठतु २९ एवंत्रिलोक
गुरुणासंदिष्टःशब्दयोनिना बदर्याश्रममासाद्यहरिमीजेसमाधिना ३० विदुरोप्युद्धवाच्छ्रुत्वा
कृष्णस्यपरमात्मनः क्रीडयोपात्तदेहस्यकर्माणिश्लाघितानिच देहन्यासंचतस्यैवंधीराणां
धैर्यवर्द्धनं अन्येषांदुष्करतरंपशूनांविक्लवात्मनां आत्मानंचकुरुश्रेष्ठकृष्णेनमनसेक्षितं ध्या
यन्गतेभागवतेरुरोदप्रेमविह्वलः ३१ कालिंद्याःकतिभिःसिद्धअहोभिर्भरतर्षभ प्रापद्यतस्वःस
रितंयत्रमित्रासुतोमुनिः ३२
तिष्ठतु २९ एवमनेनाभिप्रायेण शब्दयोनिनावेदकर्त्रीईजे
आराधयामास ३० पशूनुतुल्यानांविक्लवात्मनां अधीरचित्तानांमनसेक्षितंचिंतितं ३१ कालिंद्याःसकाशात्सिद्धएव

भा०त० लोकनाथाधिपतिः अलोकान् लोकालोकपर्वतात् वहिर्भागान् अचीकॢपत् कल्पयामास यत्र येषु सर्वाणि यानि
१८ सत्वानि तेषां निकायास्तेषां भेदः अधिकृतः तत्तत्कर्माधिकारी आश्रित इति वा ८ उत अपि च येन प्रकारेण जी
वानां आत्मा स्वभावः तत्कृतं रूपं तत्कृतं अभिधानं तासां भेदं कृतवान् विश्वसृट् स्वयं च आत्मयोनिः स्वतःसिद्धः

येस्तत्वभेदैरधिलोकनाथो लोकानलोकान्सह लोकपालान् अचीकॢपद्यत्र हि सर्वसत्वनिकायभे
दोधिकृतः प्रतीतः ८ येन प्रजानामुत आत्मकर्म्मरूपाभिधानां च भिदां व्यधत्त नारायणो विश्वसृगा
त्मयोनिरेतच्च नो वर्णय विप्रवर्य्य ९ परावरेषां भगवन्व्रतानि श्रुतानि मे व्यासमुखादभीक्ष्णं अत
पुम क्षुल्लसुखावहानां तेषामृते कृष्णकथामृतौघात् १० कस्तृप्नुयात्तीर्थपदोभिधानात्सत्रेषु वः
सूरिभिरीड्यमानात् यः कर्णनाडीं पुरुषस्य यातो भवप्रदां गेहरतिं छिनत्ति ११

९ ननु महाभारते त्वया सर्वं च श्रुतमेव तत्राह परेत्रैवर्णिकाः अपरे शूद्रादयः तेषां व्रतानि धर्माः मे मया अभीक्ष्णं पुनः
पुनः तेषां श्रवणेन अतृप्नुम न तृप्ताः स्मः तेषां तु क्षुद्रसुखावहत्वात् यस्तु तत्र कृष्णकथामृतौघः सूचितः तस्मादृते तत्र
तत्वं तु तृप्तिर्नास्तीत्यर्थः १० तत्र हेतुः क इति तीर्थपदः कृष्णस्य अभिधानात् कथामृतौघात् सत्रेषु समाजेषु
सूरिभिः नारदादिभिः ११

तत्तस्मात् हे साधुवर्य्य शं सुखरूपं वर्त्मनः आदिश कथय येन वर्त्मना संराधितो हृदि स्थितः सन् तत्त्वाधि
गमः आत्मापरोक्ष्यं तत्त्वसहितं पुराणं अनादिवेदप्रमाणकं ४ करोतिकर्माणीत्यादीनां वर्णयेति पंचमश्लो
केक्रियासंबंधः यथायेन प्रकारेण पुरुषस्वरूपेण कृतावतारः सन् त्र्यधीशः त्रिगुणमायानियंता आत्मतंत्रः स्वतंत्रः एव
यानिकर्माणि करोति कर्माण्येव विशेषतः पृच्छति यथेत्यादिना निरीहः निष्क्रियः निस्पृहो वा संस्थापयति सृष्टि

तत्साधुवर्य्यादिश वर्त्म शं नः संराधितो भगवान्येन पुंसां हृदिस्थितो यच्छति भक्तिपूते ज्ञानं सतत्त्वाधि
गमं पुराणं ४ करोति कर्माणि कृतावतारो यान्यात्मतंत्रो भगवांस्त्र्यधीशः यथा ससर्ज्जाग्र इदं निरीहः सं
स्थाप्य वृत्तिं जगतो विधत्ते ५ यथा पुनः स्वे ख इदं निवेश्य शेते गुहायां संनिवृत्तवृत्तिः योगेश्वराधीश्वर एक
एतदनुप्रविश्य बहुधा यथासीत् ६ क्रीडन्विधत्ते द्विजगोसुराणां क्षेमाय कर्माण्यवतारभेदैः मनो न
तृप्यत्यपि शृण्वतां नः सुश्लोकमौलेश्चरितामृतानि ७

तं कृत्वा वृत्तिं जीविकां ५ स्वे स्वीये खे हृदयाकाशे निवेश्य स्थापयित्वा निवृत्ता वृत्तयो यस्य गुहायां योगमायायां
बहुधा ब्रह्मादिरूपेण ६ मत्स्या[illegible]द्यवतारभेदैः क्रीडन् यानि यथा कर्माणि विधत्ते पुनर्विशेषं पृष्टमौत्सुक्य
माविष्करोति मनइति सुश्लोकाः पुण्यकीर्तयस्तेषां मौलिरिवाधिको नोपरि विराजमानस्तस्येत्यर्थः ७

भा० तृ० विशेषतः श्रीकृष्णकथाकथनीयेत्याशयेनाह सइति योविश्वसर्गाद्यर्थं गृहीतशक्तिः सएवपुरुषेषुकृतावतारः
सन्पुरुषानतिक्रम्यवर्तमानानि यानि च कारितानि कर्माणि विस्तारयेह १६ पुंसां निःश्रेयसमेवार्थः प्रयोजनं नेति
१९ नहेतुना पृष्टः १७ बहुमानमेवाह साध्विति पंचभिः अधोक्षज एव आत्मा मनो यस्य तस्यात्मनः स्वस्य की

स विश्वजन्मस्थितिसंयमार्थे कृतावतारः प्रगृहीतशक्तिः चकार कर्माण्यतिपूरुषाणि यानीश्वरः
कीर्तय तानि मह्यं ॥ १६ ॥ श्रीशुक उवाच ॥ एवं स भगवान् पृष्टः क्षत्त्रा कौषारविर्मुनिः पुंसां निःश्रे
यसार्थेन तमाह बहुमानयन् ॥ १७ ॥ श्रीमैत्रेय उवाच ॥ साधु पृष्टं त्वया साधो लोकान्साध्वनुगृह्णता की
र्तिं वितन्वता लोके आत्मनोऽधोक्षजात्मनः १८ नैतच्चित्रं त्वयि क्षत्तर्बादरायणवीर्यजे गृहीतो
नन्यभावेन यत्त्वया हरिरीश्वरः १९ माण्डव्यशापाद्भगवान्प्रजासंयमनो यमः भ्रातुः क्षेत्रे भुजिष्यायां जातः
सत्यवतीसुतात् २० भवान्भगवतो नित्यं संमतः सानुगस्य च यस्य ज्ञानोपदेशाय मादिशद्भगवान्व्रजन् २१

र्तिं च प्रसंगादितन्वता १८ हरिर्यद्गृहीतः एतच्चित्रं न भवति कुतः बादरायणवीर्यजे १९ तर्हि कथं शूद्रत्वं कथं च
लोकानुग्राहकत्वं तत्राह माण्डव्यशापादिति भ्रातुर्विचित्रवीर्यस्य क्षेत्रे तत्पत्नीकृतायां भुजिष्यायां दास्यां यम एव त्वं
जातोऽसि २० किंच भवानिति कुतः यस्य तव ज्ञानोपदेशाय मा मामादिष्टवान् चकारात्त्वयमेवोपदिष्टवानिति २१ १९

महाभारतस्याप्यत्रैव तात्पर्य्यमित्याह मुनिरिति कृष्णो वेदव्यासो भगवद्गुणान्मोक्षधर्मांस्तेनारायणीयोपाख्यानेन विवक्षुस्ति
ष्टुः सन् अर्थमादिवर्णनं तु न हरिकथायां मतिप्रवेशार्थमेवेत्याह यस्मिन्निति नृणां गतिः ग्राम्यसुखानुवादैर्हरि
कृतैर्नु निश्चितं हरेः कथायां गृहीतानीता तदुक्तमितिहाससमुच्चये कामिनो वर्णयन् कामान् लोभं लुब्धस्य वर्ण
यन् नरः किं फलमाप्नोति कूपे धमिव पातयन् लोकचिंतावतारार्थं वर्णयित्वात्र तेनतौ इतिहासैः पवित्रार्थैः पुनरत्रै

मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीतानु हरेः क
थायां १२ सा श्रद्दधानस्य विवर्द्धमाना विरक्तिमन्यत्र करोति पुंसः हरेः पदानुस्मृतिनिर्वृतस्य समस्तदुःखात्य
यमाशु धत्ते १३ तान् शोच्यशोच्यान विदोनुशोचे हरेः कथायां विमुखानघेन क्षिणोति देवोऽनिमिषस्तु येषा
मायुर्वृथावादगतिस्मृतीनां १४ तदस्य कौषारव शर्मदातुर्हरेः कथामेव कथासु सारं उद्धृत्य पुष्पेभ्य इवार्त
बंधो शिवाय नः कीर्तय तीर्थकीर्तेः १५

वर्णितो अन्यथा घोरसंसारबंधहेतुत्वेनस्यात् वर्णयेत्तत्कथं विद्वान्महाकारुणिको मुनिरिति १२ श्रीहरिकथायां मतिप्रवेश
स्य फलमाह सा कथायां मतिर्वा अन्यत्र ग्राम्यसुखे ततः किमत आह हरेरिति १३ एवंभूतायां कथायां ये न रमंते तान् शोचति तान्
शोच्यान् शोच्या ये तेषामपि शोच्यांश्च तत्रावितो भारततात्पर्य्यानभिज्ञान् शोच्यान् यद्वा तज्ज्ञात्वा हरेः कथायां विमुखान्वे
तेषामपि शोच्यान् इत्यर्थः अनिमिषः कालो येषां आयुः क्षयति तत्र हेतुः वृथैव वादगतिस्मृतयो वाग्देहमनोव्यापा
रा येषां १४ तत्तस्मात् हे कौषारव अस्य विश्वस्य शिवाय कथासु सारभूतां हरेः कथामेवोद्धृत्य नः कीर्तय यथा पु

कालवृत्त्या कालशक्त्या गुणमय्यां क्षुभितगुणायां अधोक्षजः परमात्मा आत्मांशभूतेन पुरुषेण प्रकृत्यधिष्ठातृरूपेण वी
र्यं चिदाभासमाधत्त वीर्यवान् चिच्छक्तियुक्तः २६ कालप्रेरितादव्यक्तात् मायातः तत्त्वपदं परित्यज्य महत इत्यल्लक्षणं अतः
पुंल्लिंगनिर्द्देशो विज्ञानात्मेति सत्त्वप्रधानत्वात् स्वदेहस्थं विश्वं उच्छून सवीजगतमंकुरादिरूपं वृत्तमिव व्यंजयन् प्रकाश
यन् यतोसौ तमोनुदतीति तमोनुदः तदुक्तं सात्वततंत्रे विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः प्रथमं महतः स्र

कालवृत्त्यातु मायायां गुणमय्यामधोक्षजः पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् २६ ततोभव
न्महत्तत्त्वमव्यक्तात्कालचोदितात् विज्ञानात्मात्मदेहस्थं विश्वं व्यंजंस्तमोनुदः २७ सोप्यंशगुणकाला
त्मा भगवद्दृष्टिगोचरः आत्मानमकरोदात्मा विश्वस्यास्य सिसृक्षया २८ महत्तत्त्वाद्विकुर्वाणदहंतत्त्वं व्य
जायत २९ कार्यकारणकर्त्रात्मा भूतेंद्रियमनोमयः वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ३०

ष्टृ द्वितीयं त्वंडसंस्थितं तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति २७ अहंकारोत्पत्तिमाह सार्द्धाभ्यां सोपीति अंशश्चि
दाभासो निमित्तं गुणा उपादानं कालः क्षोभकः तदात्मा तदधीनः भगवान्सर्वाध्यक्षः तद्दृष्टिगोचरः सन् स्वयमात्मा
नं व्यकरोत् रूपांतरमनयत् २८ २९ अहंकारस्य लक्षणमाह कार्यमधिभूतं कारणमध्यात्मं कर्ता अधिदैवं
तेषामात्मा आश्रयः तत्र हेतुः भूतेंद्रियमनोमयः तद्विकारवान् मन इति देवानामुपलक्षणं एतदेव विभागशः प्र

पंचयमैः वैकारिकस्तामसिकः सात्विकः
तैजसो राजसः ३४

विश्वस्थित्यादयः अर्थाविषयोयासांताः २२ तत्रसृष्टिलीलांवर्णयितुंततःपूर्वावस्थामाह इदंविश्वंअग्रेसृष्टेःप्र
वेपरमात्माभगवानेकएवआसआसीत आत्मानंजीवानां आत्मास्वरूपं विभुःस्वामीच नान्यद्रष्टृदृश्यात्मकंकिं
चिदासीत् कारणात्मनासत्वेपिपृथक्प्रतीत्यभावादित्याह अनानामत्युपलक्षणः नानाद्रष्टृदृश्यादिमतिभिर्नोप
लक्ष्यतइतितथा यद्वा अकारविश्लेषंविनैवायमर्थः यःस्रष्टानानामतिभिरुपलक्ष्यतेसतदाएकएवासीदिति कुतः आत्मे

अथतेभगवल्लीलायोगमायोपबृंहिताः विश्वस्थित्युद्भवान्तार्थावर्णयाम्यनुपूर्वशः २२ भग
वानेकआसेदमग्रआत्मात्मनांविभुः आत्मेच्छानुगतावात्मानानामत्युपलक्षणः २३ सवाएषतदाद्रष्टानापश्यद्दृश्यमे
कराट् मेनेसंतमिवात्मानंसुप्तशक्तिरसुप्तदृक् २४ सावाएतस्यसंद्रष्टुःशक्तिःसदसदात्मिका मायानामम
हाभागययेदंनिर्ममेविभुः २५

च्छामायातस्याअनुगतौलयेसति यद्वा आत्मनएकाकित्वेन अवस्थानेच्छयामनुद्बु
द्धायामित्यर्थः २३ तत्रप्रथमंमायोद्भवप्रकारमाहद्वाभ्यां सवैद्रष्टासन्दृश्यंनापश्यत् यतःसएकराट् एकएवतदाप्रकाश
ते आत्मानंअसंतइवमेने दृश्याभावेद्रष्टृत्वाभावात् तदाह सुप्ताःमायाद्याःशक्तयोयस्यसः नत्वसंत मेवमेने यतअसु
प्तादृक्चिच्छक्तिर्यस्येति २४ सावैद्रष्टृदृश्यानुसंधानरूपा सदसदात्मिका कार्यकारणरूपा यद्वा सत्दृश्यं अ
सत् अदृश्यं आत्मास्वरूपंतयोरात्मायस्याः तदुभयानुसंधानरूपत्वात् २५

द्रस्प२

देवा महदाद्यभिमानिनः विष्णोः कलाः अंशाः कालः लिंगं विकृतिः मायालिंगं विक्षेपः अंशलिंगं चेतना तानि विद्यंते येषु अतः समत्वेन नानात्वात् परस्परसंबंधात् स्वक्रियायां ब्रह्मांडरचनायां अनीशाः अशक्ताः संतो विभुं परमेश्वरं प्रोचुः ३८ मिथः स्पर्द्धिष्णवो देवा न मिलंतः परस्परं विघ्नकर्मण्य नीशानानि विश्वस्माहरिमीडिरे प्रपन्नानां तापोपशमे आत

एते देवाः कला विष्णोः कालमायांशलिंगिनः नानात्वात्स्वक्रियानीशाः प्रोचुः प्रांजलयो विभुं ३८
देवा ऊचुः नमाम ते देव पदारविंदं प्रपन्नतापोपशमातपत्रं यन्मूलकेता यतयोंऽजसोरुसंसारदुः
खं बहिरुत्क्षिपंति ३९ धातर्यदस्मिन्भव ईश जीवास्तापत्रयेणाभिहता न शर्म आत्मंल्लभंते भ
गवंस्तवांघ्रिछायां सविद्यामत आश्रयेम ४०

पत्रं छत्रं तत्र हेतुः यस्य पदारविंदस्य मूलं तत्तलं केतः आश्र
यो येषां बहिर्दूरत एव उत्क्षिपंति परित्यजंति पांथाः स्वगेहं प्राप्य मार्गश्रममिव ३९ श्रमं विनिवेदयंतः आ
हुः हे धातः पितः यद्यस्माद्भवे संसारे आत्मन् आत्मनि संबोधने वा शर्म सुखं न लभंते यदि ति पाठे यत्पादभजनं वि
ना शर्म न लभंते ननु ज्ञानाद्यज्ञानकृतस्तापो निवर्त्तते किमंघ्रिछायाश्रयणेन तत्राहुः सविद्यां तदाश्रयणेनैव

देवाश्चवैकारिकाः सात्विका अहंकारकार्यभूता इत्यर्थः यतयेभ्यः इंद्रियाधिष्टातृभ्यः अर्थाभिव्यंजनं शब्दादिप्र
काशी भवति ३१ तैजसान्येवेत्यन्वयः ज्ञानेंद्रियाणां ज्ञानमयानां सात्विकत्वशंका माभूदित्येवकारः तामसो भूतसूक्ष्म
स्य शब्दस्यादिकारणं यतः शब्दात् खं आकाशो भवति आत्मनो लिंगं स्वगुणशब्दरूपेण प्रकाशकं हृदयाकाशतयावा

अहंतत्वाद्विकुर्वाणान्मनोवैकारिकादभूत् वैकारिकाश्चयेदेवा अर्थाभिव्यंजनंयतः ३१ तैजसानींद्रिया
एयेव ज्ञानकर्ममयानि च तामसोभूतसूक्ष्मादिर्यतः खं लिंगमात्मनः ३२ कालमायांशयोगेन भगवद्वीक्षि
तंनभः नभसोनुसृतं स्पर्शं विकुर्वन्निर्ममेऽनिलं ३३ अनिलोपि विकुर्वाणो नभसोरुबलान्वितः ससर्ज
रूपतन्मात्रं ज्योतिर्लोकस्य लोचनं ३४ अनिलेनान्वितं ज्योतिर्विकुर्वत्परवीक्षितं आधत्ताम्भो रसमयं का
लमायांशयोगतः ३५ ज्योतिषाम्भोनुसंसृष्टं विकुर्वद्ब्रह्मवीक्षितं महीं गंधगुणामाधात् कालमायांशयोगतः
३६ भूतानां नभआदीनां यद्यद्भव्यावरावरं तेषां परानु संसर्गाद्यथा संख्यं गुणान्विदुः ३७

यद्वा लिंगशरीरं आकाशशरीरं ब्रह्मेति श्रुतेः ३३ नभसः तस्मादनुसृतं उद्भूतं स्पर्शं विकुर्वत् रूपांतरं नयत् अनिलं वायुं ए
वं सर्वत्र तन्मात्रद्वारा भूतोत्पत्तिरितिज्ञातव्यं ३४ नभसो सहितः स्वयंचोरुबलान्वितः ततो ज्योतिः लोचनं प्रकाशकं ३४ ३५ ३६
हे भव्याविदुरपाठांतरे भाव्यं कार्यं यद्यदवरमवरं कार्यं तेषां कार्याणां परैः कारणैरनुसंसर्गात् अन्वयात् यथासंख्यं यथाक्र
ममुत्तरोत्तरं अधिकान् गुणान् विदुः तथाहि नभसः शब्द एव गुणः अन्यान्वयाभावात् वायोस्तु स्पर्श आकाशान्वयाच्छब्दश्च

१ भा०तृ० २२

नचुयदि हृदिस्थास्यापिपराङ्मुखं केषांचित्सुदूरं नहि अन्येषामपि तथैवस्यात् अविशेषादितिशंक्याहुः तानिति असद्वृत्ति
भिर्वहिर्मुखैः अक्षिभिरिंद्रियैः पराहृतं दूरमपहृतं अंतस्थं मनोयेषां ते अथो अत एव नूनं तान्न पश्यंति वैप्रसिद्धं कु
तः पुनस्तेषां सत्संगः कान्तेतव पदन्यासो गमनं तस्य विलासो विभ्रमः तस्य लक्ष्मीः शोभा तस्या मे त्वल्लीलाकथादि
भिः शोभमानास्तास्तङ्क्तानित्यर्थः पथ इति लक्ष्म्याइतिपाठे त्वत्पदन्यासविलासलक्ष्मीयेषां तान्पथः त्वन्मार्गभक्ता

वि तान् वा असद्वृत्तिभिरक्षिभिर्ये पराहृतांतर्मनसः परेश अथो न पश्यंत्युरुगाय नूनं ये ते पदन्यासविलासल
क्ष्म्याः ४५ पानेन ते देवकथासुधायाः प्रवृद्धभक्त्या विशदाशया ये वैराग्यसारं प्रतिलभ्य बोधं यथांजसान्वी
युरकुंठधिष्ण्यं ४६ तथापरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठां त्वामेव धीराः पुरुषं विशं
ति तेषां श्रमः स्यान्न तु सेवया ते ४७

सतः मार्गान्वा श्रवणादीन्न पश्यंतीत्यर्थः यद्वा य एवंभूता भागवताः ते तान्नुन्मत्तान्नूनं नैव पश्यंतीत्यन्वयः सत्संगा
भावेन हरिकथाभ्यः हृदिस्थितमपि तेषां सुदूरमितिभावः ४५ एतदेव स्फुटयति पानेनेति द्वाभ्यां वैराग्यं सारो बलमस्य
बोधस्य तं तत्त्वज्ञा अन्वीयुः प्राप्नुयुः अकुंठधिष्ण्यं वैकुंठलोकं ४६ आत्मनि समाधिर्मनःस्थैर्यं स एव योगउपायस्तस्य
बलेन ज्ञानयोगतः अभिगमोक्तः सत्संगतस्त्वत्कथाश्रवणादिना त्वनायासेनैव अहंममताविष्टानां तु न कथंचिदिति

टी० स्कं० ३
२२

अज्ञातस्याश्रयणायोगात् तज्ज्ञानसाधनमाहुः मार्गंतीति अन्वेषयंतियत्तीर्थपदस्तवपदंवयंप्रपन्नाः कैर्मार्गंतिछंदः
सुपर्णैः वेदपक्षिभिः तवैवमुखपद्मंनीडंयेषां यथापक्षिणोनीडादुद्गतास्ततस्ततःपरिभ्रमंतःपुनस्तत्रैवविशंति तथा
वेदाअपित्वत्तउद्गतास्त्वय्येवपर्यवस्यंति अतोवेदानाश्रित्यत्वत्पदंमृगयंतइति विविक्तेअसंगेमनसि किंच अघ
मर्षः अघनाशकं यासांसरितांतासुवरायागंगायाःपदंउद्गमस्थानं अतोगंगामनुसेवमानाअपितदुद्गमस्थानंत्वत्पदं

मार्गंतियत्तेमुखपद्मनीडैश्छंदःसुपर्णैरृषयोविविक्ते यस्याघमर्षोदसरिद्वरायाःपदंपदंतीर्थपदः
प्रपन्नाः ४१ यच्छ्रद्धयाश्रुतवत्याचभक्त्यासंमृज्यमानेहृदयेवधाय ज्ञानेनवैराग्यबलेनधीराव्रजेमतत्ते
ङ्घ्रिसरोजपीठं ४२ विश्वस्यजन्मस्थितिसंयमार्थेकृतावतारस्यपदांबुजंते व्रजेमसर्वेशरणंयदीशस्मृतंप्र
यच्छत्यभयंस्वपुंसां ४३ यत्सानुबंधेऽसतिदेहगेहेममाहमित्यूढदुराग्रहाणां पुंसांसुदूरंवसतोपिपुर्यां
भजेमतत्तेभगवन्पदाब्जं ४४

कृष्ट १

प्राप्नुवंतीत्यर्थः ४१ ननुविषयाकृष्टचित्तानांकुतस्तदन्वेषणंतत्राहुः यच्छ्रद्धयेति अवधायध्यात्वावैराग्य
बलयुक्तेनज्ञानेनधीराभवंति सरागचित्तेध्यानमेवकुतस्तत्राहुः यच्छ्रद्धयाश्रवणपूर्वकयाभक्त्याचसंमृ
मानेसंशोध्यमाने ४२ भक्त्यनुग्रहस्मरणंतत्राह विश्वस्येति ४३ अंतर्यामितयानित्यसन्निहितेअन्यर्थकंव्रज
नमित्याशंक्याहुः यदिति सानुबंधे सोपकरणे असति तुच्छे पुर्यांस्वदेहएववसतोपियत्सुदूरंदुष्प्रापं ४४

भा० त०
२२

हेतवः कूटस्थः अविक्रियः पुरुषः अधिष्ठाता पुराणः पुरातनः एतदुपपादयंति त्वमिति हे देव अजन एव तत्गुणानां स
त्वादीनां कर्मयोनौ जन्मादीनां च योनौ कारणभूतायां शक्त्यां मायायां प्रथमं रेत आदधे निहितवानसीत्यर्थः कीदृशं कविं सर्व
ज्ञं महत्तत्त्वरूपं ५० ततः हे आत्मन् देव सत्प्रमुखा महदादयो वयं यदर्थं वभूविम तत्किं ते करवाम सृष्टिमिति चे
त्तत्राहुः न हि नोस्माकं त्वं स्वचक्षुः स्वीयं ज्ञानं शक्त्या सह परिदेहि ॥ प्रयच्छ यस्मात्त्वत्तः एवानुग्रहो येषां ते यदनुग्रहास्ते
षामस्माकं क्रियार्थे इयानेतावाननुग्रहो एषामित्येकं वा पदं ॥ यदीयात् ज्ञानक्रियाशक्तिभ्यामेव वयं सृष्टौ क्षमाः नान्यथे

ततो वयं सत्प्रमुखा यदर्थे वभूविमात्मन्करवाम किं ते ॥ त्वं नः स्वचक्षुः परिदेहि शक्त्या देव क्रियार्थे यदनु
ग्रहाणां ॥ ५१ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरमैत्रेयसंवादे महदाद्युत्पत्तिः पंचमोध्यायः ॥
५ ॥ ऋषिरुवाच ॥ इति तासां स्वशक्तीनां सतीनामसमेत्य सः ॥ प्रसुप्तलोकतंत्राणां निशाम्य गतिमीश्वरः ॥ काल
संज्ञां तदा देवीं विभ्रच्छक्तिमुरुक्रमः त्रयोविंशतितत्त्वानां गणं युगपदाविशत् १

त्यर्थः ॥ ५१ ॥ इति तृतीये पंचमः ॥ ५ ॥ षष्ठे तेरीश्वराविष्टैः सृष्टिमाह विराट्तनोः अधिदैवादिभेदं च तत्रैव भगवत्कृतं स्वश
क्तीनां महदादीनामसमेत्य अमिलित्वा सतीनां स्थितानां प्रसुप्तलोकतंत्रं विस्तररचनायासौ यद्वा प्रसुप्तजीवोपकरणा
नां गतिं स्थितिं दृष्ट्वा आविशदितुत्तरेणान्वयः कालेन संज्ञा तद्वाचो यस्याः कलयति क्षोभयति स्वकार्योन्मुखीकरोतीति वा काल

२२

तदेवं स्तुत्वा तत्प्रार्थयन्ते पंचभिः तत्तस्मात्तदे आद्य ते त्वदीया वयं यस्माल्लोकानां सिसृक्षया त्वयानुसृष्टाः क्रमेणोत्पादिताः त्रि-
भिरात्मभिः सत्वादिसंभावैः अतएव विरुद्धस्वभावात् नियुक्ताः ततयदर्थं सृष्टाः तत्स्वविहारतंत्रं त्वत्क्रीडोपकरणं ब्रह्मांडं ते तु-
भ्यं प्रतिहर्तुं समर्पयितुं न शक्नुमः अत स्त्वं नः स्वचक्षुः परिदेहीति त्रयाणां श्लोकानां चतुर्थेनान्वयः ४८ असमर्थमेव प्रपंच-
यितुं कार्य्यं स्यादिति वैचित्र्यमाहुः भोअज कालेतत्तदवसरे वलिं भोगं पाकसाकल्येन ते तुभ्यं हराम समर्पयाम यथा येन प्रका-

तत्तेवयंलोकसिसृक्षयाद्यत्वयानुसृष्टास्त्रिभिरात्मभिःस्म सर्वैर्वियुक्ताःस्वविहारतंत्रंनशक्नुमस्तत्प्र-
तिहर्त्तवेते ४८ यावद्बलिंतेऽजहरामकालेयथावयंचान्नमदामयत्र यथोभयेषांतइमेहिलोकावलिंह-
रंतोन्नमदंत्यनूहाः ४९ त्वंनःसुराणामसिसान्वयानांकूटस्थआद्यःपुरुषःपुराणः त्वंदेवशक्त्यांगुणक-
र्मयोनौरेतस्त्वजायांकविमादधेऽजः ५०

रेण अन्नमदाम भक्षयामेत्यनेनान्नमात्रमस्माकं ऐश्वर्य्यं एव भोगस्तवैवेत्युक्तं उभयेषां तव चास्माकं च यत्र स्थिताः इमे
जीवाः अनूहाः प्रत्यूहाः निर्विघ्नाः यद्वा अनूहाः अवितर्काः निःसंशया इत्यर्थः तथा च श्रुतिः तदेव मब्रुवन् आप
तत्वं नः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति ४९ अपश्यं च त्वया अस्माकं च कार्य्योपाधीनां जीवानां वृत्तिः परिकल्प-
नीया जनकत्वादित्याहुः नोस्माकं सान्वयानां सकार्य्याणां यद्वा अन्वेमीत्यन्वयः कारणं तत्सहितानां त्वमेवाद्यः कारणं अत्र

भा०तृ० एवंविभागसामर्थ्यायस्योत्कर्षमाह एष ह्यशेषेति अशेषसत्त्वानां प्राणिनां आत्मा व्यष्टीनां तदंशत्वात् अंशो जीवः अवतारत्वोक्तिं
२४ तस्मिन्नारायणाविर्भावाभिप्रायेण ७ पूर्वश्लोकार्थं विवृणोति साध्यात्मः अध्यात्मानींद्रियाणि तत्सहितः विराडिति सर्वत्र.
८ अध्यात्मादिभेदं प्रपंचयितुमाह स्मरन्निति विज्ञापितं यावद्गलितं तेजः हरामेत्यादि स्वेन तेजसा चिच्छक्त्या अवपन् एवं

एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः आद्योवतारो यत्रासौ भूतग्रामो विभाव्यते ७ साध्यात्मः साधिदैवश्च
साधिभूत इति त्रिधा विराट् प्राणो दशविध एकधा हृदयेन च ८ स्मरन् विश्वसृजामीशो विज्ञापितमधोक्ष
जः विराजमतपत्स्वेन तेजसैषां विवृत्तये ९ अथ तस्याभितप्तस्य कतिधायतनानि ह निरभिद्यंत देवानां
तानि मे गदतः शृणु १० तस्याग्निरास्यं निर्भिन्नं लोकपालो विशत्पदं वाचा स्वांशेन वक्तव्यं ययासौ प्र
तिपद्यते ११ निर्भिन्नं तालु वरुणो लोकपालो विशद्धरेः जिह्वयांशेन च रसं ययासौ प्रतिपद्यते १२
निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदं घ्राणेनांशेन गंधस्य प्रतिपत्तिर्यतो भवेत् १३

करिष्यामीत्यालोचितवान् यस्य ज्ञानमयं तप इति श्रुतेः एषां विश्वसृजां विवृत्तये विविधवृत्तिलाभाय ९ मे मत्तः शृणु १०
आयतनान्येवाह तस्याग्निरिति चतुर्दशभिः आस्यं निर्भिन्नं पृथक् जातं पदं स्थानं स्वांशेन स्वशक्त्या वाचा सह अविशत् अ
सौ जीवः वक्तव्यं प्रतिपद्यते शब्दमुच्चारयतीत्यर्थः एवं सर्वत्र यन्निर्भिन्नं तदधिष्ठानं अग्न्यादि प्रथमांतं आधिदैवं
वागादींद्रियं तृतीयांतमध्यात्मं प्रतिपत्तव्यमधिभूतम् ११ हरेर्विराजः १२ १३ २४

चेष्टारूपेण क्रियाशक्त्या कर्म तेषां क्रियां जीवानामदृष्टं वा २ प्रबुद्धं कर्म क्रियाशक्तिर्यस्य सः त्रयोविंशतिर्गुणाः दैवेनेश्वरेण प्रेरितः मात्राभिरंशैरधिपूरुषं विराड्देहं ३ जननमेवाह परेणेश्वरेण विश्वसृजां तत्त्वानां गणः मात्रया अंशेन चुक्षोभ परिणतः न सर्वात्मना यस्मिंल्लोकाः स्थिताः ४ स पुरुषः योऽधिपूरुष इत्युक्तः आण्डकोशे ब्रह्माण्ड

(कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः ॥) सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम् भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् २ प्रबुद्धकर्मा दैवेन त्रयोविंशतिको गणः प्रेरितोऽजनयत्स्वाभिर्मात्राभिरधिपूरुषम् ३ परेण विशता स्वस्मिन्मात्रया विश्वसृग्गणः चुक्षोभान्योन्यमासाद्य यस्मिंल्लोकाश्चराचराः ४ हिरण्मयः स पुरुषः सहस्रपरिवत्सरान् आण्डकोश उवासाप्सु सर्वसत्त्वोपबृंहितः ५ स वै विश्वसृजां गर्भो दैवकर्मात्मशक्तिमान् विबभाजात्मनात्मानमेकधा दशधा त्रिधा ६

मध्ये सर्वैः सत्त्वैरनुशायिभिर्जीवैः सहितः ५ गर्भः कार्यरूपो विराट् दैवशक्तिर्ज्ञानशक्तिः तया एकधा हृदयावच्छिन्नचैतन्यरूपेण कर्मशक्तिः क्रियाशक्तिः तया दशधा प्राणरूपेण प्राणादयः पंच नागकूर्मकृकरदेवदत्तधनंजया इत्येवं वृत्तिभेदेन दशविधः प्राणः आत्मशक्तिः भोक्तृशक्तिस्तया अध्यात्मादिभेदेन त्रिधा आत्मानं विभक्तवान् ६

भा० त० एवंविभागसामर्थ्याय स्योत्कर्षमाह एष हीति अशेषसत्त्वानां प्राणिनां आत्मा व्यष्टीनां तदंशत्वात् अंशो जीवः अवतारत्वोक्तिः
२५ तस्मिन्नारायणाविर्भावाभिप्रायेण ७ पूर्वश्लोकार्थं विवृणोति साध्यात्मः अध्यात्मानींद्रियाणि तत्सहितः विराडिति सर्वत्र.
८ अध्यात्मादिभेदं प्रपंचयितुमाह स्मरन्निति विज्ञापितं यावद्बलिं ते अजहराम इत्यादिस्तवेन तेजसा चिच्छक्त्या अवपत् एवं

एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते ७ साध्यात्मः साधिदैवश्च
साधिभूत इति त्रिधा विराट् प्राणो दशविध एकधा हृदयेन च ८ स्मरन् विश्वसृजामीशो विज्ञापितमधोक्ष
जः विराजमतपत्स्वेन तेजसैषां विवृत्तये ९ अथ तस्याभितप्तस्य कतिधायतनानि ह निरभिद्यन्त देवानां
तानि मे गदतः शृणु १० तस्याग्निरास्यं निर्भिन्नं लोकपालो विशत्पदं वाचा स्वांशेन वक्तव्यं ययासौ प्र
तिपद्यते ११ निर्भिन्नं तालु वरुणो लोकपालो विशद्धरेः जिह्वयांशेन च रसं ययासौ प्रतिपद्यते १२
निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदं घ्राणेनांशेन गंधस्य प्रतिपत्तिर्यतो भवेत् १३

करिष्यामीत्यालोचितवान् यस्य ज्ञानमयं तपः इति श्रुतेः एषां विश्वसृजां विवृत्तये विविधवृत्तिलाभाय ९ मे गदतः शृणु १०
आयतनान्येवाह तस्याग्निरिति चतुर्दशभिः आस्यं निर्भिन्नं पृथग्जातं पदं स्थानं स्वांशेन स्वस्य शक्त्या वाचा सह आविशत् अ
सौ जीवः वक्तव्यं प्रतिपद्यते शब्दमुच्चारयतीत्यर्थः एवं सर्वत्र यन्निर्भिन्नं तदधिष्ठानं अग्न्यादिप्रथमांतं आधिदैवं
वागादींद्रियं तृतीयांतमध्यात्मं प्रतिपत्तव्यमधिभूतम् ११ हरेर्विराजः १२ १३ २५

भा० टी० विक्रियां सकल्यादिरूपां २३ आत्मानं अहंकारं अभिमन्यते अनेनेत्यभिमानो रुद्रः कर्मणा अहं कृत्वा कर्तव्यमि
२५ तिविक्रिया २४ सत्यमिति बुद्धिचित्तयोरभेदेन निर्देशः महानिति ब्रह्मा चित्तेन चेतनया २५ त्रिलोकात्यन्तिमा

हृदयं चास्य निर्भिन्नं चंद्रमा धिष्ण्यमाविशत् मनसांशेन येनासौ विक्रियां प्रतिपद्यते २३ आ
त्मानं चास्य निर्भिन्नमभिमानो विशत्पदं कर्मणांशेन येनासौ कर्तव्यं प्रतिपद्यते २४ सत्वं चास्य
विनिर्भिन्नं महान्धिष्ण्यमुपाविशत् चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते २५ शीर्ष्णोस्य द्यौर्ध
रा पद्भ्यां खं नाभेरुदपद्यत गुणानां वृत्तयो येषु प्रतीयन्ते सुरादयः २६ आत्यंतिकेन सत्वेन दिवं दे
वाः प्रपेदिरे धरां रजः स्वभावेन पणयो ये च तान् अनु २७ तार्तीयेन स्वभावेन भगवन्नाभिमा
श्रिताः उभयोरन्तरं व्योम ये रुद्रपार्षदां गणाः २८ (मुखतोवर्तत ब्रह्म) ॥ ६६

हृ शीर्ष्ण इति द्वत्तयः परिणामाः २६ एतदेव प्रपंचयति द्वाभ्यां आत्यंतिकेन ऊर्जितेन पणव्यवहारे प
णाते यागादीना व्यवहरंतीति पणयो मनुष्याः तान् अनु ये तदुपकरणभूता गवादयस्ते पि धरां प्रपेदिरे २७ तृती
येन तमः तदीयेन तामसेन उभयोर्द्यावापृथिव्योरन्तरं मध्यं व्योम अन्तरिक्षं तदेव भगवतो नाभिस्तामाश्रिता रुद्रपार्षदां

भागवतटीकायाम् २४

२५

त्वष्टा आदित्यः १४ घ्राणेनेति घ्राणवद्देहव्यापिना त्वगेंद्रियेणेत्यर्थः [१५] शब्दस्य सिद्धिं ज्ञानं १६ त्वचं चर्म ओषधीः औ
षधयः त्वगिन्द्रियस्यैव स्थानभेदेन विषयद्वयं कंडूः स्पर्शश्च तत्र चायं नामभेदादेव नाभेदश्चेति द्वितीयस्कंध एव व्या

निर्भिन्नेऽक्षिणी त्वष्टा लोकपालो विशद्विभोः चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत् १४ निर्भि
न्नान्यस्य चर्म्माणि लोकपालोऽनिलो विशत् प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते १५ कर्णाव
स्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः श्रोत्रेणांशेन शब्दस्य सिद्धिं येन प्रपद्यते १६ त्वचमस्य विनिर्भि
न्नां विविशुर्धिष्ण्यमौषधीः अंशेन रोमभिः कंडूं यैरसौ प्रतिपद्यते १७ मेढ्रं तस्य विनिर्भिन्नं स्वधिष्ण्यं
क उपाविशत् रेतसांशेन येनासावानंदं प्रतिपद्यते १८ गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आवि
शत् पायुनांशेन येनासौ विसर्गं प्रतिपद्यते १९ हस्तावस्य विनिर्भिन्नाविंद्रः स्वर्पतिराविशत्
वार्त्तयांशेन पुरुषो यया वृत्तिं प्रपद्यते २० पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत् गत्या
स्वांशेन पुरुषो यया प्राप्यं प्रपद्यते २१ बुद्धिं चास्य विनिर्भिन्नां वागीशो धिष्ण्यमाविशत् बोधेनांशेन बो
द्धव्यप्रतिपत्तिर्यतो भवेत् २२

ख्यातः १७ कः प्रजापतिः १८ १९ स्वर्पतिः स्वर्गस्य पतिः इंद्रः वार्त्तया क्रयविक्रयशक्त्या वृत्तिं जीविकां २० २१।२२

भोक्तृत्वः देवकर्मात्मरूपिणः कालकर्मस्वभावशक्तिमतः भगवतो योगमायाबलेनोज्जृंभितमेतद्धिरण्यरूपं तदुपा-
कर्तुं साकल्येन निरूपयितुं कः श्रद्दध्यात् ईश्वरः इच्छाप्रपञ्चस्यापि स्वरूपगुणं तु दूरत इत्यर्थः ३४ अंग विदुर तथापि
हरेः कीर्तिं कीर्तयामि यथाश्रुतं गुरुमुखात् तदपि न सर्वात्मना किंतु यथामति स्वमत्यनुसारेण अन्याभिधा हरिव्य-
तिरिक्तार्थाभिधानं तया असतीं मलिनीं स्वीयां वाचं सत्कर्तुं पवित्रीकर्तुं ३५ अज्ञात्वापि यथामति कीर्तने श्रवणे वा-

एतत्तत्त्वं भगवतो दैवकर्मात्मरूपिणः कः श्रद्दध्यादुपाकर्तुं योगमायाबलोदयं ३४ अथापि कीर्त-
याम्यंग यथामति यथाश्रुतं कीर्तिं हरेः स्वां सत्कर्तुं गिरमन्याभिधासतीं ३५ एकांतलाभं वचसो नु
पुंसां सुश्लोकमौलेर्गुणवादमाहुः श्रुतेश्च विद्वद्भिरुपाकृतायां कथासुधायामुपसंप्रयोगं ३६ आ-
त्मनोवसितोवत्स महिमा कविनादिना संवत्सरसहस्रांते धिया योगविपक्वया अतो भगवतो माया
मायिनामपि मोहिनी ३७

वश्यं कैवल्यमित्याह एकांततो लाभं नु निश्चितमाहुः श्रुतेः श्रोत्रस्य उपाकृतायां
उपसंप्रयोगं सन्निधापनं ३६ न चातीतज्ञानेन निर्बंधः कर्त्तव्यः ब्रह्मणोपि दुर्ज्ञेयत्वादित्याहुः आत्मनो हरेर्महि-
मा योगविपक्वयापि संवत्सरसहस्रांतेपि आदिकविना ब्रह्मणापि किमिवसतो जातः इति काकुः तदप्येतावानिति
न ज्ञात इत्युक्तं ३७

अवर्त्तत प्रवृत्तं ब्रह्म वेदः यस्तन्मुखत्वात् मुखोद्भवत्वात् वर्णानां मुख्यमिव प्रथमः गुरुश्चाभूत् सोपि मुखतो वर्त्तते
त्यनुषंगः अध्यापनादिना ब्राह्मणस्य वेदो वृत्तिः तया च व्यासहद्ब्राह्मणो मुखतो जात इत्यर्थः एवमुत्तरत्र वर्णत्रये
पि ज्ञातव्यं २९ क्षत्रं पालनरूपा वृत्तिः तदनु क्षत्रमनुवृत्तः अनुसृतः क्षत्रियोपि बाहुभ्यो वर्त्तत इत्यर्थः तदनुवृत्त
त्वमेवाह य इति पौरुषः पुरुषस्य विष्णोरंशः कंटकाश्चोरादयस्तेभ्यो यत्क्षतं तदुपद्रवस्तस्मात्त्रायते रक्षति ३० वि

मुखतोवर्त्तत ब्रह्म पुरुषस्य कुरूद्वह यस्तन्मुखत्वाद्वर्णानां मुख्योभूद्ब्राह्मणो गुरुः २९ बाहुभ्योवर्त्तत
क्षत्रं क्षत्रियस्तदनुव्रतः योजातस्त्रायते वर्णान्पौरुषः कंटकक्षतात् ३० विशोऽवर्त्तंत तस्योर्वोर्लोक
वृत्तिकरीर्विभोः वैश्यस्तदुद्भवो वार्त्तां नृणां यः समवर्त्तयत् ३१ पद्भ्यां भगवतो जज्ञे शुश्रूषा धर्मसि
द्धये तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः ३२ एते वर्णाः स्वधर्मेण यजंति स्वगुरुं हरिं श्रद्धया
त्मविशुद्ध्यर्थं यज्जाताः सह वृत्तिभिः ३३ १ नः

शः कृष्यादिव्यवसायाः लोकस्य वृत्तिकरीः जीविकाहेतवः तस्य विभोरुर्वोः प्रवृत्ताः तदुद्भव ऊरुः वार्त्तां जीविकां यः स्वह
त्याः संपादितवान् ३१ तस्यां निमित्तभूतायां यस्य वृत्त्या हरिः स्वयमेव तुष्यते ३२ यद्यस्माज्जाताः गुरुत्वात्
जनकत्वात् वृत्तिप्रदत्वाच्च हरेराराधनं तेषां परो धर्म इत्यर्थः ३३ रामरामराराम ॥ ७ ॥ ८ ॥

यथोक्तं स्मरन् विप्रर्षिस्तज्ज्ञानमीशो विज्ञापितमर्थो द्वेज इत्यादिना अविद्योपाधेर्जीवस्य भोगमोक्षौ ईश्वरः सृष्ट्यादि
करोतीति तद्व्याख्याने पृष्टमनुवदति आस्तादीति गुणमयी आत्मनो जीवस्य कर्तृत्वभोक्तृत्वादिमोहोऽतो द्विका
यामायातयासृष्टवान् तदुक्तं प्रथमे यया संमोहितो जीव आत्मानं त्रिगुणात्मकं परोऽपि मनुतेऽनर्थं तत्कृतं
चाभिपद्यत इत्यादिना अत्र च अतो भगवतो मायया मायिनामपि मोहिन्येति संस्थापयति पालयति प्रत्यपि
धास्यति प्रातिलोम्येन तिरोहितं करिष्यति पाठांतरे प्रतिलोम्येनात्मनि अभितो धारयिष्यति ४ एतच्च जीवस्याविद्याश्र

आसाचीद्भगवानविमिश्रं गुणमय्यात्ममायया तयासंस्थापयत्येतद्भूयः प्रत्यभिधास्यति ४
देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः अविलुप्तावबोधात्मा स युज्येताजया कथं ५ भ
गवानेक एवैष सर्वक्षेत्रेष्ववस्थितः अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ६

यत्त्वेवं घटेत न तु तत्संभवतीत्याह देशत इति योऽसौ देशादिभिरविलुप्तावबोध आत्मा जीवः ब्रह्मस्वरूपत्वात्स कथम
जयाविद्यया युज्येत तत्र देशतो दीपप्रभाया इव लोपो नास्ति सर्वगतत्वात् न कालतो विद्युदिव नित्यत्वात् नाव
स्थातः स्मृतिवत् अविक्रियत्वात् न स्वतः स्वप्नवत् सत्यत्वात् नान्यतः घटादिवत् अद्वितीयत्वात् एवंरूपेणैव यस्यावबो
धो न लुप्यते कथमजया युज्येत अजा चात्राविद्यैव न माया तस्या अवबोधेन विरोधाभावात् ५ किंच ब्रह्मस्वरूपत्वा
देव जीवस्य संसारोऽपि न विद्यत इत्याक्षिपति सर्वक्षेत्रेष्ववस्थितो भोक्तापि वस्तुतो भगवानेव चिद्रूपेण तद्व्यतिरेकाभा
वात् एवं सति अमुष्य जीवस्य दुर्भगत्वं आनंदादिभ्रंशः क
र्मभिर्हेतुभूतैः क्लेशो वा कुतः कर्मसंबंधाभावात् अन्यथा
ईश्वरस्यापि तत्प्रसंगः स्यादिति भावः ६

यद्यस्मात्स्वयमपि आत्मा हरिः आत्मवर्त्मस्वमायागतिं एतावदिति न वेद अनंतत्वात् केवलं नमस्करोति यत इति यस्य प्र
त्यावाचोपि मनसा सह तम् अप्राप्यैव निवर्त्तंते दुर्ज्ञेयत्वात् ॥ न केवलं वाङ्मनसी अहंकाराधिष्ठाता रुद्रोपि इमे इंद्रियाधि
ष्ठातारो देवाः अन्ये च ॥ ३५ ॥ इति श्री० त० ती० ये ष० ष्टः ॥ ६ ॥ सप्तमे संशयच्छेदि प्रतिनं द्य मुनेर्वचः ॥ पुनः तत्राक्षितानानाप्रश्नाः
सम्यगुदीरिताः ॥ अथ ते भगवल्लीलायोगमायोपबृंहिता इत्यादिना मायागुणैर्लीलया भगवान् सृष्ट्यादि करोतीत्युक्तं श्रुत्वा

यत्स्वयं चात्मवर्त्मात्मा न वेद किमुतापरे ॥ यतो प्राप्य निवर्त्तंते वाचश्च मनसा सह ॥ अहं चान्य इमे देवास्त
स्मै भगवते नमः ॥ ३५ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरमैत्रेयसंवादे परानुप्रश्ने षष्ठोध्यायः ॥ ६ ॥
श्रीशुक उवाच ॥ एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत १ विदुर
उवाच ॥ ब्रह्मन्कथं भगवतश्चिन्मात्रस्याविकारिणः लीलया चापि युज्येरन्निर्गुणस्य गुणाः क्रियाः २ क्री
डायामुद्यमोर्भस्य कामश्चिक्रीडिषान्यतः स्वतस्तृप्तस्य च कथं निवृत्तस्य सदान्यतः ३ ॥

तां भारत्या प्रार्थनारूपया प्रीणयन् इवेति अप्राप्यज्ञानेनापेक्षात् १ निर्विकारस्य क्रिया निर्गुणस्य च गुणाः कथं
ली २ लयेत्युक्तिः प्रयोजनाभावं परिहरति न वस्तुविरोधमिति भावः २ अर्भकवल्लीलापि न युज्यते वैषम्यादित्या
ह उद्यमयति प्रवर्त्तयतीति उद्यमः अर्भकस्य क्रीडायां प्रवृत्तिहेतुः कामोस्ति अन्यतस्तु बस्तत इतरेणवा
लांतरप्रवर्त्तनेन वा तस्य क्रीडेच्छा भवति ईश्वरस्य तु स्वतस्तृप्तस्य कथं कामः अन्यतः सदा निवृत्तस्य असंगा

[illegible] ३

भा० तृ० तन्निवृत्तिमुपायमाह सर्वे अनात्मनो गुणनिवृत्तिधर्मेण वासुदेवानुकंपया च तस्मिन्भक्तियोगः तेन निरोधत्तेऽ
२८ दृश्यो भवति शनैरित्यनेन साधनानुसारेण तूक्तं १२ तर्हि सर्वानर्थनिवृत्तिः कदेत्यपेक्षायामाह यदेंद्रिया
णामुपरामो नैश्चल्यं कद्रष्टुरात्मनि अंतर्यामिरूपे अथ अनंतरमेव कृत्स्न क्लेशविलयमात्रे दृष्टांतः संसुप्तस्ये
वेति न तु पुनरुत्थाने १३ भक्तियोगेन क्लेशनिवृत्तिं दर्शयति अशेषेति गुणानामनुवादः श्रवणं वा आत्मनि मन

सर्वे निवृत्तिधर्मेण वासुदेवानुकंपया ॥ भगवद्भक्तियोगेन तिरोधत्ते शनैरिह १२ यदेंद्रियोप
रामोऽथ द्रष्ट्रात्मनि परे हरौ । विलीयंते तदा क्लेशाः संसुप्तस्येव कृत्स्नशः १३ अशेषसंक्लेशश
मं विधत्ते गुणानुवादश्रवणं मुरारेः ॥ कुतः पुनस्तच्चरणारविंदपरागसेवारतिरात्मलब्धा १४
विदुर उवाच ॥ संछिन्नः संशयो मह्यं तव सूक्तासिना विभो उभयत्रापि भगवन्मनो मे संप्रधावति १५

सि लब्धा अश्रवणकीर्तनापेक्षायां सप्रेम ध्याने किं पुनर्वाच्यमित्यर्थः १४ उत्तरमभिनंदन्नात्मनः कृतकृत्यतामाविष्करोति सं
छिन्न इति द्वाभ्यां ॥ चिद्रूपत्वाविशेषेऽपि कथमीश्वरस्य जगत्कर्तृत्वादि कथं वा जीवस्य संसार इति यः संशयो ममासीत्स
तव सूक्तं यापपत्तिकं वाक्यमेवासिः खड्गः तेन संछिन्नः अत इदानीं मे मम मनः उभयत्रापि ईश्वरस्य स्वातंत्र्ये च
संप्रधावति सम्यक्प्रविशति एवं वा अविलुप्तावबोधरूपस्यात्मनः कथमविद्यया बंधः कुतो वा तन्निवृत्तिरिति

अज्ञानमेव संकटं दुर्गं तस्मिन्वर्तमानं मानसं कस्मलं मे तं पराणुद अपाकुरु ७ चोदितश्चाक्षिप्तः स्मयन्निव विस्म-
यमानो विष्णुर्वदन्निव वस्तुतस्तु गतस्मयः ८ भगवतोऽचिंत्यशक्तेरीश्वरस्य सेयं माया नयेन तर्केण विरुध्यत इति
यत् तर्कविरोधमेवानुवदति विमुक्तस्यैव पुंसः अविद्यायाबंधनं कार्पण्यं चेति ९ अत्रोदाहरणमाह यद्यथा
अर्थेन शिरश्छेदादिनापितु पद्रष्टुः स्वप्नसाक्षिणः ममेदं शिरश्छिन्नमित्यात्मविपर्ययः केवलं नैवप्रती-

एतस्मिन्मे मनो विद्वन् खिद्यतेऽज्ञानसंकटे तन्नः पराणुद विभो कस्मलं मानसं महत् ७ श्री-
शुक उवाच ॥ स इत्थं चोदितः क्षत्त्रा तत्त्वजिज्ञासुना मुनिः ॥ प्रत्याह भगवच्चित्तः स्मयन्निव गतस्म-
यः ८ श्रीमैत्रेय उवाच ॥ सेयं भगवतो माया यन्नयेन विरुध्यते ईश्वरस्य विमुक्तस्य कार्पण्यमु-
त बंधनं ९ यदर्थेन विनामुष्य पुंस आत्मविपर्ययः प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिकः
१० यथा जले चंद्रमसः कंपादिस्तत्कृतो गुणः दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः ११

यतेतद्वत् १० ननु ईश्वरस्यापि किं न प्रतीयेत तत्राह यथा जले प्रतिबिंबितस्यैव चंद्रमसो जलोपाधिकृतः कंपा-
दिधर्मो दृश्यते न त्वाकाशे स्थितस्य तथाऽनात्मनो देहादिधर्मः असन्नपि तदभिमानिनो द्रष्टुरस्येत्यर्थः ॥

रनात्मनो जीवस्यैव न त्वीश्व १

२ं भा०टी० अथ्योतरं प्रष्टुं तदुक्तमनुवदति त्रिभिः स्रष्टेति विकारैरिंद्रियादिभिः सहितानि उद्धृत्य तदंशैर्विराजं स्रष्ट्वा २१
२९ प्रविष्टस्य स्वरूपमाह यमिति विराजं विशिनष्टि यत्रेति इमे विश्वे सर्वे लोकाः सविकाशम संकोचेन २२ प्रा
णादयः पंचनागाद्यः पंचेति एवं दशविधः इंद्रियाणि च अर्थाश्च इन्द्रियाणि चेति पुनरुक्तिः तदेव नोप
लक्षणार्थः तत्साहितः सर्वोपबृंहकत्वात् प्राणस्य तत्साहित्यं एवं त्रिवृत् त्रिविधः प्राणस्त्वयेरित उक्तः त

स्रष्ट्वाग्रे महदादीनि सविकाराण्यनुक्रमात् तेभ्यो विराजमुद्धृत्य तमनु प्राविशद्विभुः २१
यमाहुराद्यं पुरुषं सहस्रांघ्र्यूरुबाहुकं यत्र विश्व इमे लोकाः सविकाशं समासते २२ यस्मिन्द
शविधः प्राणः सेंद्रियार्थेंद्रियस्त्रिवृत् त्वयेरितो यतो वर्णास्तद्विभूतीर्वदस्व नः २३ पुत्रपुत्रै
श्च पौत्रैश्च नप्तृभिः सह गोत्रजैः प्रजा विचित्राकृतय आसन्याभिरिदं ततम् २४ प्रजापतीनां
स पतिश्चक्लृपे कान्प्रजापतीन् सर्गांश्चैवानुसर्गांश्च मनून्मन्वंतराधिपान् २५

स्य विभूतीर्ब्रह्माद्याः विसर्गश्च वाच्याः २३ यत्र यासु इदं विश्वं ततं व्याप्तं २४ एवमेतत्पुराणं मैत्रेयो भगवा
न् किलेति परीक्षित् प्रश्नोत्तरतया विदुरमैत्रेयसंवादः प्रस्तावितः अतस्तानेव विदुरेण कृतान्प्रश्नानाह या
वत्समाप्ति प्रजापतीनां पतीं ब्रह्मेत्यादीनां वर्णयेति वक्ष्यमाणेनान्वयः चक्लृपे अकल्पयत् सर्गान्वविधान्

यस्मात्वयासाधुव्याहृतं किंतत् हरेः शक्तिर्या आत्ममायाजीवविषयातदयनंतदाश्रयमेतत् दुर्भगत्वादिकं भाती
ति यद्यस्मात् स्वप्नरष्टशिरश्छेदादिवद्पार्थमवस्तुभूतंमूलशून्यंच यस्मादस्यविश्वस्यमूलंतस्याज्ञानंविनाबहिर्नास्ति
१६ अन्यज्ञानत्वात् सर्वंममसंशयोजातइत्याह यश्चेति मूढतमोदेहाद्यासक्तः बुद्धेः प्रकृतेस्तुपरमीश्वरंप्राप्तोसु
खंयथाभवतितथाएधेतेजीवेतइत्यर्थः संशयक्लेशाभावात् यस्तुदुःखानुसंधानेप्रपंचंजिहासति स्वानंदंसंवे

साध्वेतद्व्याहृतंविद्वन्नात्ममायायनंहरेः आभात्यपार्थंनिर्मूलंविश्वमूलंनयद्बहिः १६ यश्चमू
ढतमोलोकेयश्चबुद्धेःपरंगतः तावुभौसुखमेधेतेक्लिश्यत्यंतरितोजनः १७ अर्थाभावंविनिश्चित्यप्रती
तस्यापिनात्मनः तांचापियुष्मच्चरणसेवयाहंपराणुदे १८ यत्सेवयाभगवतःकूटस्थस्यमधुद्विषः रति
रासोभवेत्तीव्रःपादयोर्व्यसनार्दनः १९ दुरापाह्यल्पतपसःसेवावैकुंठवर्त्मसु यत्रोपगीयतेनित्यंदेवदेवो
जनार्दनः २०

दनाभावात् हातुंनशक्नोति सतुक्लिश्यतीत्यर्थः १७ इदानींतुकृतार्थोस्मियतस्त्वयासंशयश्छि
न्नः केवलंबाधितानुवृत्तिरेवावशिष्टासापियुष्मत्प्रसादान्निवर्तिष्यतइत्याह नात्मनःअनात्मनःप्रपंचस्यप्रतीतस्यापि
अर्थाभावं अर्थोत्रनास्तिकिंतुतत्रप्रतीतिमात्रमितियुष्मच्चरणसेवयानिश्चित्यतांप्रतीतिमप्यहंपराणुदे अपनेष्यामी
त्यर्थः १८ मधुद्विषःपादयोरतिरासःप्रेमोत्सवः तीव्रोदुर्वारः स्वाभाविकः व्यसनंसंसारंमर्दयतिनाशयतितथा १९ अ
होदुर्लभंप्राप्तमस्मीत्याह दुरापादुर्लभावैकुंठस्यविष्णोस्तल्लोकस्यवावर्त्मसुमार्गभूतेषुसत्सु यत्रयेषुमहत्सेवयाकथा

कथायां नतो [illegible]
[illegible] २०

हरि १

भा०टी० येन मार्गेणासन्तुष्येत् येषामितियादृशानां ॐ २९ अनापृष्टमिति अपृष्टमपि मह्यंवक्तव्यमितिभा
३० वः ३० प्रतिसंक्रमः प्रलयः तत्रप्रलयेइमं परमेश्वरं शयानंराजानमिवचामरग्राहिणः केवाअनुशेरतेअ
यानमनुस्वपंति ३१ पुरुषस्यसंस्थानंजीवस्यतत्वं परमेश्वरस्यस्वरूपं येनांशेनतयोरैक्यं तथाज्ञानं
च नैगमं औपनिषदं यानिसूरिभिःप्रोक्तानि तस्यज्ञानस्यसाधनानितानिचब्रूहि ३२ गुरुंविनेतत्व

दानस्यतपसोवापियच्चेष्टापूर्त्तयोःफलं प्रवासस्थस्ययोधर्मोयश्चपुंसउतापदि २८ येन
वाभगवांस्तुष्येद्धर्मयोनिर्जनार्दनः संप्रसीदतिवायेषामेतदाख्याहिमेनघ ॐ २९ अनुव्रतानां
शिष्याणांपुत्राणांचद्विजोत्तमं अनापृष्टमपिब्रूयुर्गुरवोदीनवत्सलाः ३० तत्वानांभगवंस्ते
षांकतिधाप्रतिसंक्रमः तत्रेमंकउपासीरन्कउस्विदनुशेरते ३१ पुरुषस्यचसंस्थानंस्वरूपंवापरस्य
च ज्ञानंचनैगमंयत्तद्गुरुशिष्यप्रयोजनं निमित्तानिचतस्येहप्रोक्तान्यनघसूरिभिः ३२ स्व
तोज्ञानंकुतःपुंसांभक्तिर्वैराग्यमेववा ३३ एतान्मेपृच्छतःप्रश्नान्हरेःकर्मविवित्सया ब्रूहिमेज्ञस्यमित्र
त्वादजयानष्टचक्षुषः ३४ सर्वेवेदाश्चयज्ञाश्चतपोदानानिचानघ जीवाभयप्रदानस्यनकुर्वीरन्क
लामपि ३५

भवंतीत्याह स्वतइति ३३ मेप्रश्नान् मेमित्रत्वात् स्निग्धत्वादित्यन्वयभेदान्नमेपदस्यपौन
रुक्त्यम् ३४ तत्वोपदेशेन जीवाभयप्रदानस्य ३५ राम ३०

हे मित्रायाश्चात्मजः संस्थां सन्निवेशं २६ सर्गाणां संव्यूहं संविभागं गार्भस्वेदांडजोद्भिदं गार्भो जरायुजाः स्वेद
च द्वाभ्यां च जाताः स्वेदद्विजाः उद्भिदश्च तेषां २७ सर्गादीन् आश्रयं [illegible] तः २८ रूपं लिंगं शीलमाचारः

एतेषामपि वंशांश्च वंश्यानुचरितानि च उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते तेषां संस्थां
प्रमाणं च भूर्लोकस्य च वर्णय २६ तिर्यङ्मानुषदेवानां सरीसृपपतत्रिणां वद नः सर्गसंव्यूहं गार्भ
स्वेदंद्विजोद्भिदं २७ गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयम् सृजतः श्रीनिवासस्य व्याचक्ष्वोदा
रविक्रमं २८ वर्णाश्रमविभागांश्च रूपशीलस्वभावतः ऋषीणां जन्मकर्माणि वेदस्य च विकर्षणं
१ यज्ञस्य च वितानानि योगस्य च पथः प्रभो नैष्कर्म्यस्य च सांख्यस्य तंत्रं वा भगवत्स्मृतं २ पाषंडपथ
वैषम्यं प्रतिलोमनिवेशनं जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः ३ धर्मार्थकाममोक्षाणां
निमित्तान्यविरोधतः वार्त्ताया दंडनीतेश्च श्रुतस्य च विधिं पृथक् ४ श्राद्धस्य च विधिं ब्रह्मन् पितृ
णां सर्गमेव च ग्रहनक्षत्रताराणां कालावयवसंस्थितिं ५

स्वभावः शमादिः ततः विकर्षणं विभागं १ वितानानि विस्तारान् नैष्कर्म्यस्य ज्ञानस्य तदुपासनस्य च सांख्य
स्य पथः मार्गान् तंत्रे चेत्यर्थः २ पाषंडानां पंथाः प्रवृत्तिः तदेव वैषम्यं ३ निमित्तान्युपायान् परस्पराविरो

धेन ४ ग्रहादीनां कालचक्रे संस्थितिं ५

भा० द० तमेवविशिनष्टि स्वमेवधिष्ण्यं स्वीयमाश्रयं वासुदेवसंज्ञं परमानंदरूपं ध्यानपथेऽनुभूयवर्द्धमानयंत्कसर्वो
३१ त्कर्षेण पूजयंतं प्रत्यगध्यतमंतर्मुखीकृतं नेत्राबुजकमलंकिंचिदुन्मीलयंतं कृपावलोकेन सनत्कुमारादीनाम
भ्युदयायेष ३ मुनीनांविशेषणं सार्द्धेन स्वर्द्धुन्याउदकेनार्द्रै रितिश्रीभागवतश्रवणार्थं सत्यलोकात्पाताल
प्रतिश्रवतरंतोनिरन्तरंगंगामध्यतएवावतीर्णाइतिभावः चरणोउपधीयेतेयस्मिन्पद्मेतद्दुपरस्यसतोनमंतः

स्वमेवधिष्ण्यंवर्द्धमानयंतंयद्वासुदेवाभिधमामनंति प्रत्यधृतान्तांबुजकोशमीशदुन्मीलयं
तंविबुधोदयाय ३ स्वर्धुन्युदार्द्रैः स्वजटाकलापैरुपस्पृशंतश्चरणोपधानं पद्मंयदर्च्चंत्यहिरा
जकन्याः सप्रेमनानावलिभिर्वरार्थाः मुहुर्गृणंतोवचसानुरागस्खलत्पदेनास्यकृतानितज्ज्ञाः ३
किरीटसाहस्रमणिप्रवेकविद्योतितोद्दामफणासहस्रं ४ ३ प्रोक्तंकिलैतद्भगवत्तमेननिवृत्ति
धर्माभिरतायतेन सनत्कुमाराय सचाहपृष्टः सांख्यायनायांगधृतव्रताय ४

कथंभूतं तदाह यत्पद्मंप्रेमसहितं यथाभवत्येवंनानोपहारैः पूजयंति वरार्थाः पतिकामा कृतानिकर्माणिगृणंतः
केन अनुरागेणस्खलंतिपदानियस्मिन्तेनवचसातानिजानंतीतितज्ज्ञाः ३ सहस्रमेवसाहस्रं किरीटानांसाहस्रे
येमणिप्रवेकाः रत्नोत्तमाः तैः प्रद्योतितं उद्दामफणानांसहस्रंयस्यतं अष्टच्छन्निति पूर्वेणैवान्वयः ४ ३ तेनसंकर्षणेन

३१

वुंभुक्षितोपि: ॥ आपृष्टः ॥ पुराणकल्पोयं मुनिप्रधानः सः ॥ ३६ ॥ इति श्री तृतीये सप्तमः ॥ ७ ॥
पुराणेकल्पंत्तेप्रकाशितइति ॥ श्रोतारमभिनंदति सत्तंसे
श्रेष्ठमेसमभूद्ब्रह्मानाभेस्तुजलशायिनः ॥ नसज्ञानन्नजलेविभ्यत् तपसातोषयेद्विभुं ॥
वितुंयोग्यः ॥ वतअहोपद्यस्मात् ॥ इह अस्मिन्वंसेवभूविघजातोतिकथंभूतः ॥ भगवानेवप्रधानभक्तोयस्यसः ॥ अ

श्रीसूतउवाच ॥ सइत्थमापृष्टपुराणकल्पः कुरुप्रधानेनमुनिप्रधानः प्रवृद्धहर्षोभगवत्कथायांसं
चोदितस्तंप्रहसन्निवाह ॥ ३६ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरमैत्रेयसंवादे विदुरप्रश्नो
सप्तमोध्यायः ॥ ७ ॥ श्रीमैत्रेयउवाच ॥ सत्सेवनीयोवतपूरुवंशोयल्लोकपालोभगवत्प्रधानः वभू
विथेहाजितकीर्तिमालां पदेपदेनूतनयस्यभीक्ष्णं १ सोहंनृणांक्षुल्लसुखायदुःखंमहद्गतानां
क्षा २ विरमायतस्य प्रवर्त्तयेभागवतंपुराणंयदाहसाक्षाद्भगवान्दृषिभ्यः २ आसीनमुर्व्यांभगवंतमाद्यंसं
कर्षणंदेवमकुंठसत्वं विवित्सवस्तत्वमतःपरस्यकुमारमुख्यामुनयोन्वपृछन् ३
नहेतुः प्रतिक्षणंनूतनयसीनवीनंकरोषि १ अल्पसुखायमहद्दुःखंप्राप्तानां तस्यदुःखस्यविरमायप्रवर्त्तयेप्रार
भे २ कोसौभगवान् केभ्यश्चऋषिभ्यआह कथंचत्वयाप्राप्तमित्यपेक्षायामाह आसीनमितित्रिभिः ३
उर्व्यांपातालतले अकुंठसत्वं अप्रतिहतज्ञानम् अतःसंकर्षणात्परस्य श्रीवासुदेवस्य ३

स्वयाचिच्छक्त्यासहवर्तमानः स्वयोगनिद्रयास्वपन् पूर्वमेव प्रबोधनार्थं नियुक्तया स्वकालशक्त्या आसादितं प्रापितं कर्म
तंत्रं क्रियाकलापो यस्य सः अपितान् लीनान् ददर्श ९ लोकसृष्ट्यर्थं अर्थे सूक्ष्मे अभिनिविष्टा दृष्टिर्यस्य कालानुसारि
णा रजोगुणेन विद्धः संक्षोभितः सन् तनीयानिति सूक्ष्मोर्थः सूष्यन् प्रसोष्यन् उद्भविष्यन् नाभिदेशादुद्भूत इत्यर्थः १०॥
सतनीयानित्यर्थः पद्मकोशः सन् उदतिष्ठत् कर्माणि जीवादृष्टानि प्रतिबोधयतीति यः कालस्तेन आत्मा श्रीविष्णुर्योनि

चतुर्युगानां च सहस्रमप्सु स्वपन् स्वयोदीरितया स्वशक्त्या कालाख्ययासादितकर्मतंत्रो लोकानपीतान्दद
दृशे स्वदेहे ९ तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरंतर्गतोर्थो रजसा तनीयान् गुणेन कालानुगतेन वि
द्धः सूष्यंस्तदाभिद्यत नाभिदेशात् १० स पद्मकोशः सहसोदतिष्ठत्कालेन कर्मप्रतिबोधनेन स्व
रोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः ११ तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्व
गुणावभासं तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं स्म वदंति सोभूत् १२

र्यस्य सः ११ ततः लोकात्मकं पद्मं सर्वान् गुणान् जीवभोग्यानर्थान् अवभासयतीति तथा यस्मात्ज्ञातं स एव विष्णुः
उद्गतिसंबोधने प्रावीविशत् प्रकर्षेण तत्तु तच्छक्तिरेवांतर्यामितया विशेषतः तस्मिन् विष्णुना अधिष्ठिते पद्मे विधाता ब्रह्मा
अभूत् कथंभूतः स्वयमेव वेदमयः न त्वध्ययनेन प्राप्तवेदः कोसौ अदृष्टपितृकत्वेन स्वयंभुवं वदंति सः प्राक्क
ल्पांते नारायणेन सह निद्रयैकीभूतः आसीत् तस्मिन् प्रबुद्धे ततएव पाद्मे कल्पे पद्मद्वारेणाभिव्यक्तिं प्राप्त इत्यर्थः १२

पारमहंस्ये धर्मे मुख्यः विवक्ष्यमाण इत्यात्मनेपदं ब्रुवादेशस्य वचेरुभयपदित्वात् अन्विताय अनुगताय ५ पुल
स्त्येन उक्त इत्यत्रैवमाख्यायिका पितरं राक्षसभक्षितं श्रुत्वा पराशरो राक्षससत्रे प्रवृत्तो वसिष्ठवचनान्निवृत्तस्ततः पुलस्त्येन
स्वसंततिरक्षणात्तुष्टेन वरो दत्तः पुराणप्रवक्ता भविष्यतीति ६ तदेव संकर्षणात्संप्रदायप्रवृत्तिं प्रदर्श्य विभूतिकथनायप्रे

सांख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः जगाद सोस्मद्गुरवेन्विताय पराशरा
याथ बृहस्पतेश्च ५ प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यं सोहं तवैतत्कथ
यामि वत्स श्रद्धालवे नित्यमनुव्रताय ६ उदाप्लुतं विश्वमिदं यदासीत् यन्निद्रयामीलितदृङ्न्यमी
लयत् अहीन्द्रतल्पेधिशयान एकः कृतक्षणः स्वात्मरतौ निरीहः ७ सोन्तःशरीरेर्पितभूतसूक्ष्मः
कालात्मिकां शक्तिमुदीरयाणः उवास तस्मिन्सलिले पदे स्वे यथानलो दारुणि रुद्धवीर्यः ८

एवं वक्तुमाह उदाप्लुतं एकार्णवोदके निमग्नं यत्तु यदासीत् तदा अमीलितदृक् अतिरोहितचिच्छक्तिरेव श्री
मन्नारायणो नेत्रे निमीलितवानित्यर्थः मायाविनोदं परित्यज्य स्वात्मरतौ स्वरूपानंद एव कृतोत्सवः अतएव नि
रीहः निष्क्रियः सन् ७ कालशक्तेः प्रेरणं पुनः सृष्ट्यवसरे प्रबोधनार्थं स्वे पदे अधिष्ठाने वह्निर्यथाभावे दृष्टांतः य

आत्मवर्गं स्वकार्यं त्रिनेमिः कालः अजस्य विष्णोर्हेतिः सुदर्शनरूपं चक्रं शस्त्रं देहभाजां नराणां भयमुत्पादयन्निति संवत्सरप्र
तमतिक्रांतमित्युक्तं भवति १६ अनंतसुखतया नुभगवंतं दृष्टवानित्याह द्वाभ्यां ततः अन्वेषणान्निवृत्तः न प्रतिलब्धः कामो
मनोरथो येन स्वधिष्ण्यं पद्मं जितेन श्वासेन निवृत्तं संयतं चित्तं यस्य अत एव आरूढः आश्रितः समाधियोगो येन तथाभूतः स
न्न्यषीदत् उपविवेश १७ पुरुषायुषा संवत्सरशतेन कालेन अभिप्रवृत्तः सुनिष्पन्नो योगस्तेन विरूढ उत्पन्नो बोधो

तमस्य पारे विदुरात्मसर्गं विचिन्वतोऽभूत्सुमहांस्त्रिनेमिः योऽदेहभाजां भयमीरयाणः परिक्षिणो
त्यायुरजस्य हेतिः १६ ततो निवृत्तोऽप्रतिलब्धकामः स्वधिष्ण्यमासाद्य पुनः स देवः शनैर्जितश्वा
सनिवृत्तचित्तो न्यषीददारूढसमाधियोगः १७ कालेन सोऽजः पुरुषायुषाभिःप्रवृत्तयोगेन विरू
ढबोधः स्वयं तदंतर्हृदयेवभातमपश्यतापश्यत यन्न पूर्वं १८ मृणालगौरायतशेषभोगप
र्यंक एवं पुरुषं शयानं फणातपत्रायुतमूर्धरत्नद्युभिर्हतध्वांतयुगांततोये १

यस्य तत्सर्वं विचिन्वन्नपि नापश्यत् ततः स्वयमेवांतर्हृदयेवभातमपश्यत् १८ यदपश्यत्तद्वर्णयति मृणालेति
नवभिः न वस्त्वप्यपश्यदित्यस्यैवानुषंगः मृणालवद्गौरः आयामो विशालश्चापततयितं तस्य यः शेषस्तस्य भोगो देहः स एव पर्यं
कस्तस्मिन्नेकं तत्रास्थिते पर्यंके फणातपत्रैरयुताः सर्वेंतो युक्ता ये मूर्धानस्तेषां रत्नानि किरीटस्थानानि तेषां द्युभिः
प्रभाभिः हतः ध्वांतयुगांततोये १ ॥ ऽऽ रामरामराम ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ॥ ३२

भा०द० स्वाभिलषितफलायविविक्तैः शुद्धैर्वेदोक्तैर्मार्गैरभ्यर्च्चितां पुंसां कामदुघमंघ्रिपद्मं प्रदर्शयंतं किंचिदुन्नमय्य समर्पयंतं ९
३४ नखाएव इंदवस्तेषां मयूखाएव रश्मयस्तैर्भिन्नाः संभिन्ना अंगुलयएव चारुणि पत्राणि यस्य तत् ४ लोकार्त्तिहरं स्मितं यस्मि
न्तेन परिस्फुरद्भ्यां कुंडलाभ्यां मंडितेन अधरबिंबदीप्त्या शोणवदाचरितेन शोभननासायुक्तेन सुभ्रा शोभनया भ्रुवा

पुंसां स्वकामाय विविक्तमार्गैरभ्यर्च्चितां कामदुघांघ्रिपद्मं प्रदर्शयंतं कृपया नखेंदुमयूखभिन्नांगुलिचारुपत्रं ५ मुखेन लोकार्त्तिहरस्मितेन परिस्फुरत्कुंडलमंडितेन शोणायितेनाधरबिंबभासा प्रत्यर्हयंतं सुनसेन सुभ्रा ६ कदंबकिंजल्कपिशंगवाससा स्वलंकृतं मेखलया नितंबे हारेण चानंतधनेन वत्स श्रीवत्सवक्षःस्थलवल्लभेन ७

च प्रत्यर्हयंतं पूजकान्पूजयंतं मानयंतं कदंबकिंजल्कवत् पिशंगं यद्वासस्तेन मेखलया च नितंबे स्व
लंकृतं हे वत्स श्रीवत्सयुक्तम् यद्वक्षःस्थलं तस्य वल्लभेन वक्षस्यनर्घ्येण हारेण स्वलंकृतमित्यर्थः

३६

कथंभूतं पुरुषं हरितोपलाद्रेर्मर्कतशिलामयपर्वतस्य प्रेह्वांदिपितं स्वलावण्यातिशयेन तिरस्कुर्वंतं संध्याभ्रं नीवीप
रिधानं यस्य तस्य प्रभां आपीतांबरेणदीपितं उरू रुक्तमूर्द्धः अनेकवर्णशिखरस्य स्वकिरीटैः रत्नानि च उदधारश्च ओ
षधयश्च सौमनस्यानि च पुष्पसमूहाः सुमनसस्तरवस्तेषां वनस्रजो वनमाला यस्य वेणवश्च भुजा यस्य अंघ्रिपाद
वांघ्रिपो यस्य स चासौ स च तस्य अयमर्थः यदि तस्मिन्काले अवस्थिता रत्नादयो भवंति वेणवश्च भुजा इव वृक्षाश्चपा
दा इव तर्हि तस्य शोभां स्वीय रत्न मुक्ता तुलसीदाम पुष्पदामभिः भुजैरंघ्रिभिश्च द्विपितमिति २ किंच आयामतो दैर्घ्ये

प्रेह्वांदिपितं तं हरितोपलाद्रेः संध्याभ्रनीवेरुरुरुक्ममूर्द्धः रत्नोदधारौषधिसौमनस्य वन्यस्रजो वे
णुभुजांघ्रिपांघ्रेः २ आयामतो विस्तरतो स्वमानदेहेन लोकत्रयसंग्रहेण विचित्रदिव्याभरणां
शुकानां कृतश्रिया पाश्रितवेषदेहम् ३ आविस्तरतश्च स्वमानदेहेन मीयते अनेनेति मानमुपमा शोभनश्चा
साव मानी निरूपमो देहस्तेन यद्वा स्वगुरुआमानः अपरिछिन्नस्तेन यद्वा ताभ्यां स्वानुरूपप्रमाणेन अतएव लोकत्रयं
संगृह्यते यस्मिन् तथा विचित्राणि नानाविधानि दिव्यान्यपूर्वाणि चाभरणान्यंशुकानि तेषां कृता श्रीः शोभा येन देहेन वि
शिष्टं एवंस्वतएव अतिरम्यत्वेपि अपाश्रितवेषः स्वीकृतालंकारो देहो यस्य तमपश्यत यद्वा केन प्रेह्वांदिपितं इत्यपेक्षा

कथंभूतं देहं नेति संबंधः ३९

भा०टी किंच वनमालया निवीतं कंठलग्नं विन्यास्य व्याप्तं आम्नाया वेदा एव मधुव्रतास्तैः श्रीर्यस्यास्तया हरिमिति पर्वतादित्युपप
३५ श्यत् हरिरसाविति ज्ञातवानित्यर्थः सूर्यादिभिरगम्यं आगम्यं स्वव्यापारैराकलयितुमशक्यमित्यर्थः किंच त्रिष्वपि लो
केषु धाम स्फूर्तिर्येषां तैः रक्षणार्थं परिक्रमद्भिः परितो धावद्भिः प्राधनिकैः प्रधनं संग्रामस्तत्र योजनैः सुदर्शनादि

निवीतमाम्नायमधुव्रतश्रिया स्वकीर्तिमय्या वनमालया हरिं सूर्येन्दुवाय्वग्न्यगमं त्रिधाम
भिः परिक्रमत्प्राधनिकैर्दुरासदं २८ तर्ह्येव तन्नाभिसरःसरोजमात्मानमंभः श्वसनं विय
च्च ददर्श देवो जगतो विधाता नातः परं लोकविसर्गदृष्टिः २९ स कर्मबीजं रजसोपरक्तः प्र
जाः सिसृक्षन्नियदेव दृष्ट्वा अस्तौद्विसर्गाभिमुखस्तमीड्यमव्यक्तवर्त्मन्यभिवेशितात्मा
३० इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरमैत्रेयसंवादे भगवद्दर्शनं नामाष्टमोध्यायः ८

भिर्दैत्यैः तैर्दुरासदं दुष्प्रापं २८ यदैव हरिमपश्यत् तर्ह्येव तद्देवलोकविसर्गदृष्टिः सन् तस्य नाभिः सरसि सरो
जे अंभः सन् प्रलयवायुं वियत् आकाशं च ददर्श २९ कर्मबीजं लोकसृष्टेः कारणं तु परक्तः रजोगुणयुक्तः अतः प्रजाः
सिसृक्षुः सिसृक्षन्नियदेव नाभिसरोजादिपंचकमेव विसर्गेपि त्वाभिमुखः वृत्तचित्तः अव्यक्तवर्त्मनि भगवति निवेशितचि

टी० ॥ ८ ॥ इति तृतीये ८ सं० ८ ॥

महाचंदनवृक्षरूपकेणनिरूपयितुंतंविशिनष्टि परार्ध्यानिश्रेष्ठानिकेयूराण्यंगदानिमणिप्रवेकाश्चम
णयुत्तमाः तैःपर्यस्ताव्याप्तादोर्दंडाएवसहस्रंअनंताशाखायस्य चंदनवृक्षोपिकेयूरादितुल्यैःफलपुष्पादिभिः
व्याप्तशाखोभवति अव्यक्तंप्रधानंमूलमधोभागोयस्य यद्वा अव्यक्तंब्रह्ममूलंयस्य ब्रह्माभिव्यक्तिरूपत्वात
वृक्षस्यापिमूलंनव्यक्तं भुवनात्मकंमंघ्रिपेंद्रं अहींद्रस्यानंतस्यभोगैःफणैर्देहावयवैर्वा अधिवीताःसंवे

परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्रशाखं अव्यक्तमूलंभुवनांघ्रिपेंद्रम
हींद्रभोगैरधिवीतवल्शं ॐ चराचरौकोभगवन्महीध्रमहिंद्रबंधुसलिलोपगूढं कि
रीटसाहस्रहिरण्यशृंगमाविर्भवत्कौस्तुभरत्नगर्भम् ॐ

ष्टिताः सूक्ष्मावल्शाः स्कंधायस्यवनस्पतेः शाखावल्शा
विरोहिणीतिश्रुतेः सोपिसर्पैर्वेष्टितोभवति ॐ श्रेत्वाचिपतमित्यत्रैवपर्वतरूपेणनिरूपयितुमपिविशेषणांतरैःपुनर्निरूपयति
भगवानेवमहीध्रस्तं चराचराणामोकःस्थानंसोपितथा अहींद्रस्यबंधुःसोप्यहिंद्राणांबंधुःसलिलेनउपगूढमावृतंपर्व
तोमैनाकादिस्तथा किरीटसाहस्रमेवहिरण्यशृंगाणियस्यसोपिमेर्वादिस्तथा पर्वतस्यगर्भेक्वचिद्रत्नमाविर्भवतितथा
आविर्भवत्स्पष्टंदृश्यमानंकौस्तुभरत्नंगर्भेमध्येयस्यतम् ॐ

भा०टी०
३६

नन्वेवमपिसोपाधिकमेतदर्वाचीनमेवेत्याशंक्याह तद्वैतदेवेदं हेभुवनमंगल यतस्तत्त्वयानोऽस्माकमुपासकानांमंगलायध्याने
दर्शितं नह्यव्यक्तचर्माभिनिवेशितचित्तानामस्माकंत्वयासोपाधिकदर्शनमितिभावः अतस्तुभ्यंनमोऽनुविधेम अनुवृत्त्या
करवाम ननुहिकिमितिकेचिन्मांनाद्रियंतेतत्राह योनादृत इति असत्प्रसंगैर्निरीश्वरकुतर्कनिष्ठैः ३ आदरेणतुत्वांभ
जन्तःकृतार्था इत्याह येत्विति श्रुतिर्वेदः स एव वातः तेननीतंप्रापितं नापेक्षिनापयासि येत्वत्कथाश्रवणमत्यादरेण

तद्वाइदंभुवनमंगलमंगलायध्यानेस्मनोदर्शितंतउपासकानां तस्मैनमोभगवतेनुविधेम
तुभ्यंयोनादृतोनरकभाग्भिरसत्प्रसंगैः ३ येतुत्वदीयचरणाम्बुजकोशगंधंजिघ्रंतिकर्णवि
पु३ वरैःश्रुतिवातनीतं भक्त्यागृहीतचरणःपरयाचतेषांनापैषिनाथहृदयांबुरुहात्स्वपुंसां ४ ताव
द्भयंद्रविणगेहसुहृन्निमित्तंशोकःस्पृहापरिभवोविपुलश्चलोभः तावन्ममेत्यदवग्रह आर्ति
मूलंयावन्नतेंघ्रिमभयंप्रवृणीतलोकः ५ स२

कुर्वंतितेषांहृदिनित्यंप्रकाशस इत्यर्थः ४ ततःकिमतआह तावदिति द्रविणादौविद्यमाने भयं गते शोकः पु
नश्चस्पृहाः ततःपरिभवः तथापिविपुलोलोभः तस्मात्पुनःकथंचित्प्राप्तेममेत्यसदाग्रहः आर्तिमूलं
नयच्छोकादेःकारणं नप्रवृणीतनाश्रयेत त्वत्पादाश्रयणमात्रेणभयादिनिवृत्तिः किंपुनः त्वत्प

श्रीधरीभागवतः ५
३६

नवमेतपसातुष्टं दृष्ट्वानारायणंत्वजः अस्तौद्देकार्णवेसीदन्लोकसर्गचिकीर्षया भगवतःज्ञानेनात्मनःकृतार्थतामाविष्कुर्वन्स्तौश्रयोच
यत्राह ज्ञातोसीति सुचिरात् दृष्टःकालोपासनेन अद्यमेमयाज्ञातोसि ननुअहोदेहभाजांयत्तदेवधदोषः किंतत् यद्भगवतस्तत्व
तिं तत्वेनज्ञायतइति यतस्त्वमेवज्ञातुंयोग्यःसत्यत्वात् नान्यत् असत्यत्वादित्याह त्वत्तोन्यन्नास्तियदप्यस्तीतिप्रतिभातितदपिशु
द्धंसत्वंनभवतिकथमसत्प्रतीतिस्तत्राह यद्यतःमायागुणक्षोभात् त्वमेवउरुवहुरूपोविभासि १ ननुत्वमपिसम्यक्नजानासि यत्त्वयाह
ष्टंरूपमेतदपिगुणात्मकमेवनिर्गुणंब्रह्मैववस्तुसत्यंतत्राहरूपमितिद्वाभ्यां अवबोधरसोदयेनचिच्छक्त्याविभीषेनशश्वन्निवृत्ततमो

ब्रह्मोवाच ज्ञातोसिमेद्यसुचिरान्ननुदेहभाजांनज्ञायतेभगवतोगतिरित्यवद्यं नान्यंत्वदस्तिभगवन्नपितन्नशुद्धंमा
यागुणव्यतिकराद्यदुरुर्विभासि १ रूपंयदेतदवबोधरसोदयेनशश्वन्निवृत्ततमसःसदनुग्रहाय आदौगृहीतमव
तारशतैकवीजंयन्नाभिपद्मभवनादहमाविरासीत् नातःपरंपरमयद्भवतःस्वरूपमानंदमात्रमविकल्पमविद्ध
वर्चः पश्यामिविश्वसृजमेकमविश्वमात्मन्भूतेंद्रियात्मकमदस्तउपाश्रितोस्मि २

यस्मात् तस्यतवपदेतद्रूपंत्वयैवस्वातंत्र्येणसतामुपासकानामनुग्रहाय गृहीतमाविष्कृतं अवतारस्यशतस्यशुद्धसत्वात्मकपद्मैकंवी
जम्मूलं तत्प्रदर्शनाद्यगुणावतारवीजत्वंदर्शयतियन्नाभीतिहेपरम अविद्धवर्चः अनावृतप्रकाशं अतःअविकल्पंनिर्भेदं अतएवानंदमा
त्रं एवंभूतंयद्भवतःस्वरूपंततः अतोरूपात्परंभिन्नंनपश्यामि किंतुइदमेवतत् अतःकारणात्तेनवअदःइदंरूपंउपाश्रितोस्मियोग्यत्वाद
पीत्याह एकमुपास्येषुमुख्यं यतःविश्वसृजं अतएवाविश्वंविश्वस्मादन्यत् किंच भूतेंद्रियात्मकं भूतानामिंद्रियाणांचात्मानंकारणमि
त्यर्थः २

भा० टी० ननु भवत्वेवमविवेकिनां विवेकिनस्तु मुक्ता एवेति किं तेषां भक्त्या कृत्यमत आह अह्नीति आपृतानि आवृ
३७ तानि व्यापृतानि च तान्यार्तानि क्लिष्टानि करणानींद्रियाणि येषां स्त्रीविषयसुखलेशं विना स्तियतो निःशया
नाः स्वप्नदर्शनेन च क्षणे क्षणे भग्ननिद्राः दैवेन हताः सर्वतः प्रतिहता अर्थरचना अर्थायोद्यमो येषाम् ९ त्वमेवम

अह्न्यापृतार्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभग्ननिद्राः दैवाहतार्थरचना
ऋषयोपि देव युष्मत्प्रसंगविमुखा इह संसरंति ९ त्वं भक्तियोगपरिभावितहृत्सरोज आस्से
श्रुतेक्षितपथो ननु नाथ पुंसां यद्यद्धिया त उरुगाय विभावयंति तत्तद्वपुः प्रणयसे सदनुग्रहा
य १० नातिप्रसीदति तथोपचितोपचारैराराधितः सुरगणैर्हृदिबद्धकामैः यत्सर्वभूतद
टी १ ययासदलभ्ययैको नानाजनेष्ववहितः सुहृदंतरात्मा ११

भक्तानां संसारनिवृत्तिमाह त्वमिति भक्तियोगेन शोधिते हृत्सरोजे आस्से तिष्ठसि श्रुतेन श्रवणेनेक्षितः पंथा यस्य
किंच श्रवणं विना च भक्ता मनसा यद्यत्तव वपुः रूपं स्वेच्छया ध्यायंति तत्तत्प्रणयसि प्रकटयसि सतां भक्तानामनुग्रहाय
१० भक्तानां च निष्कामानां त्वमतिसुलभो नेतरेषामित्याह नेति उपचितैरूर्जितैरुपचारैः पुष्पोपहारादिभिः यत्त्वया

श्रीमद्भागवतस्कंधे तृतीये टीका... ३७

येनिष्कामा अपि संतस्त्वां नाद्रियंते तेनरकभाज इत्युक्तं येतु त्वत्कथाश्रवणादिविमुखाः संतः काम्यकर्मपरास्ते
तिमंदा इत्याह दैवेनतेहतधियः नष्टमतयः प्रसंगात् श्रवणकीर्तनादिरूपात् सर्वदुःखनिवर्तकत्वात् विमुखा
नींद्रियाणि येषां अकुशलानि हेमकराणि ६ अकुशलत्वमेव दर्शयति क्षुत्तृट् च त्रिधातवश्च वातपित्तश्लेष्मा

दैवेनतेहतधियो भवतः प्रसंगात्सर्वाशुभोपशमनाद्विमुखेंद्रियाये कुर्वंतिकामसुखलेशल
वायदीनालोभाभिभूतमनसोकुशलानिशश्वत् ६ क्षुत्तृट्त्रिधातुभिरिमामुहुरर्द्यमानाः
शीतोष्णवातवर्षैरितरेतराच्च कामाग्निनाच्युतरुषाचसुदुर्भरेणसंपश्यतोमनउरुक्रमसी
दतेमे ७ यावत्पृथक्त्वमिदमात्मनइंद्रियार्थमायाबलंभगवतोजनईशपश्येत् तावन्नसंसृति
रसौप्रतिसंक्रमेत व्यर्थापिदुःखनिवहंवहतीक्रियार्था: ८

णस्तैः इमाः प्रजाः सुदुर्भरेण सुदुःसहेन कामाग्निना अच्युत पा रुषा अविछिन्न क्रोधेन च पीड्यमानां संपश्यतो मे मनः सी
दति ७ नन्वेवंभूतायाः संसृतेरपरमार्थत्वात् किमर्थं विषादः क्रियते तत्राह यावदिति आत्मन इदं पृथक्त्वं देहा
दिभावं भगवतस्तव इंद्रियार्थरूपाया मायाया तया बलमाधिक्यं येस्य तत् तन प्रतिसंक्रमेत नोपरमेत दुःखसमूहं प्रापयंती

त

भा० ८० तत्र गुणावतारकर्माण्यपि दर्शयन्प्रणमति योवैएकः त्रिपात् त्रयो ब्रह्मादयः पादाः स्कंधा यस्य प्रत्येकं च बहुरवः
३८ प्ररोहाः शाखोपशाखमरीच्यादिमन्वादिरूपा यस्य तथाभूतः सन् ववृधे तस्मै भुवनाकाराय द्रुमाय नमः किं कृत्वा
ववृधे आत्मा स्वयमेव मूलमधिष्ठानं यस्य तत्प्रधानं भित्वा गुणत्रयरूपेण विभज्य त्रिपात्त्वमेवाह अहं ब्रह्मा गि
रिशश्च स्वयं विभुर्विष्णुश्चेति स्थित्युद्भवप्रलयहेतवो वयं एवं त्रिपाद्रूपत्वाद्यो ववृध इत्यर्थः १५ एवं गुणावतारक

योवा अहंच गिरिशश्च विभुः स्वयंच स्थित्युद्भवप्रलयहेतव आत्ममूलं भित्वा त्रिपाद्ववृध एक
उरुप्ररोहस्तस्मै नमो भगवते भुवनद्रुमाय १५ लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं
त्वदुदिते भवदर्चने स्वे यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोस्तु तस्मै
१६

र्मविडंबनमुक्त्वा तस्यैव कालाख्यं रूपं तत्कर्म च दर्शयन्प्रणमति लोक इति द्वाभ्यां विकर्मनिरतः विरुद्धकर्मनिष्ठः
कुशले हिते स्वे आत्मीये त्वदुदिते त्वयैव साक्षादुक्ते भवदर्चनरूपे कर्मणि उक्तं हि गीतासु यत्करोषि यदश्नासि
यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति तस्मिन्प्रमत्तः अदत्तचित्तो यावद्वर्तते
तावदस्य लोकस्य अनिमिषाय कालाय १६ ३८

यतः सकामानां भवानाति प्रसीदति अतः कामप्राप्तिः क्रियाणामुत्तमं फलं भवति किं तत्त्वत्त एतमेव कामसंयोगास्तु अर्वांतर
फलेन प्ररोचनार्थमित्याह पुंसामिति भगवतस्तवाराधनमेव संसारोसौ क्रियार्थीश्वर्गे ष्टं क्रियाफलं श्रेष्ठते हेतुः यत्र त्वयार्चि
तो धर्मो न कदाचित् क्रियते नेन नश्यति कामार्थस्तु धर्मः कामं दत्वा नश्यतीत्यर्थः १२ अतस्त्वां वयं नताः इत्याह शश्वदिति शश्व
त्सर्वदा स्वरूपचैतन्येनैव निरस्ता भेदभ्रमाय पुनश्च बोधस्य धिषणा विद्याशक्तिर्यस्य यद्वा धिषणमाश्रयः अत एव परस्मै

पुंसामतो विविधकर्मभिरध्वराद्यैर्दानेन चोग्रतपसा व्रतचर्यया च आराधनं भगवतस्तव सत्क्रियार्थो
धर्मोर्पितः कर्हिचित् क्रियते न यत्र १२ शश्वत्स्वरूपमहसैव निपीतभेदमोहाय बोधधिषणाय नमः पर
स्मै विश्वोद्भवस्थितिलयेषु निमित्तलीलारसाय ते नम इदं चकृमेश्वराय १३ यस्यावतारगुणकर्मविडंब
नानि नामानि येऽसुविगमे विवशा गृणंति ते नैकजन्मशमलं सहसैव हित्वा संयांत्यपावृतमृतं तमजं प्र

अत्र हेतुः विश्वोद्भवादिनिमित्तं या माया तस्या लीला विलासः तया रासः क्रीडा यस्य तेन तुभ्यं इदं नमः नमनं चकृ पद्ये १४
म कृतवंतो वयं १३ नामग्रहणमात्रतः कैवल्यप्रदत्वेनैवैश्वर्यं व्यंजयन्नमस्करोति यस्येति अवतारादीनां विडंबनमनुकरण
वतार मस्ति येषु अविडंबनानि देवकीनंदन इत्यादि गुणविडंबनानि सर्वतो भक्तवत्सल इत्यादीनि कर्मविडंबनानि गोवर्ध
नोद्धरणकंसारि इत्यादीनि असुविगमेपि विवशोपि गृणंति उच्चारयंति केवलं शमलं पापं अपावृतं निरस्तावरणं अ

श्र

भं.स्कं.षष्ठ.टी. ४१

इदानीं दृश्यमानामेव मूर्तिं प्रणमति यो विद्ययेति द्वाभ्यां दशार्द्धाः पंच वृत्तयो यस्याः तया अविद्यया निद्राहेतुभूतया अन
भिभूतोपि यः निद्रामुवाह तस्मै नम इत्युत्तरेणान्वयः जठरीकृता उदरे प्रापिता लोकस्थितिर्येन अहिरेव कशिपुः शय्या तस्याः
स्पर्शोनुकूलो यस्यां तां निद्रां भीमा नामूर्मीणां माला विद्यंते यस्मिन् अंतर्जले निद्रा एतस्या विवेकिनो जनस्य निद्रासुखमीदृ
गिति विवृण्वन् दर्शयन् अनुपहत इत्यन्वयः अत एवांतर्जलादि विशेषणानि यद्वा एवं कल्पे श्रांतस्य विश्राम सुखं विवृण्वन्
स्फोरयन् तदा तु परोपकाराय स्वयं दुःसहमपि दुःखं सोढव्यमिति द्योतनार्थं विशेषणानि १९ किंच यस्य नाभिपद्ममेव भवनं

यो विद्ययानुपहतोपि दशार्द्धवृत्या निद्रामुवाह जठरीकृतलोकयात्रः अंतर्जले हिकशिपुस्पर्शानुकूलां भीमो
र्मिमालिनि जनस्य सुखं विवृण्वन् १९ यन्नाभिपद्मभवनादहमास मीड्य लोकत्रयोपकरणो यदनुग्रहेण
तस्मै नमस्त उदरस्थभवाय योगनिद्रावसानविकसन्नलिनेक्षणाय २० सोयं समस्तजगतां सुहृदेक आत्मा
सत्वेन यन्मृडयते भगवान्भगेन तेनैव मे दृशमनुस्पृशताद्यथाहं स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोसौ २१

तस्मात् लोकत्रयमुपकरणं यस्य यद्वा लोकत्रयस्य स्रष्टृत्वादिद्वारेणोपकरोतीति तथा ईदृशोहं यदनुग्रहेण तस्मै उदरे स्थितः भ
वः संसारः प्रपंचो यस्य योगनिद्रावसाने विकसन्नलिनवदीक्षणं यस्य २० एवं स्तुत्वा प्रार्थयते सोयमिति चतुर्भिः यत् येन
सत्वेन ज्ञानेन भगेनैश्वर्येण च मृडयति सुखयति विश्वं दृशं प्रज्ञां अनुस्पृशतात् योजयतु यथाहं स्रष्टुं क्षमो भविष्यामि
यतः प्रणतप्रियोसौ अहं च प्रणतः न चान्यः प्रार्थनीयोस्ति यतः स एव समस्तजगतां सुहृत् यतोसौ एकोनुस्मृत आ ३९

आस्तां तावल्लोकस्य कथा यस्मात्कालाख्यात्त्वत्तः यत् द्विपरार्द्धावस्थायि धिष्ण्यं स्थानं तदारूढोपि बिभेमि भीतश्च सन् त्वा-
मेवावरुरुत्समानः प्राप्तुमिच्छन् तपस्तप्तवान् कथंभूतः बहुसवः बहवः सवाः यागाः संवत्सरावयवा यस्य बहून् यागान् कृत्वा व-
हून् संवत्सरान् वा तपस्तप्तवानित्यर्थः अधिमखाय मखादिकर्माधिष्ठात्रे १७ तदानीं तत्तत्कालभाविलीलावता-

॥ यस्माद्बिभेम्यहमपि द्विपरार्द्धधिष्ण्यमध्यासितः सकललोकनमस्कृतं यत्
तेपे तपो बहुसवोवरुरुत्समानस्तस्मै नमो भगवतेधिमखाय तुभ्यं १७ तिर्यङ्म-
नुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयात्मकृतसेतुपरीप्सया यः रेमे निरस्तवि-
षयोप्यवरुद्धदेहस्तस्मै नमो भगवते पुरुषोत्तमाय १८

र कर्माणि दर्शयन्नाह तिर्यगादिषु जीवयोनिषु स्वेच्छयास्वीकृतमूर्तिः सन् स्वकृतधर्ममर्यादापालनेच्छया रेमे वस्तु-
तः स्वानंदानुभवेनैव निरस्तविषयसुखोपि यः अत एव पुरुषोत्तमः तदुपाधिधर्मासंस्पर्शात् तदुक्तं गीता-
सु यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः १८ ॥ ६६

भा० टी०
८०

हे वेदगर्भ तंद्रीं विषादकृतमालस्यं मागाः तेनैव मे दृशमनुस्पृशतादित्यादि यत्प्रार्थयते तदग्रे एवमेव संपादितं २७ ततो हि क
थमहं न जानामीत्यत आह भूय इति २८ भक्तियुक्तः समाहितश्च सन् आत्मनि स्वस्मिन् लोके च मां ततं व्याप्य स्थितं द्रष्टा द्र
क्ष्यसि आत्मनो जीवांश्च २९ सर्वत्र मद्दर्शनेन मोहो निवर्तत इत्याह यदा त्विति प्रतिचक्षीत पश्येत् ३० यदा च मिथ्याज्ञाननि

श्रीभगवानुवाच ॥ मा वेदगर्भ गास्तंद्रीं सर्ग उद्यममावह तन्मयापादितं ह्यग्रे यन्मां प्रार्थयते भवान् २७
भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयां ताभ्यामंतर्हृदि ब्रह्मन् लोकान्द्रक्ष्यस्यपावृतान् २८ तत आ
त्मनि लोके च भक्तियुक्तः समाहितः द्रष्टासि मां ततं ब्रह्मन् मयि लोकांस्त्वमात्मनः २९ यदा तु सर्वभू
तेषु दारुष्वग्निमिव स्थितं प्रतिचक्षीत मां लोको जह्यात्तर्ह्येव कश्मलं ३० यदा रहितमात्मानं भूतेंद्रि
यगुणाशयैः स्वरूपेण मयोपेतं पश्यन्स्वाराज्यमृच्छति. ३१ नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः
नात्मावसीदत्यस्मिंस्ते वर्षीयान्मदनुग्रहः ३२ ऋषिमाद्यं न बध्नाति पापीयांस्त्वां रजोगुणः यन्मनो मयि नि
बद्धं प्रजाः संसृजतोपि ते ३३

वृत्तेर्मुच्यत इत्याह यदेति भूतादिभिर्विरहितमात्मानं जीवं
शुद्धं पदार्थं स्वरूपेण स्वस्यात्मभूतेन मया तत्पदार्थेनोपेतमेकीभूतं पश्यन् भवति यदा स्वाराज्यं मोक्षं प्राप्नो
ति ३१ यतः वर्षीयान् वृद्धतरः अत्यधिकोस्तीत्यर्थः ३२ अनुग्रहमेवाह ऋषिमिति चतुर्भिः यद्यंते मनो मयि नि

२

भा० तृ० ३
८०

आत्मशक्त्या रमया सह यद्यत्कर्म करिष्यति स्वविक्रमं विश्मोरेव विक्रमः प्रभावो यस्मिन् तदिदं विश्वं त्वदाज्ञया सृजतोपि मे चि
त्तं स एव युंजीत प्रवर्त्तयतु कर्मशक्तिं तत्कृतं शमलं वैषम्यादिपापं यया विजह्यां त्यक्ष्यामि २२ अंभसि सतो यस्य नाभिहृदा
द्विहासं विज्ञानेश शक्तिर्यस्य महत्तत्वात्मकस्य चित्तस्य तदभिमानी अस्य रूपमिदं विश्वं विस्तारयतो मे निगमस्यावयवभूतानां गि
रां विसर्गं उच्चारणं मा रीरिषीष्ट हंता तं ब्रह्मवर्चसमिति न्यायेन मा लुप्यतामित्यर्थः २३ विवृद्धप्रेमगर्भस्मितेन विजृंभयन् वि

एष प्रपन्नवरदो रमयात्मशक्त्या यद्यत्करिष्यति गृहीतगुणावतारः तस्मिन्स्वविक्रममिदं सृजतोपि चे
द्वा २ तो युंजीत कर्मशमलं च यथा विजह्यां २२ नाभिह्रदादिह सतोंभसि यस्य पुंसो विज्ञानशक्तिरहमासमनंतश न २
क्तेः रूपं विचित्रमिदमस्य विवृण्वतो मे मा रीरिषीष्ट निगमस्य गिरां विसर्गः २३ सोसावदभ्रकरुणो भगवान्
विवृद्धप्रेमस्मितेन नयनांबुरुहं विजृंभन् उत्थाय विश्वविजयाय च नो विषादं माध्व्या गिरापनयतात्पुरुषः पुरा
णः २४ ॥ श्रीमैत्रेय उवाच ॥ स्वसंभवं निशाम्यैवं तपोविद्यासमाधिभिः यावन्मनोवचः स्तुत्वा विरराम स खिन्न
वत् २५ अथाभिप्रेतमन्वीक्ष्य ब्रह्मणो मधुसूदनः विषण्णचेतसं तेन कल्पव्यतिकरांभसा लोकसंस्थान
वि १ विज्ञान आत्मनः परिखिद्यतः तमाहागाधया वाचा कश्मलं शमयन्निव २६

श्वस्य विजयाय उद्भवाय चकारादस्मद
नुग्रहाय उत्थाय २४ स्वस्य संभवो यस्मात्तं तपः शारीरं विद्या उपासना समाधिश्चित्तैकाग्र्यं तैर्निशाम्य दृष्ट्वा यथाशक्ति स्तु
त्वा श्रांतवद्विरराम २५ आत्मनो लोकसंस्थानविज्ञाने परिखिद्यतो ब्रह्मणोभिप्रेतमारभ्य तमाहेति द्वयोरन्वयः तेन प्र
लयोदकेन विषण्णचेतसः कश्मलं मोहं इवेति समस्तमोहापशमनं दर्शयति २६ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ श्र

भा० तृ०
४१

अत्र हेतुमाह अहमिति आत्मनां अहंकारोपाधीनां जीवानामात्मा अतः प्रेयसां अतिप्रियाणामपि मध्ये श्रेष्ठः प्रियतमः सन्निरवद्यः यत्कृमयि दृष्टे ४० अतस्त्वं कृतार्थ एव तथापि मत्प्रियार्थं सृष्टिं कुर्वित्याह सर्वेति आत्मा त्वं इदं त्रैलोक्यं या मय्यनुशेरते ताः प्रजाश्च सृज केन आत्मनैवान्यनिरपेक्षो तत्र ज्ञापकापेक्षाभावे माह सर्ववेदम

अहमात्मात्मनां धातः प्रेष्ठः सन्प्रेयसामपि अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः ४० सर्ववेदमयेनेदमात्मनात्मात्मयोनिना प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते ४१ ॥ श्रीमैत्रेय उवाच ॥ तस्मा एवं जगत्स्रष्टे प्रधानपुरुषेश्वरः व्यज्येदं स्वेन रूपेण कंजनाभस्तिरोदधे ॥ ४२ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरमैत्रेयसंवादे पद्मोद्भवब्रह्मस्तुतिर्नवमोध्यायः ॥ ९ ॥ ॥ विदुर उवाच ॥ अंतर्हिते भगवति ब्रह्मा लोकपितामहः प्रजाः ससर्ज कतिधा दैहिकीर्मानुषीर्विभुः १ ये च मे भगवन्पृष्टास्त्वय्यर्था बहुवित्तम तान्वदस्वानुपूर्व्येण छिंधि नः सर्वसंशयान् २

येनेति आत्मा आत्माऽहं योनिः कारणं यस्येति ज्ञानक्रियाशक्त्यतिशयं सूचयति यथापूर्वमिति तत्र चात्राभ्यासोऽप्यस्तीत्युक्तं मय्यनुशेरत इति स्थितानामभिव्यक्तिमात्रं कर्तव्यमित्यनायासत्वमुक्तं ४१ इदं स्रज्यं व्यंज्य प्रकाश्य पद्मनाभः स्वेन श्रीनारायणरूपेण तिरोदधेऽदृश्योऽभवत् ४२ इ त ये व ९ दशमे कालसंप्रश्नं प्रतिवक्तुं तदुद्भवः प्राकृतादिवि

४१ भागेन सर्गस्तु दशधोच्यते १ मे मया वद सर्वद भावय स्वेति वा २

यद्यस्मात्भूतेंद्रियैर्गुणैः सत्वादिभिरात्मनाहंकारेण च अयुक्तं मन्यसे ३४ तुभ्यं त्वन्नालेन मार्गेण पुष्करस्य मू
लमधिष्ठानं सलिले विचिन्वतो मयि विचिकित्सायां भवितव्यमस्याश्रयेण न च दृश्यते ततोऽहमेव नास्तीति संदेहे सति
आत्मा स्वरूपं मे मया अवहिरंतर्हृदि दर्शितः ३५ अंग हे ब्रह्मन् चकर्थ कृतवानसि मत्कथैवाभ्युदयस्तेनांकितं सए

ज्ञातोहं भगवता त्वद्य दुर्विज्ञेयोपि देहिनां यन्मां त्वं मन्यसेयुक्तं भूतेंद्रियगुणात्मभिः ३४
तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितोवहिः नालेन सलिले मूलं पुष्करस्य विचिन्वतः ३५
यच्चकर्थांग मत्स्तोत्रं मत्कथाभ्युदयांकितं यद्वा तपसि ते निष्ठा स एष मदनुग्रहः ३६ प्रीतोहमस्तु
भद्रं ते लोकानां विजयेच्छया यदस्तौषीर्गुणमयं निर्गुणं मानुवर्णयन् ३७ य एतेन पुमान्नित्यं स्तुत्वा
स्तोत्रेण मां भजेत् तस्याशु संप्रसीदेयं सर्वकामवरेश्वरः ३८ पूर्तेन तपसा यज्ञैर्दानैर्योगसमाधि
ना राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतम् ३९

एवंधाभावात्मपि मनोनिर्वंधं मद्रूपस्य हृदि दर्शनं मत्स्तुतिः तपोनिष्ठा चेति यत् स एष सर्वोपि मदनुग्रहः ३६ गुण
मयत्वेन प्रतीयमानमपि निर्गुणमेवानुवर्णयन् ३७ तव प्रीतत्व इति किं वक्तव्यमित्याह य इति ३८ न च मत्प्रीतेरप्यधि
कं किंचिदस्तीत्याह पूर्तादिभिः राद्धं सिद्धं यन्निःश्रेयसं फलं तन्मत्प्रीतिरेवेति तत्त्वविदां मतं ३९ ॥ ६१

भा० तृ० त्रिलोकीरूपे लोकविभागे हेतुमाह एतावानिति त्रिलोकीरूपः जीवलोकस्य जीवानां भोगस्थानस्य प्रत्यहं सृज्यस्य सं-
५२ स्थाभेदः स्थानविशेष उक्तः ननु परमेष्ठिनोऽपि जीवत्वाविशेषात् तल्लोकस्यापि किमिति प्रत्यहं सृष्टिर्न भवति
तत्राह हि यस्मात् अनिमित्तस्य निष्कामस्य धर्मस्य विपाकः फलरूपोऽसौ उपलक्षणमेतत् सत्यलोकस्य महः
प्रभृतिलोकानां तद्वासिनां च त्रैलोक्यस्य काम्यकर्मफलत्वात् प्रतिकल्पमुत्पत्तिविनाशौ भवतः महःप्रभृ-

एतावान् जीवलोकस्य संस्थाभेदः समाहृतः । धर्मस्य ह्यनि-
मित्तस्य विपाकः परमेष्ठ्यसौ ॥ ८ ॥ विदुर उवाच ॥ यदात्थ बहु-
रूपस्य हरेरद्भुतकर्मणः कालाख्यं लक्षणं ब्रह्मन् यथा वर्णय नः प्रभो ॥ ९ ॥

तीनां तूपासनसमुचितनिष्कामधर्मफलत्वात् द्विपरार्धपर्यन्तं न नाशः तत्रस्थानां च ततः परं
प्रायेण मुक्तिरिति भावः ८ कालभेदेन लोकसृष्टिभेदं श्रुत्वा तमेव कालं जिज्ञासुः पृच्छति यदिति कालाख्यं
लक्षणमात्थ अब्रवीः कथं कालः कल्प्यते किं वा तस्य सूक्ष्मं स्थूलं च रूपमिति यथा वर्णयेत्यर्थः ९ ॥ ५२

संचोदितः प्रार्थितः हृदिस्थानेवाह नतु ते पृष्टास्तेन विस्मृता इत्यर्थः ३ आत्मनि श्रीनारायणे आत्मानं मन
आवेश्य ४ अब्जसंभूतो ब्रह्मा यदधिष्ठाय स्थितः कर्त्तरि क्तः तत्पद्मं संभश्च विलोक्य कथंभूतं पद्मं अंभश्च
तेन प्रलयकालेन कृतं वीर्यं यस्य तेन वायुना कंपितं न्यपादित्युत्तरेणान्वयः विवृद्धं विज्ञानं बलं च यस्य न्यपा

सूत उवाच ॥ एवं संचोदितस्तेन क्षत्त्रा कौषारवो मुनिः प्रीतः प्रत्याह तान् प्रश्नान् हृदिस्था
नथ भार्गव ॥३॥ श्रीमैत्रेय उवाच ॥ विरिंचोपि तथा चक्रे दिव्यं वर्षशतं तपः आत्मन्यात्मानमा
वेश्य यथाह भगवानजः ॥४॥ तद्विलोक्याब्जसंभूतो वायुना यदधिष्ठितः पद्ममंभश्च तत्का
लकृतवीर्येण कंपितं ॥ तपसा ह्येधमानेन विद्यया चात्मसंस्थया विवृद्धविज्ञानबलो न्यापाद्वा
युं सहांभसा ॥५॥ तद्विलोक्य वियद्व्यापि पुष्करं यदधिष्ठितः अनेन लोकान् प्राक्लीनान् कल्पिता
स्मीत्यचिंतयत् ६ पद्मकोशं तदाविश्य भगवत्कर्मचोदितः एकं व्यभांक्षीदुरुधा त्रिधा भाव्यं द्विसप्तधा
त्सर्वं पीतवान् पुष्करं पद्मं प्राग्लीनान् त्रीन् लोकान् कल्पितास्मि स्रक्ष्यामि ६ भगवता स्वयं करणीये कर्मणि चोदितो नियु
क्तः सन् तत् पद्मकोशं प्रविश्य तमेकमेव त्रिधा लोकत्रयरूपेण व्यभांक्षीत् विबभाज एकेन कमलमुकुलेन कथं लो
कत्रयसृष्टिरित्यसंभावनीयं वारयितुं तस्य विशालतामाह द्विसप्तधा चतुर्दशलोकरूपेण उरुधा ततोपि बहुप्रकारेण भा

[illegible] १

एवं सामान्यतः कालं निरूप्य विशेषतो निरूपयिष्यन् तन्निमित्तस्य सर्वसर्गस्य पूर्वोक्तानेव भेदाननुवदति सर्ग इ
ति यस्तु प्राकृतो वैकृतश्च स दशमः तन्निमित्तमेव त्रिविधं प्रलयमाह कालेनैव केवलेन नित्यप्रलयः द्रव्येण
संकर्षणाग्निना नैमित्तिकः गुणैः स्वकार्य्यप्रसङ्गिः प्राकृतिकः १३ तानेव सर्गान्प्रपंचयति आद्य इत्यादिना याव
दध्यायसमाप्ति महतो लक्षणं आत्मनो हरेः सकाशात् गुणानां वैषम्यमित्यहमः अहंकारस्य तस्य लक्षणं य

सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः १३ आद्यस्तु महतः
सर्गो गुणवैषम्यमात्मनः द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः १४ भूतसर्गस्तृतीयस्तु तन्मात्रो द्र
व्यशक्तिमान् चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः १५ वैकारिको देवसर्गः पंचमो यन्मयं
मनः षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभो १६ षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु रजो
भाजो भगवतो लीलेयं हरिमेधसः १७

नेति द्रव्यादयो वक्ष्यमाणास्त्रयः सर्गाः १४ तन्मात्रो भूतसर्गः भूतसूक्ष्मसर्ग इत्यर्थः द्रव्यशक्तिमान् महाभूतोत्पाद
कः ज्ञानकर्मेन्द्रियात्मकः चतुर्थः १५ पंचमो वैकारिक इन्द्रियाधिष्ठातारो देवाश्च मनश्च षष्ठस्तु तमसः पंचपर्वा विद्या
याः अबुद्धिर्जीवानामावरणविक्षेपकर्तां करोतीत्यबुद्धिकृतः तस्य १६ मे मत्तः शृणु अत्र हेतुत्वेन श्रोतव्यतामाह यद्विषया मे
धा संसारं हरति तस्य हरेर्लीला यद्वा इयमिति तम आदिसर्गरूपा रजोभाज इति ब्रह्मरूपस्येत्यर्थः अस्मिन्पक्षे अबुद्धि
कृत इति प्रथमांतः अनवधानकृत इत्यर्थः १७

तत्रसामान्यतः कालस्यस्वरूपमात्रोच्यते उत्तराध्यायेतु विशेषतः गुणानांव्यतिकरोमहदादिपरिणामः तेनैवा
क्रियत्तेयः सकालइतिशेषः। वक्ष्यतेचैकादशे गुणव्यतिकरः कालः स्वभावस्तत्रमेवचेति स्वतस्तुनिर्विशेषः अप्रतिष्ठि
तः काप्यपर्य्यवसितः आद्यंतशून्यइत्यर्थः। एतदेवदर्शयितु मीश्वरः स्रष्ट्रादितेननिमित्तभूतेनकरोतीत्या
ह पुरुषइति उपादीयतेनेनिमित्तेनयास्वीक्रियतेइत्युपादानं सकालउपादानंनिमित्तंयस्मिन्तमात्मानमेव

श्रीमैत्रेय उवाच॥ गुणव्यतिकराकारोनिर्विशेषोप्रतिष्ठितः॥ पुरुषस्तदुपादानमात्मानंली
लयासृजत्॥१०॥ विश्वंवैब्रह्मतन्मात्रंसंस्थितंविष्णुमायया॥ ईश्वरेणपरिच्छिन्नंका
लेनाव्यक्तमूर्त्तिना॥११॥ यथेदानींतथाग्रेचपश्चादप्येतदीदृशम् १२

विश्वरूपेणासृजत् स्वव्यतिरेकेणस्रज्यस्याभावात् एतच्चवस्तुकथनमात्रं कालेननिमित्तेनासृजदित्येताव
देवविवक्षितं १० स्वव्यतिरिक्तस्रज्याभावंदर्शयन् कालस्यसृष्टिनिमित्ततांदर्शयति विश्वमिति विष्णुमाययासं
स्थितंसंहृतंब्रह्मतन्मात्रंस्वसिद्धं ईश्वरेणकर्त्राकालेननिमित्तेनपरिछिन्नंपृथक्प्रकाशितं अव्यक्तामूर्त्तिस्व
रूपंयस्येति स्वतोनिर्विशेषतादर्शिता ११ अप्रतिष्ठितत्वंदर्शयितुंतत्कार्य्यविश्वप्रवाहस्याप्रतिष्ठामाह यथे
दानीमस्ति तथाग्रेपूर्वमेवासीत् पश्चादपिभविष्यति १२

भा० टी० अष्टाविंशतिभेदानेवाह गवादयउष्ट्रांताः द्विशफाद्विखुरानवखुरादयश्चपर्य्यंताः एकशफाः षट्श्वाद
६४ योगोधांताःपंचनखाद्वादशः एवमेतेभूचराःसप्तविंशतिमकरादयोजलचराः कंकादयःखगाः अभूच
रत्वेनैकीकृत्यगृहीताः तदेवमष्टविंशति तेषुकृष्णरुरुगौरामृगविशेषाः अन्येषामपितिर्य्यक्प्राणिनांय

गौरजोमहिषःकृष्णःसूकरोगवयोरुरुः द्विशफापशवश्चेमेअविरुष्ट्रश्चसत्तम खरोश्वोश्वतरो
गौरःसरभश्चमरीतथा एतेचैकशफाःक्षत्तः शृणुपंचनखान्पशून् श्वासृगालोवृकोव्या
घ्रोमार्ज्जारःशशशल्लकौ सिंहःकपिर्गजःकूर्मोगोधाचमकरादयः कंकगृध्रबकश्येन
भासभल्लुकबर्हिणः हंससारसचक्राह्वकाकोलूकादयःखगाः २० अर्वाक्स्रोतस्तुनव
मःक्षत्तरेकविधोनृणां रजोधिकाःकर्मपराःदुःखेचसुखमानिनः २१ वैकृतास्त्रयएवैतेदेव
सर्गश्चसत्तमः वैकारिकस्तुयःप्रोक्तःकौमारस्तूभयात्मकः २२

याय्यमेतेष्वेवांतर्भावः २० अथआहारसंचारोयस्यसोर्वाक्स्रोताः ह्रस्वत्वमार्षं इयंसर्गः नृणांलघु
एरजःअधिकंयेषुते २१ एतेत्रयोवैकृताएवनकौमारवदुभयात्मकः देवसर्गश्चवैकृतइत्यनुषंगः वै
कारिकस्तुदेवसर्गःप्राकृतेषुपूर्वमेवप्रोक्तः अयंतुततोन्यूनत्वाद्वैकृतः देवसर्गत्वात्तदंतर्भूतश्चसनत्कुमार

[illegible] २९

६४

मुखमिव प्रथमं कृतो मुख्यसर्गः तस्थुषां स्थावराणां षड्विधत्वमेवाह येपुष्पं विना फलंति ते वनस्पतयः
ओषधयः फलपाकांताः लता आरोहणापेक्षाः त्वक्सारा वेण्वादयः लता एव काठिन्येनारोहणापेक्षाः वीरुधः
ये पुष्पैः फलंति ते द्रुमाः तेषां साधारणं लक्षणमाह ऊर्ध्वं स्रोतः आहारसंचारो येषां तमःप्राया अव्यक्तचैतन्याः अंतः
स्पर्शाः स्पर्शमेव जानंति नान्यत् तदप्यंतरेव न बहिः विशेषिणः अव्यवस्थितपरिणामाद्यनेकभेदवंतः १८

सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः वनस्पत्योषधिलतात्वक्सारा
वीरुधो द्रुमाः उत्स्रोतसस्तमःप्राया अंतःस्पर्शा विशेषिणः १८ तिरश्चाम
ष्टमः सर्गः सोष्टाविंशद्विधो मतः अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः

तीर्यक्स्रोतसां सर्गमाह तिरश्चामिति सचाष्टाविंशतिभेदः तिरश्चां लक्षणं अविदः श्वस्तनादिज्ञा
नशून्याः भूरितमसः आहारादिमात्रनिष्ठाः घ्राणज्ञाः घ्राणेनैवेष्टमर्थं जानंति हृदि अवेदिनः दीर्घा
नुसंधानशून्याः तथाच श्रुतिः अथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानं न विज्ञातं वदंति न
विज्ञातं पश्यंति न विदुः श्वस्तनं लोकालोकादिति १९

सूक्ष्ममुक्त्वा स्थूलमाह सत एवेति यस्तु चरमोऽंशः परमाणुः तस्यैव सतः कार्य्यमात्रस्य स्वरूपावस्थितस्य परिणाममप्राप्तस्य यत्कैवल्यमैक्यं स परममहान् पुंस्त्वं तु परिमाणप्रतियोगित्वात् ननु नानाविशेषवान् परस्परं भिन्नश्च सन्नयं पदार्थः कथमैक्यं तस्येत्यत्राह अविशेषः विकाररहितः निरंतरः भेदविवक्षारहितश्च सर्वोऽपि प्रपंचः परममहानित्यर्थः स्थूलसूक्ष्मत्वाभ्यां पदार्थः एवं कालोऽप्यनुमितः चकारान्मध्यमावस्थायामप्यनुमितः संस्थानं परमाण्वाद्यवस्था तस्य भुक्तिः व्याप्तिस्तया भगवानिति हरेः शक्तिः स तु अव्यक्तः व्यक्तं भुंक्ते प्राप्नोति परिछिनत्तीति तथा विभुरित्यत्यादिभुव

घ३

सत एव पदार्थस्य स्वरूपावस्थितस्य यत् कैवल्यं परममहानविशेषो निरंतरः २ एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः ३ स कालः परमाणुर्वै यो भुंक्ते परमाणुतां सतोऽविशेषभुग्यस्तु स कालः परमो महान् ४

त्वः ३ एतदेव प्रपंचयति इत्यादिना सतः प्रपंचस्य परमाणुतां परमाण्ववस्थां यो भुंक्ते स कालः परमाणुः तस्यैवाविशेषं साकल्यं यो भुंक्ते स परममहान् अयमर्थः ग्रहर्क्षताराचक्रस्थ इत्यादिना यत्सूर्य्यपर्य्यटनं वक्ष्यते तत्र सूर्य्यो यावता परमाणुदेशमतिक्रामति तावत्कालः परमाणुः यावता च द्वादशराश्यात्मकं सर्वं भुवनकोशमतिक्रमति स परममहान् संवत्सरात्मकः कालः तस्यैवावृत्त्या युगमन्वंतरादिक्रमेण द्विपरार्द्धांतत्वमिति तथा च पंचमे सूर्य्यगत्यैव कालादिमानं वक्ष्यति ४

६५

श्रमुखा २

वैकृतश्च देवसर्गोऽष्टविधः तत्र विबुधादयस्त्रयो भेदाः गंधर्वाप्सरस एकः यक्षरक्षांस्येकं भूतप्रेतपिशाचा एकः सिद्धचारणविद्याधरा एकः किन्नरादय एकः आदिशब्दात् आदिशब्दात्किंपुरुषादयः एतद्विशेषा ध्येयस्पष्टं भविष्यति २४ । २५ ॥ इति तृतीये दशमः १० ॥ तत एकादशे कालः परमाण्वादिलक्षणैः युगमन्वंतरादिभ्यः कल्पमानादि वर्ण्यते तदेवं सामान्यतः कालस्योपलक्षणमुक्तं गुणव्यतिकरं दशविधे निरूप्येदानीं तस्यैव वि

देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः गंधर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः २८ दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः अतः परं प्रवक्ष्यामि वंशान्मन्वंतराणि च २९ एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः सृजत्यमोघसंकल्प आत्मैवात्मानमात्मना ३० ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे दशमोऽध्यायः ॥ १० ॥ श्रीमैत्रेय उवाच ॥ चरमः सद्विशेषाणामनेकोऽसंयुतः सदा ॥ परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥ १ ॥

शेषं निरूपयितुं तत्परिच्छेदेन वस्तुतत्त्वं दर्शयति द्वाभ्यां ततः कार्यस्य विशेषाणामंशानां यश्चरमः अंत्यः यस्यांशो नास्ति अनेकं कार्यावस्थामप्राप्तः असंयुतः समुदायावस्थां चाप्राप्तः अत एव सदा कार्यसमुदायावस्थयोरपगमेऽप्यस्ति स परमाणुर्विज्ञेयः किं तत्र प्रमाणमत आह यतः येभ्यः समुदितेभ्यः नृणां व्यवहर्तृणां ऐक्यभ्रमः अवयवबुद्धिः तथा च पंचमे अवयविनिराकरणं वक्ष्यति येषां समूहेन कृतो विशेषः इति कार्यानुपपत्त्या कल्प्यत इति भावः १

भा० त० अहनी अहोरात्रे १० षण्मासा अयनं द्वितीयस्योत्तरेणान्वयः ११ अहनी देवानामहोरात्रे प्राहुः द्वादशयामाः
४६ १२ अनेन क्रमेणासौ सूर्य्यः नित्यमायुः स्वपतीत्याहुः ग्रहाश्चंद्रादयः ऋक्षाण्यश्विन्यादीनि ताराश्चान्यानि नक्ष
त्राणि तदुपलक्षितं यत्कालचक्रं तत्र स्थितः अनिमिषः कालात्मा विभुरीश्वरः सूर्य्यः जगत् द्वादशारस्यात्मकं
भुवनकोशं पर्य्येति पर्य्यटतीति १३ संवत्सरादिभेदश्च सौरबार्हस्पत्यसावनचंद्रनक्षत्रमासभेदेन द्रष्टव्यः केचि
मासाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे पक्षं पंचदशाहानि शुक्लः कृष्णश्च मानद १० तयोः
समुच्चयो मासः पितॄणां तदहर्निशं द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि ११ अयने चाहनी
प्राहुर्वत्सरो द्वादश स्मृतः संवत्सरशतं नॄणां परमायुर्निरूपितं १२ ग्रहर्क्षताराचक्रस्थः परमा
णवादिना जगत् संवत्सरावसानेन पर्य्येत्यनिमिषो विभुः १३ संवत्सरः परिवत्सर इडावत्सर ए
व च अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते १४ केचित्पुनरेवमाहुः यदा शुक्लप्रतिपदि संक्रांतिर्भवति
तदा सौरचंद्रमसयोर्युगपत्क्रमो भवति स संवत्सरः ततः सौरमानेन वर्षे षट्दिनानि वर्द्धते चांद्रमानेन ष
ट् दिनानि ह्रसंतीति द्वादशदिनव्यवधानादुभयोरग्रपश्चाद्भावो भवति एवं व्यवधानतारतम्येन पंचवर्षाणि ग
च्छति तन्मध्ये द्वौ मलमासौ भवतः ततः पुनः षष्ठः संवत्सरो भवतीति १४ ॥ ६५ ॥ छ ॥ श्री ४६

इदानीं त्रसरेण्वादिलक्षणपूर्वकं मध्यमकालावस्थां कथयति द्वौ परमाणू अणुः स्यात् त्रयोऽणवस्त्रसरेणुः सतु प्रत्यक्ष इत्याह जालार्केति गवाक्षप्रविष्टसूर्यकरप्रभवगतः कोऽसौ यो तिललघुत्वेन खमेवानुपतन्नगात् गतः पाठां तरे खमेवानुपतन्नपयातः नतु गां पृथ्वीं ५ शतभागात्रुटिरूपाय स्मिन् सवेधः त्रैर्वेधैस्त्रिभिर्लवः ६ त्रिभिर्लवैर्निमिषः निमेषास्त्रयः क्षणः क्षण इति आम्नातः कथितास्ताः काष्ठा पंचदश एकं लघ्वी नाडिका षट्सप्त

अणुर्द्वौ परमाणू स्यात् त्रसरेणुस्त्रयः स्मृतः जालार्करश्म्यवगतः खमेवानुपतन्नगात् ५ त्र सरेणुत्रिकं भुंक्ते यः कालः सत्रुटिः स्मृतः शतभागस्तु वेधः स्यात् तैस्त्रिभिस्तु लवः स्मृतः ६ निमेषस्त्रि लवो ज्ञेय आम्नातस्ते त्रयः क्षणः क्षणान् पंच विदुः काष्ठां लघु ता दश पंच च ७ लघूनि वै समाम्ना ता दश पंच च नाडिका ते द्वे मुहूर्तः प्रहरः षड्यामः सप्त वा नृणाम् ८ द्वादशार्द्धपलोन्मानं चतुर्भि श्चतुरंगुलैः स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलप्लुतं ९ यामः प्रहरः स एव यामो पि दिनस्य रात्रेश्चतु र्थो भागः क्वासौ षट् द्वौ स प्त संध्यांशस्तु मुहूर्तद्वयं विनेति ज्ञातव्यं तत्राप्यनिषमार्थो वा शब्दः प्रत्यहं तद्ग्रहा नांग णयितुमशक्यत्वात् ८ नाडिकाया उन्मानमाह उन्नीयतेऽनेनेत्युन्मानं पात्रं षटपात्रं ताम्रविरचितं पंच गुञ्जो माषः तैश्चतुर्भिश्चतुरंगुलायामशलाकारूपेण रचितैः कृतामूलच्छिद्रं तेन छिद्रेण यावत् प्रस्थपरिमितं जलं प्रविशति तेन च प्लुतं निमग्नं भवति तावान्कालो नाडिका अत्र पलच्छिन्नयोरधिको छिद्रं निमज्जेत् अल्पे त्वेव च विलंबेनेति य

मलमासतत्वटीकायाः ३८

भा०त्री कृतयुगेचत्वारिसहस्राणिसंध्यासंध्यांशयोश्चत्वारि चत्वारिशतानिइत्यष्टौशतानिच एवंत्रेतादिषु अपियेज्यं प्र
८७ युगस्यादौसंध्याअन्तेसंध्यांशः उक्तानिशतानिसंख्याययोस्तयोरंतर्मध्येयुगं तस्यविशेषमाह यत्रेति यथा
स्वंभादिधर्मविशेषायत्रविधीयतइत्यर्थः साधारणधर्मस्तुसंध्यासंध्यांशयोरप्यस्त्येव २० चतुष्पात्संपूर्णः त्रे
तादिषुपादेनव्यतिक्रसति पादेनपादेनवर्द्धमानेनाधर्मेणहेतुना एतच्चस्वरूपकथनमात्रंवैराग्यार्थं नतु

चत्वारित्रीणिद्वेचैकंकृतादिषुयथाक्रमं संख्यातानिसहस्राणिद्विगुणानिशतानिच १९ सं
ध्यासंध्यांशयोरंतर्यःकालःशतसंख्ययोः तमेवाहुर्युगंतज्ज्ञायत्रधर्मोविधीयते २० धर्म
श्चतुष्पान्मनुजान्कृतेसमनुवर्तते सएवान्येष्वधर्मेणव्यतिपादेनवर्द्धता २१ त्रिलोक्यायु
गसाहस्रंवहिराब्रह्मणोदिनं तावत्येवनिशातातयन्निमीलतिविश्वसृक् २२ निशावसानआरब्धो
लोककल्पोनुवर्तते यावद्दिनंभगवतोमनून्भुंजंश्चतुर्दश २३ स्वंस्वंकालंमनुर्भुंक्तेसाधि
कांह्येकसप्ततिं २४

धर्मसंकोचनार्थं २१ त्रिलोक्याबहिर्महर्लोकात् प्रभृतिब्रह्मलोकमभिव्याप्यचतुर्युगसहस्रमेकंदिनं यत्रय
स्यांविश्वसृक्ब्रह्मानिमीलतिस्वपितीति २२ तत्रदिनस्थितिमाह निशावसानइत्यादिसार्द्धैश्चतुर्भिः चतु
र्दशमनून्भुंजन् व्याप्नुवन्नित्यर्थः २३ किंचिदधिकायुगानामेकसप्ततिम् २४ ८७

एवंभूतः कालात्मानित्यप्रमत्तैः पूजनीय इत्याह य इति सृज्यं कार्य्यमंकुरादि तद्विषयां जीवादीनां शक्तिं का
लरूपायास्वशक्त्याबकुधाउच्छ्वसयन् कार्याभिमुखं कुर्वन्नदिविश्रांतरिक्षे धावति को सो भूतभेदः महाभूतविशे
षेस्तेजोमंडलरूपीत्यर्थः किमर्थं धावति पुंसः पुरुषस्य अत्र मायामोहस्तन्निवृत्तये आयुरादिव्ययेन विषयासक्तिं
निवर्त्तयन्नित्यर्थः सकामानां तु गुणमयं सर्गादिफलं क्रतुभिर्विस्तारयन् तस्मै वत्सरपंचकाय प्रवर्त्तकाय स्तु

यः सृज्यशक्तिमुरुधोच्छ्वसयन् स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः ॥ कालाख्यया गु
वर णमयं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्सरपंचकाय ॥१५॥ विदुर उवाच ॥ पितृदेवमनुष्याणामा
युः परमिदं स्मृतं ॥ परेषां गतिमाचक्ष्व ये स्युः कल्पाद्बहिर्विदः ॥१६॥ भगवान्वेद कालस्य गतिं भगवतो
ननु विश्वं विचक्षते धीरा योगराद्धेन चक्षुषा ॥१७॥ श्रीमैत्रेय उवाच ॥ कृतं त्रेता द्वापरं च कलिश्चे
ति चतुर्युगं ॥ दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितं ॥१८॥

श्चां कुरुत १५ इदं स्वस्वमानेन वर्षशतं गणितं आयुर्मानं प्रत्यहं कल्प्यते सृज्यत इति कल्पः त्रैलोक्यं तस्माद्बहिः
विदो ज्ञानिनः १६ योगराद्धेन योगसिद्धेन द्वादशभिर्वर्षसहस्रैरित्युत्तरश्लोकसामर्थ्याज्ज्ञातव्यं अवधीय
यत इत्यवधानं संध्यासंध्यांशाभ्यां तत्सहितं १८ ॥ ३३ ॥

जनलोकश्चालयो येषां महर्लोकगतानामन्येषां च तैः ३२ वैराग्यार्थमाह एवंविधैः अहोरात्रैर्वर्षशतं सर्वेषां प्राणिमा
युः परं अधिकं अस्य ब्रह्मणो यदायुः तदप्यपेक्षितं अपक्षीण इवेति लोकोक्तिः गतप्रायमित्यर्थः ३३ तदेवाह यदर्धमिति ३४ पू
र्वस्य परार्धस्यादावितित्रिभिर्वस्तुकथनमात्रं ३५ पद्मत्वे हेतुः यदिति ३६ अयं तु द्वितीयस्यादौ कथितः ३७ तदेवं कालेनानि

अंतःस तस्मिन्सलिल आस्तेनंतासनो हरिः योगनिद्रानिमीलाक्षः स्तूयमानो जनालयैः ३२ एवं
विधैरहोरात्रैः कालगत्योपलक्षितैः अपक्षितमिवास्यापि परमायुर्वयःशतं ३३ यदर्धमायुषस्तस्य प
रार्धमभिधीयते पूर्वः परार्धोपक्रांतो ह्यपरोद्य प्रवर्तते ३४ पूर्वस्यादौ परार्धस्य ब्राह्मो नाम महान
भूत् कल्पो यत्राभवद्ब्रह्मा शब्दब्रह्मेति यं विदुः ३५ तस्यैव चांते कल्पोभूद्यं पाद्ममभिचक्षते यद्ध
रेर्नाभिसरस आसील्लोकसरोरुहं ३६ अयं तु कथितः कल्पो द्वितीयस्यापि भारत वाराह इति विख्या
तो यत्रासीच्छूकरो हरिः ३७ कालोयं द्विपरार्धाख्यो निमेष उपचर्यते अव्याकृतस्यानंतस्य अना
देर्जगदात्मनः ३८

मितेन सर्वज्यानामायुः परमाणमुक्त्वा कालपरिच्छेद्य इहितं तत्वमाह कालोयमिति पंचभिः उपचर्यते केवलं न तत्व
नेनापि क्रमेणायुर्गणनं तस्येत्याह अव्याकृतस्य कार्योपाधिशून्यस्य अतएवानंतस्य अनादेश्च जगदात्मनो जगत्का ४८

मनुवंश्याः पृथ्वीपालकाः क्रमेण भवंति सप्त ऋषिप्रभृतयस्तु युगपत् समकालमेव भवंति सुरेशा इंद्रास्ता
ननुवर्त्तंते ये गंधर्वादयस्तेपि २५ त्रैलोक्यं वर्त्तयती नितितथा २६ स्वमूर्त्तिभिर्मन्वंतरावतारैर्मन्वादिद्वार
भूतैरेव विष्कृतपुरुषाकारः सन् विश्वं रक्षतीति २७ रात्रिगतां स्थितिमाह पंचभिः तमसो मात्रां लेशं प्रतिसंरुद्धः

मन्वंतरेषु मनवस्तद्वंश्या ऋषयः सुराः भवंति चैवैते युगपत् सुरेशाश्चानु ये च तान् २५ एष दैनंदि
नः सर्गो ब्राह्मस्त्रैलोक्यवर्त्तनः तिर्यङ् नृपितृ देवानां संभवो यत्र कर्मभिः २६ मन्वंतरेषु भगवान्बि
भ्रत्सत्वं स्वमूर्त्तिभिः मन्वादिभिरिदं विश्वमवत्युदितपौरुषः २७ तमोमात्रामुपादाय प्रतिसंरु
द्धविक्रमः कालेनानुगताशेष आस्ते तूष्णीं दिनात्यये २८ तमेवान्वपिधीयंते लोका भूरादयस्त्र
यः निशायामनुवृत्तायां निर्मुक्तशशिभास्करं २९ त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्नि
ना यांत्यूष्मणा महर्ल्लोकाज्जनं भृग्वादयोर्दिताः ३० तावत्त्रिभुवनं सद्यः कल्पांतैधितसिंधवः प्ला
वयंत्युत्कटाटोपचंडवातेरितोर्मयः ३१
प्रत्याहृतो विक्रमो येन अनुगतमनुप्रविष्टमशेषं यस्मिन्
२८ तदेवं स्पष्टयन्निति तमेवेति अपिधीयंत इति कर्मकर्त्तरि प्रयोगः तिरोहिता भवंतीत्यर्थः कथं निर्मुक्तः रहितः शशी
भास्करश्च यथा भवति तथा २९ भगवच्छक्तिरूपो यः संकर्षणमुखाग्निस्तेन ऊष्मणा अर्द्दिताः संतः जनलोकं यांति ३०

कल्पांते एधिताः सिंधवः समुद्राः उत्कटआटोपः क्षोभो येन चंडवातेन तेन
ईरिता ऊर्मयो येषां ते ३१

भा०टी० अग्र इति ब्रह्मा स्वसृष्टेः प्रथममविद्यावृत्तीः ससर्ज तत्र तमो नाम स्वरूपाप्रकाशः मोहो देहाद्यहंबुद्धिः महामोहो
४९ भोगेच्छा तामिस्रं तत्प्रतिघाते क्रोधः अन्धतामिस्रं तन्नाशे अहमेव हतोस्मीति बुद्धिः तदुक्तं वैष्णवे तमोऽविवे
को मोहः स्यादन्तःकरणविभ्रमः महामोहस्तु विज्ञेयो ग्राम्यभोगसुखैषणा मरणं ह्यन्धतामिस्रं तामिस्रं क्रोध उच्य
ते अविद्या पंचपर्वैषा प्रादुर्भूता महात्मनः पातंजलेप्येत एवोक्ताः अविद्यास्मितारागद्वेषाभिनिवेशाः पंच क्लेशा इ

ससर्जाग्रेंऽधतामिस्रमथतामिस्रमादिकृत् महामोहं च मोहं च तमश्चाज्ञानवृत्तयः २ दृष्ट्वा पापी
यसीं सृष्टिं नात्मानं बह्वमन्यत भगवद्ध्यानपूतेन मनसान्यां ततोऽसृजत् सनकं च सनंदं च सना
तनमथात्मभूः सनत्कुमारं च मुनीन्निष्क्रियानूर्ध्वरेतसः ३ तान्बभाषे स्वभूः पुत्रान्प्रजाः सृजत पुत्र
त २ काः तन्नैच्छन्मोक्षधर्माणो वासुदेवपरायणाः ४ सोऽवध्यातः सुतैरेवं प्रत्याख्यातानुशासनैः क्रोधं दु
र्विषहं जातं नियंतुमुपचक्रमे ५ धिया निगृह्यमाणोपि भ्रुवोर्मध्यात्प्रजापतेः सद्योऽजायत तन्मन्युः कुमारो नी
ललोहितः ६

ति श्रीविष्णुस्वामिप्रोक्ता वा अज्ञानविपर्य्यासभेदभयशोकाः तदुक्तं स्वादृगुत्पत्तिविपर्य्यासेत्या
दि २ न बह्वमन्यत नाभ्यनंदत् यद्यपि प्रतिकल्पं सनकादिसृष्टिर्नास्ति तथापि ब्राह्मसर्गत्वादिहोच्यते वस्तुतस्तु मु
ख्यसर्गोदय एव प्रतिकल्पं भवति सनकादयस्तु ब्राह्मकल्पसृष्टिरेवानुवर्त्तंते ३ स्वभूर्ब्रह्मा ४ अवध्यातः अवज्ञातः प्रत्या ४९

तत्परिच्छेदकालस्यासामर्थ्यादित्याह कालोयमीश्वरः समर्थोपि भूम्नः परिच्छेत्तुमीशितुं नैव प्रभुः यतो धाममानि-
नां देहाभिमानिनामेवेश्वरः ३९ भूम्नस्तत्त्वं तत्प्रपंचयन्नाह विकारैः षोडशभिः युक्तैः सहितः तदारब्ध इत्यर्थः अ-
यमांडकोशः यत्र प्रविष्टः परमाणुवल्लक्ष्यत इति उत्तरेणान्वयः कीदृशः अंतः पंचाशत्कोटियोजनविस्तृतः वहिश्च

कालोयं परमाण्वादिर्द्विपरार्द्धांत ईश्वरः नैवेशितुं प्रभुर्भूम्न ईश्वरो धाममानिनां ३९ विकारैः स-
हितो युक्तैर्विशेषादिभिरावृतः आंडकोशो वहिरयं पंचाशत्कोटिविस्तृतः दशोत्तराधिकैर्यत्र प्र-
विष्टः परमाणुवत् लक्ष्यतेंतर्गताश्चान्ये कोटिशो ह्यंडराशयः ४० तदाहुरक्षरं ब्रह्म सर्वकारणका-
रणं विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ॥४१॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे
विदुरमैत्रेयसंवादे कालस्वरूपवर्णनो नामैकादशोध्यायः ॥११॥ श्रीमैत्रेय उवाच ॥ इति ते वर्णितः क्षत्तः
कालाख्यः परमात्मनः महिमा वेदगर्भोथ यथास्राक्षीन्निबोध मे ॥१॥

चि १ विशेषादिभिः पृथिव्यादिभिः सप्तभिरावृतः । कीदृशैः आंडकोशप्रमाणाद्दशगुणोत्तरोत्तरैरधिकैर्यैर्वृतैः न के-
वलमयमेकमेव अपितु अन्येपि लक्ष्यंते ४० सर्वेषां कारणानां कारणं धाम स्वरूपं ४१ इ ति ये का शः ११
द्वादशे तु कुमारादिमनःसर्गासमेधिताः न कायद्वैधे यथोनस्तु मनुसर्गोनुवर्ण्यते १ ॥ — ६६ ॥

भा०त०
५०

१८ १९ २० २१ २२ २३ २४ अधरदछदात् अधरोष्ठात् २५ २६ देहं तनेरेण कृतं संगविकृतं देहत्यागो कारणमाह

तपस्त्वेव परं ज्योतिर्भगवंतमधोक्षजं सर्वभूतगुहावासमंजसा विंदते पुमान् १९ ॥श्रीमैत्रेय उवाच॥ ए

वमात्मभुवादिष्टः परिक्रम्य गिरां पतिं बाढमित्यमुमामंत्र्य विवेश तपसे वनं २० अथाभिध्यायतः सुर २

सर्गं दशपुत्राः प्रजज्ञिरे भगवच्छक्तियुक्तस्य लोकसंतानहेतवः २१ मरीचिरत्र्यंगिरसौ पुलस्त्यः

पुलहः क्रतुः भृगुर्वसिष्टो दक्षश्च दशमस्तत्र नारदः २२ उत्संगान्नारदो जज्ञे दक्षोंऽगुष्टात्स्वयंभु

वः प्राणाद्वसिष्ठः संजातो भृगुस्त्वचि करात्क्रतुः २३ पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोरृषिः

अंगिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत् २४ धर्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयं अधर्मः पृष्टतो

यस्मान्मृत्युर्लोकभयंकरः २५ हृदि कामो भ्रुवः क्रोधो लोभश्चाधरदच्छदात् आस्याद्वाक्सिंधवो

मेढ्रान्निरृतिः पायुरघाश्रयः २६ छायायाः कर्दमो जज्ञे देवहूत्याः पतिः प्रभुः मनसो देहतश्चेदं

जज्ञे विश्वकृतो जगत् २७ वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं मनः अकामां चकमे क्षत्तः सकाम इति नः श्रुतं

२८ तमधर्मे कृतमतिं विलोक्य पितरं सुताः मरीचिमिश्रा मुनयो विश्रंभात्प्रत्यबोधयन् २९ नैतत्पूर्वैः कृतं त्व

द्ये न करिष्यंति चापरे यत्त्वं दुहितरं गच्छेरनिगृह्यांगजं प्रभुः ३०

वाचमित्यादिना २७ २८ त्वत् त्वत्तो पूर्वे ब्रह्मादयो न्ये वा न तेरेतन्न कृतं अंगजं कामं २९ रामरामरामरामरामरामराम ५०

७ ८ बालकइव ९ अग्रेऽहंवेमेमयाकृतानि १० ११ १२ सयोषणः सस्त्रीकः एभिःस्थानैर्नामभिश्चयुक्तःप्रजाः

सवैरुरोदद्देवानांपूर्वजोभगवान्भवः नामानिकुरुमेधातःस्थानानिचजगद्गुरो ७ इतितस्य
वचःपाद्मोभगवान्परिपालयन् अभ्यधाच्छ्लक्ष्णयावाचामारोदीस्तत्करोमिते ८ यदरोदीःसुरश्रेष्ठसो
द्वेगइवबालकः ततस्त्वामभिधास्यंतिनाम्नारुद्रइतिप्रजाः ९ हृदिंद्रियाण्यसुर्व्योमवायुरग्निर्जलं
मही सूर्यश्चंद्रमास्तपश्चैवस्थानान्यग्रेकृतानिते १० मन्युर्मनुर्महिनसोमहांश्छिवऋतध्वजः
उग्ररेताभवःकालोवामदेवोधृतव्रतः ११ धीर्वृत्तिरुशनोमाचनियुत्सर्पिरिलांबिका इरावतीसुधा
दीक्षारुद्राण्योरुद्रतेस्त्रियः १२ गृह्णाणैतानिनामानिस्थानानिचसयोषणः एभिःसृजप्रजाबह्वीः
प्रजानामसियत्पतिः १३ इत्यादिष्टःसगुरुणाभगवान्नीललोहितः सत्वाकृतिस्वभावेनससर्जात्म
समाःप्रजाः १४ रुद्राणांरुद्रसृष्टानांसमंतात्रसतांजगत् निशाम्यासंख्यशोयूथान्प्रजापतिरशंक
त १५ अलंप्रजाभिःसृष्टाभिरीदृशीभिःसुरोत्तम मयासहदहंतीभिर्दिशश्चक्षुर्भिरुल्वणैः
१६ तपआतिष्ठभद्रंतेसर्वभूतसुखावहं तपसैवयथापूर्वंस्रष्टाविश्वमिदंभवान् १७ २९

सृज ३ सत्वंबलंआकृतिर्नीललोहितता स्वभावस्तीव्रता १४ रुद्राणांयूथानिदृष्ट्वा अशंकतत्रासंप्राप्तः १५ १६ स्रष्टात्वं

 उपवेदक्रममाह आयुर्वेदमिति आत्मनो मुखे स्थापत्यं शिल्पकर्मशास्त्रं ३८ कर्मतंत्रं क्रममाह षोडश्युक्थाविति
 पुरीषीचयनं अग्निष्टुत् अग्निहोमः ३९ विद्येति शौचं क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मतेतिस्मृतेः दानमिति दया
भूताभयप्रदानस्य कलां नार्हन्ति षोडशीमिति वचनात् एवं च तपः शौचं दया सत्यमिति पादाः कृते कृता इति प्रथमस्कंधे

आयुर्वेदं धनुर्वेदं गांधर्व्वं वेदमात्मनः स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः ३८ इतिहास
पुराणानि पंचमं वेदमीश्वरः सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः षोडश्युक्थौ पूर्ववक्त्रात्पुरीष्य
ग्निष्टुतावथ आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवं ३९ विद्या दानं तपः सत्यं धर्मस्येति पदा
नि च आश्रमांश्च यथासंख्यमसृजत्सह वृत्तिभिः ४० सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा वा
र्त्तासंचयशालीनशिलोंछ इति वै गृहे ४१

केर विरोधः ४० सावित्रं ब्रह्मचर्यमुपनयनादारभ्य गायत्रीम
धीयानस्य त्रिरात्रं प्राजापत्यं व्रतान्याचरतः सांवत्सरं ब्राह्मं वेदग्रहणं तं बृहन्नैष्ठिकं वार्त्तात्र निषिद्धकृष्या
दिवृत्तिः संचयो याजनादिवृत्तिः शालीनं अयाचितवृत्तिः शिलोंछनं पतितकणिशकणवृत्तिः एकवचनमार्षं
इत्येता गृहस्थवृत्तय इति यद्वा शिलोंछ इति [illegible]के सप्तमी एवं वृत्तिभेदे सति गृहे स्थिता भवंतीत्यर्थः ४१

मुखात् ३

तेजीयसां श्रीतिते उच्चितानामपि सुश्लोक्यं सत्कीर्त्तिप्रदं न भवति येषां तेजीयसां वृत्तं ३० यद्दोषैः स्तुतैः प्रार्थितोपि कामकश्म
लं न जहाति नराश्री मन्नारायणं नमस्कृत्य प्रार्थयते तस्मै नमो भगवत इति ३१ तन्वं तनुं ३२ ३३ कथं स्रक्ष्यामि इत्यभिध्यायतः
स्रष्टुर्ब्रह्मणः चतुःसंख्यायुक्तात् समवेतान् संसर्गयुक्तान् यथा पुरा प्राक्कल्पे ३४ चातुर्होत्रादीन्यं चतुर्थी कर्म कर्मतंत्रं यज्ञविस्तारः

स१ तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो यद्वृत्तमनुतिष्ठन्वै लोकः क्षेमाय कल्पते ३० तस्मै नमो भग
वते य इदं स्वेन रोचिषा आत्मस्थं व्यंजयामास स धर्मं पातुमर्हति ३१ स इत्थं गृणतः पुत्रान् पुरो दृष्ट्वा
प्रजापतीन् प्रजापतिपतिस्तन्वं तत्याज व्रीडितस्तदा ३२ तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः
कदाचिद्ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात् ॥ कथं स्रक्ष्याम्यहं लोकान्समवेतान्यथा पुरा ३४
चातुर्होत्रं कर्मतन्त्रमुपवेदनयैः सह ॥ धर्मस्य पादाश्चत्वारस्तथैवाश्रमवृत्तयः ॥ ३५ ॥ विदुर उवाच ॥
स वै विश्वसृजामीशो वेदादीन्मुखतोऽसृजत् ॥ यद्यद्येनासृजद्देवस्तन्मे ब्रूहि तपोधन ॥ ३६ ॥ मैत्रे
य उवाच ॥ ऋग्यजुःसामाथर्वाख्यान्वेदान्पूर्वादिभिर्मुखैः ॥ शस्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात्क्रमात् ॥

उपवेदन्यायैः आश्रमान्तःवृत्तयश्च आसन् ३५ मुखतः मुखेभ्यः ३६ चातुर्होत्रसृष्टिक्रममाह शस्त्रं अप्रगीतमंत्र
स्तोत्रं होतुः कर्म इज्यां अध्वर्योः कर्म स्तुतिस्तोमं स्तुतिसंप्रगीतं स्तोमं तदर्थं ऋक्समुदायं त्रिवृत्सोमो भवतीत्यादि

विहितमुजगाप्रयोजनं प्रायश्चित्तं वाहं ३९

ततएवशब्दतनुत्वाद्ब्रह्मणः परमेश्वरोनित्यंप्रकाशतइत्याह व्यक्तावैखरी अव्यक्तःप्रणवः तदात्मनस्तस्यब्रह्मणः
परःपरमेश्वरश्चा भाति कीदृशः ब्रह्मपरिपूर्णः तत्राव्यक्तात्मनोब्रह्मरूपोविततोवभाति व्यक्तात्मनोनानाशक्त्युप
बृंहितइंद्रादिरूपोवभाति ४६ यापूर्वंनिसृष्टासाभीनीहारंतमोभवत् ततोऽपरांअनिषिद्धकामासक्तांतनुं शब्दब्रह्म

शब्दब्रह्मात्मनस्तातव्यक्ताव्यक्तात्मनःपरः ब्रह्मावभातिविततोनानाशक्त्युपबृंहितः ४६ ततोऽप
रामुपादायससर्गायमनोदधे ४७ ऋषीणांभूरिवीर्याणामपिसर्गमविस्तृतं ज्ञात्वातद्धृदयेभू
यश्चिंतयामासकौरव ४८ अहोअद्भुतमेतन्मेव्यापृतस्यापिनित्यदा नह्येधंतेप्रजानूनंदैव
मत्रविघातकं ४९ एवंयुक्तकृतस्तस्यदैवंचावेक्षतस्तदा कस्यरूपमभूद्द्वेधायत्कायमभिच
क्षते ५० ताभ्यांरूपविभागाभ्यांमिथुनंसमपद्यत ५१ यस्तुतत्रपुमान्सोऽभून्मनुःस्वायंभुवः
स्वराट् स्त्रीयासीच्छतरूपाख्यामहिष्यस्यमहात्मनः ५२ तदामिथुनधर्मेणप्रजाह्येधांबभू
विरे ५३

मनुस्तुसदास्त्येव ४७ मन्वंतरग्रहणीकारणमाह ऋषीणामित्यादिना ४८ ४९ युक्तकृतः य
थोचितंकुर्वतः अततएववस्यब्रह्मणरूपंदेहंद्विधाभूतमित्याख्यायांकायमद्याप्यभिचक्षते ५० ५१ यास्त्रीसा
स्यमहिष्यासीत् ५२ एधांबभूविरे वृद्धिंप्राप्ताः ५३ ॥

वनेस्थितास्चत्वारः तत्र वैखानसाः अकृष्टपच्यवृत्तयः वालखिल्याः नवेऽन्नेलब्धे पूर्वसं पूर्वसंचितान्नत्यागिनः औदुंब
राः प्रातरुत्थाय यां दिशं प्रथमं पश्यंति तत आहृतैः फलादिभिर्जीवंतः फेनपाः स्वयं पतितैः फलादिभिर्जीवंतः कुटीच
कः स्वाश्रमकर्मप्रधानः वहूदकः कर्मोपसर्जनीकृत्य ज्ञानप्रधानः हंसो ज्ञानाभ्याससनिष्ठः निष्क्रियः प्राप्ततत्त्वः एते चत्र
ये यथोत्तरं श्रेष्ठाः ४२ न्यायादीनां पूर्वादिक्रमेणोत्पत्तिमाह आन्वीक्षिक्याद्या मोक्षधर्मकामार्थविद्याः भूर्भुवः स्वरिति

वैखानसावालखिल्योदुंबराःफेनपावने न्यासेकुटीचकःपूर्वंवह्वोदोहंसनिष्क्रियो ४२ आन्वीक्षि
कीत्रयीवार्तादंडनीतिस्तथैवच एवंव्याहृतयश्चासन्प्रणवोयस्यदह्रतः ४३ तस्योष्णिगासील्लो
मभ्योगायत्रीचत्वचोविभोः त्रिष्टुप्मांसात्स्नुतोनुष्टुब्जगत्यस्थ्नःप्रजापतेः मज्जायाःपंक्तिरुत्पन्नाबृह
तीप्राणतोभवत् ४४ स्पर्शस्तस्याभवज्जीवःस्वरोदेहउदाहृतः ऊष्माणमिंद्रियाण्याहुरंतःस्था
बलमात्मनः स्वराःसप्तविहारेणभवंतिस्मप्रजापतेः ४५

व्यस्तास्तिस्रः समस्ताश्चतुर्थी यथाहाश्वलायनः एवं व्याहृतयः प्रोक्ता व्यस्ताः समस्ता इति यद्वा महरिति चतुर्थी तथा च श्रु
तिः भूर्भुवः स्वरिति वा एतास्तिस्रो व्याहृतयः तेषामु ह स्मैतां चतुर्थीमाहचमस्यः ऋषिः प्रवेदयते मह इतीति
हृत्स्वतः हृदयाकाशात् ४३ स्नुतः स्नायुतः अनुष्टुप् स्नावानिति श्रुतेः ४४ महाकल्पे ब्रह्मा प्रादुर्ब्रह्मणो रूपोभव
दित्युक्तं तदेव दर्शयन् वर्णानामुत्पत्तिमाह स्पर्श इति सार्द्धेन स्पर्शः कादिवर्गपंचकं स्वरः अकारादिः ऊष्माणः शषसह
चतुष्कं अंतस्था यरलवा सप्तस्वराः षड्जादयः विहारया क्रीडया ४५

भा० त० सहस्रशीर्ष्णः श्रीकृष्णस्य चरणावुपधीयेते यस्मिन् श्रीकृष्णः प्रीत्या यस्योत्संगे चरणौ प्रसारयतीत्यर्थः तमभ्यचष्ट अभ
५२ भावत प्रणीयमानस्तेन प्रवर्त्यमानः ५ ६ त्वमेकः पिता सर्वेषां यतो जन्मकृत् वृत्तिदः पोषकश्च त्वमेव अतस्तव
यद्यप्यन्यापेक्षा नास्ति अथाप्यस्माकं ते शुश्रूषा केन कर्मणा भवेत् तद्विधेहीत्युत्तरेणान्वयः ७ हे ईड्य आत्मशक्ति

श्रीशुक उवाच ॥ इति ब्रुवाणं विदुरं विनीतं सहस्रशीर्ष्णश्चरणोपधानं प्रहृष्टरोमा भगवत्क
थायां प्रणीयमानो मुनिरभ्यचष्ट ॥ १ ॥ श्रीमैत्रेय उवाच ॥ यदा स्वभार्यया साकं जातः स्वायंभुवो
मनुः प्रांजलिः प्रणतश्चेदं वेदगर्भमभाषत ॥ ६ ॥ त्वमेकः सर्वभूतानां जन्मकृद्वृत्तिदः पिता
अथापि नः प्रजानां ते शुश्रूषा केन वा भवेत् ॥ ७ ॥ तद्विधेहि नमस्तुभ्यं कर्मस्वीड्यात्मशक्तिषु यत्कृ
त्वेह यशो विष्वगमुत्र च भवेद्गतिः ॥ ८ ॥ ब्रह्मोवाच ॥ प्रीतस्तुभ्यमहं तात स्वस्ति स्ताद्वां क्षितीश्वरः य
न्निर्व्यलीकेन हृदा शाधि मेत्यात्मनार्पितं ॥ ९ ॥
षु अस्माच्छक्त्येषु कर्मसु मध्ये केन कर्मणा ते शुश्रूषा भवेत् तद्विधेहि इदं कर्तव्यमिति कथय यत्कृत्वा यस्मिन्
कृते सति विष्वक् सर्वतः ८ वां युवाभ्यां स्वस्ति भद्रं स्तात् भूयात् यद्यतः मया शाधि अनुशिक्षयेति आत्म
नास्वयमेवार्पितं निवेदितं अतः प्रीतोस्मि ९ रामराम रामराम ॥ ऽऽ ॥ ऽऽ ॥ ५२

५६

तदेवाह सचापीति ५४ पुत्रःयासांसंततिभिः॥५५॥इतितृतीयेद्वादशः॥१२॥त्रयोदशेसिसृक्षापांमनोराकस्मिकाद्भुतं
धरामुद्धर्तुंमुद्भूतात्क्रोडाद्दैत्येंद्रसूदनं १ स्वयंभुवःपुत्रःतद्देहांसत्वात् २ विष्वक्सेनोहरिरेवाश्रयोयस्यसः ३ श्रुत

सचापिशतरूपायांपंचापत्यान्यजीजनत् प्रियव्रतोत्तानपादौतिस्रःकन्याश्चभारत आकूतिर्देवहू
तीश्चप्रसूतिरितिसत्तम ५४ आकूतिंरुचयेप्रादात्कर्दमायतुमध्यमां दक्षायादात्प्रसूतिंचयत
आपूरितंजगत्॥५५॥इतिश्रीमद्भागवतेमहापुराणेतृतीयस्कंधेविदुरमैत्रेयसंवादेसृष्टिवर्णनंद्वाद
शोध्यायः॥१२॥श्रीशुकउवाच॥निशम्यवाचंवदतोमुनेःपुण्यतमांनृप॥भूयःपप्रच्छकौरव्योवासु
देवकथादृतः॥१॥विदुरउवाच॥सवैस्वायंभुवःसम्राट्प्रियःपुत्रःस्वयंभुवः प्रतिलभ्यप्रियांपत्नीं
किंचकारततोमुने २ चरितंतस्यराजर्षेरादिराजस्यसत्तमः ब्रूहिमेश्रद्दधानायविष्वक्सेनाश्रयो
ह्यसौ ३ श्रुतस्यपुंसांसुचिरश्रमस्यनन्वंजसासूरिभिरीडितोर्थः तत्तद्गुणानुश्रवणंमुकुंदपादारवि
दंहृदयेषुयेषाम् ४

स्तस्यचरितंश्रोतव्यमित्याह सुचिरंश्रमोयस्मिन् तस्यपुंसांश्रुतस्यअयमेवार्थईडितःस्तुतः तत्तुमुकुंदपादारविं
दंयेषांहृदयेषुस्थितिंतेषांभागवतानांगुणानुश्रवणं ४ रामरामरामरामरामराम ॥ऽऽ॥ ऽऽ॥ ऽऽ॥ रामराम ॥

भा० त० चिंतामेवाह सृजत इति वार्भिरद्भिः रसां रसातलं ईश्वरेण सर्गे नियुक्तैः अस्माभिः १७ मे अनुष्ठेयं स एव विदधातु संपादय
५४ तु १८ वाराहतोकः सूक्ष्मो वाराहः १९ खस्थः आकाशे स्थितः सन् २० चित्रधा अनेकधा २१ २२ एवं अंगुष्ठप्रमाणो दृ

सृजतो मे क्षितिर्वार्भिः प्लाव्यमाना रसां गता अथात्र किमनुष्ठेयमस्माभिः सर्गयोजितैः १७ यस्याहं हृ
दयादासं स ईशो विदधातु मे १८ इत्यभिध्यायतो नासाविवरात्सहसानघ वाराहतोको निरगादंगुष्ठ
प्रमाणकः १९ तस्याभिपश्यतः खस्थः क्षणेन किल भारत गजमात्रः प्रववृधे तदद्भुतमभून्महत्
२० मरीचिप्रमुखैर्विप्रैः कुमारैर्मनुना सह दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्रधा २१ किमेतत्सौक
रं व्याजं सत्वं दिव्यमवस्थितं अहो बताश्चर्यमिदं नासाया मे विनिस्सृतं २२ दृष्टोंऽगुष्ठशिरोमात्रः क्ष
णाद्गंडशिलासमः अपिस्विद्भगवानेष यज्ञो मे खेदयन्मनः २३ इति मीमांसतस्तस्य ब्रह्मणः सह सू
नुभिः भगवान्यज्ञपुरुषो जगर्जागेंद्रसन्निभः २४ ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान्
स्वगर्जितेन ककुभः प्रतिस्वनयता विभुः २५

ष्टः गंडशिला स्थूलपाषाणः तत्समः यज्ञो विष्णुः निजरूपेतिरोधानेन मे मनः खेदयन् २३ इति मीमांसमानस्य
सतः जगर्ज अगर्जयत् गिरींद्रतुल्यः २४ गर्जनप्रयोजनमाह ब्रह्माणमिति २५ ॥ ॥ ५४

अपचितिः पूजा ग्रहीत आज्ञेति शेषः सनकादयो न कुर्वंति वयं किमिति करिष्यामः इति एवंभूतो गमोमत्सरोयेभ्यः
१० गां शास स्वाधिपालयेत्यर्थः पुरुषं हरिम् ११ प्रजापालकस्य ते तुष्टो भविष्यति १२ यज्ञलिंगं यज्ञमूर्तिः अपगतो
यो यस्मात् किंचत्लक्षमायैवेत्यर्थः यद्यस्मात् आत्मैव स्वयं नादत्तः तस्मिन्नतुष्टे स्वार्थस्यैवासिद्धेः सर्वात्मकत्वाच्चतस्य १३

एतावदात्मजैर्वीरकार्याह्यपचितिर्गुरौ शक्त्याप्रमत्तैर्गृह्येत सादरं गतमत्सरैः १० सत्वमस्यामपत्यानि सदृशान्यात्मनो गुरोः उत्पाद्य शास धर्मेण गां यज्ञैः पुरुषं यज ११ परं शुश्रूषणं मह्यं स्यात्प्रजारक्षया नृप भगवांस्ते प्रजाभर्तुर्हृषीकेशोनुतुष्यति १२ येषां न तुष्टो भगवान्यज्ञलिंगो जनार्दनः॥ तेषां श्रमो ह्यपार्थाय यदात्मा नादृतः स्वयं॥१३॥मनुरुवाच॥आदेशेहं भगवतो वर्तेयामीवसूदन स्थानं त्विहानुजानीहि प्रजानां मम च प्रभो॥१४॥यदोकः सर्वसत्वानां मही मग्ना महांभसि यस्या उद्धरणे यत्नो देवदेव्या विधीयतां॥१५॥श्रीमैत्रेय उवाच॥परमेष्ठी त्वपां मध्ये तथा सन्नामवेक्ष्य गां कथमेनां समुन्नेष्य इति दध्यौ धिया चिरं॥१६

वर्तेय वर्तिष्ये अमीवसूदन पापनाशन अनुजानीहि अत्र स्यातव्यमिति अनुज्ञां देहि १४ महीं चेदत आह यदोकः स्थानं मही हे देव अस्याः देव्याः १५ सर्वपानेकृते पि पुनरकांडएवोद्भूतानामपां मध्ये सन्नां निमग्नां कथं समुन्नेष्ये उद्धरिष्यामि॥

श्रीवत्सो वाच॥पीतं मया जलं सर्वं पृथिवी च निवेशिता॥प्रजादेवासुरएत मनुष्यपशुपक्षिणः॥सरिसृपा नगानागा भूतान्युच्चावचानि च॥१॥ ५८

इति

भा०तृ० तदानींतनं समुद्रध्वनिमुत्प्रेक्षते सउदन्वान् समुद्रः आर्त इव स्तनयन् शब्दं कुर्वन् भो यज्ञेश्वर मां पाहि मामवेत्येवं चुक्रोश

५५ आर्त्तसादृश्यमाह उत्सृष्टाः प्रसारिता दीर्घाः ऊर्मय एव भुजास्तैर्विशिष्टः आर्त्तत्वे हेतुः वज्रकूटो वज्रमयः पर्वतः त

द्रूपं गं यद्भगवतः तस्य निपातवेगेन विशीर्णा कुक्षिर्यस्य ३० तदा रसायां रसातले गां पृथ्वीं ददर्श कः त्रिपरुः त्रीणि रूपं त्रि

सवनात्मकानि पर्वाणि यस्य यज्ञमूर्तिरित्यर्थः किं कुर्वन् क्षुरप्राः आयताग्राः शरास्तत्सदृशैः क्षुरैः अपोदरयन् क

स वज्रकूटांगनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान् उत्सृष्टदीर्घोर्मिभुजैरिवा

र्त्तश्चुक्रोश यज्ञेश्वर पाहि मेति ३० खुरैः क्षुरप्रैर्दरयंस्तदाप उत्पारपारं त्रिपरू रसायाम्

ददर्श गां तत्र सुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त ३१ स्वदंष्ट्रयोद्धृत्य महीं निमग्नां

स उत्थितः संरुरुचे रसायाः ३२

थं उत्पारपारं उत्पारा एनं पारमन्यानामप्यपां पारं अवसानं यथा भवति तथा विदारयन् कथंभूतां अग्रे प्रलयसमये

तत्र तास्वप्सु सुषुप्सुः शिशयिषुः सन् जीवाधीयन्ते यस्यां सर्वजीवाधारभूतां यां स्वयमभ्यधत्त आभिमुख्येन दधार

जठरे धृतवानित्यर्थः अनेन तदुद्धरणे अनेनत्तदुद्धरणे नायासं द्योतयति ३१ रसायाः सकाशादुत्थितः संरुरुचे स

म्यक् शोभते ३२ ५५

घर्घरितं तज्जात्यनुकरणध्वनि अनिश्चयेनयः स्वखेदस्यहृत्यविष्णुः तपयिष्णु नाशकं तेइतिपुनरुक्तिः प्रसि
द्धिख्यापनार्थं त्रिभिः पवित्रैः ऋग्यजुःसामभिर्मंत्रैरस्तुवन् २६ वेदैर्वितन्यते तत्तूयते मूर्त्तिर्यस्य अतएववात्मयोगगुण
नुवादंतीतितथा तेषांब्रह्मउच्चारितवेदमवधा[illegible]र्यज्ञात्वा २७ कथंभूतःसन् विशेषेत्याये तेताभ्यामाह द्वाभ्यां

निशम्य ते घर्घरितं स्वखेदक्षयिष्णु मायामयसूकरस्य जनस्तपःसत्यनिवासिनस्ते त्रिभिः
पवित्रैर्मुनयोगृणन्स्म २६ तेषां सतां वेदवितानमूर्त्तिर्ब्रह्मावधार्यात्मगुणानुवादं विनद्य भू
योविबुधोदयाय गजेंद्रलीलोजलमाविवेश २७ उत्क्षिप्तवालः खचरः कठोरः सटा विधु
न्वन्खररोमशत्वक् खुराहताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बभासे भगवान्महीध्रः २८ घ्राणेन
पृथ्व्याः पदवीं विजिघ्रन् क्रोडापदेशः स्वयमध्वरांगः करालदंष्ट्रोप्यकरालदृग्भ्यामुद्वीक्ष्य
विप्रान्गृणतोविशत्कम् २९

उत्क्षिप्तोवालः पुच्छं येनखचरः आकाशचारी कठोरः कठिनः सटाः स्कंधवालान् खराणितीव्राणिरोमाणियस्यांसा
त्वक्यस्यखुरैराहतानि अभ्राणियेन सितदंष्ट्रः अतिशुक्लोदंष्ट्रः ईक्षातीरीक्षणमेवज्योतिः आलोकोयस्यतदाप्रका
शांतराभावात्वभाशेऽशोभत महीध्रः पृथिव्याउद्धर्त्ता २८ क्रोडापदेशः वाराहच्छद्मास्वयमध्वरांगोपियमुरिव

घ्राणेनविजिघ्रन्गृणन्स्तोतॄन्विप्रान्उद्धीक्ष्यऊर्द्धं
वीक्ष्यकंजलमाविशत् २९

भा०त०
५६

स्रुक्तुंडः तुंडे मुखाग्रे स्रुवो नासिकयोः इडा भक्षणपात्रं चमसा ग्रहाश्च सोमपात्राणि प्राशित्रं ब्रह्मभागपात्रं ग्रसते
अनेनेति ग्रसनं मुखांतर्वर्त्ति छिद्रं चर्वणं भक्षणं ३७ दीक्षा दीक्षणीयेष्टिः अनुजन्म वारं वारं अभिव्यक्तिः उपस
दः तिस्रः इष्टयः शिरोधरा ग्रीवा प्रायणीया दीक्षानंतरेष्टिः उदयनीया समाप्तीष्टिः तेयेव दंष्ट्रे यस्य प्रवर्ग्यो महावीरः
प्रत्युपसदः पूर्वं क्रियते सभ्यो होमरहितोग्निः आवसथ्यं औपासनाग्निः तयोर्द्वंद्वैक्यं तत्तव क्रतुरूपस्य शीर्षं

स्रुक्तुंड आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरंध्रे प्राशित्रमास्ये ग्रसने ग्रहास्तु ये चर्वणं
ते भगवन्नग्निहोत्रं ३७ दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः जिह्वा प्रवर्ग्य
स्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोसवो हि ते ३८ सोमस्तु रेतः सवनान्यवस्थितिः संस्थावि
भेदास्तव सप्तधातवः सत्राणि सर्वाणि शरीरसंधिस्त्वं सर्वयज्ञक्रतुरिष्टिबंधनः ३९

शिरः चितयः इष्टिकाचयनानि पंच असवः प्राणाः ३८ प्रातःसवनादीनि अवस्थिति आसनं बाल्याद्यवस्थाना अग्नि
ष्टोमोत्यग्निष्टोमः उक्थ्यः षोडशी वाजपेयोतिरात्र आप्तोर्यामइति सप्त संस्थाविभेदाः त्वङ्मांसादि सप्त धातवः
सत्राणि द्वादशाहादीनि बहुयागसंघातरूपाणि असोमपा यज्ञाः ससोमाः क्रतवः तद्रूपस्त्वं इष्टिर्यजन
मनुष्ठानम् तदेव बंधनं यस्य सः ३९ ॥ ऽऽ

५६

तत्रापि त्वं भसि गदयामुद्यम्यागच्छंतं रुंधानं प्रतिघ्नंतं नसह्यः सहनार्हो विक्रमो यस्य तं दैत्यं सुनाभं चक्रं तेन दृप्तः
दीपितस्तीव्रो मन्युर्यस्य यद्वा मयि विद्यमाने किमिति परिभवं सहस इति सुनाभेन संदीपितेतीव्रमन्युः स भगवान् सिंहो ग
जं लीलया यथा तद्वत् जघान गजेंद्रो जगतीं क्रोडया विदारयन् गैरिकया यथाऽरुणगंडतुंडो भवति तथा तस्य रक्तमेव पं
कस्तेनांकितौ गंडौ तुंडं च यस्य जघानेति पूर्वेणान्वयः ३३ प्रज्ञाय बद्धांजलयोऽनुवाकैर्वैदिकसूक्तैस्तस्य दृश्यो वाक्यैस्तुष्टुवुः

तत्रापि दैत्यं गदयापतंतं सुनाभसंदीपिततीव्रमन्युः जघान रुंधानमसह्यविक्रमं स लीलयेभं मृगरा
डिवांभसि तद्रक्तपंकांकितगंडतुंडो यथा मृगेंद्रो जगतीं विभिंदन् ३३ तमालनीलं सितदंतको
ट्या क्ष्मामुद्धरंतं गजलीलयांग प्रज्ञाय बद्धांजलयोऽनुवाकैर्विरिंचिमुख्या उपतस्थुरीशं ३४ ॥ऋ
षय ऊचुः ॥ जितं जितं ते जित यज्ञभावन त्रयीं तनुं स्वां परिधुन्वते नमः यद्रोमगर्तेषु निलिल्युरध्व
रास्तस्मै नमः कारणसूकरात्मने ३५ रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकं छं
दांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वंघ्रिषु चातुर्होत्रं ३६

यते

३४ भो अजित ते तव याजितं जितमिति संभ्रमे
सा यज्ञैर्भाव्यते आक्रियते रतितथा त्रयीं वेदमयीं निलिल्युः लीनप्रायाः कारणं पृथ्व्युद्धरणं तेन सूकराय ३५ यज्ञा
त्मतां प्रपंचयंतः स्तुवंति रूपमित्यादिचतुर्भिः छंदांसि गायत्र्यादीनि यज्ञांगभूत छंद आद्यनुवादेन भगवेद्वय
य वता विधीयंते बर्हिःशब्दे दीर्घाभाव आर्षः दृशि च सुषि चातुर्होत्रं होत्रादिकर्मचतुष्टयं ३६

द्दंचत्वयाअतिदुष्करंकृतमित्याहुः कइति हेप्रभोनचेत्त्वयाकृतंभवउद्विवर्हणं उद्धरणंतदन्यःकःश्रद्दधीतस्पृह
येत् अध्यवस्येत्यर्थः त्वयिपुनरसौविस्मयोनभवति यतोविश्वेसर्वेविस्मयायस्मिन् कुतः योभवान् अतिविस्मयत्र
त्यद्भुतमिदंविश्वंक्रियाविशेषणंवा ससृजेसृष्टवान् ४४ विस्मयंदर्शयंतःप्रार्थयंते विधुन्वतेति द्वाभ्यां सटानां

कःश्रद्दधीतान्यतमस्तवप्रभोरसांगतायाभुवउद्विवर्हणं नविस्मयोसौत्वयिविश्वविस्मये
योमाययेदंससृजेतिविस्मयं ४४ विधुन्वतावेदमयंनिजंवपुर्जनस्तपःसत्यनिवासिनोवयं
सटाशिखोद्धूतशिवांबुबिंदुभिर्विमृज्यमानाभृशमीशपाविताः ४५ सवैवतभ्रष्टमतिस्तवैषते
यःकर्मणांपारमपारकर्मणः यद्योगमायागुणयोगमोहितंविश्वंसमस्तंभगवन्विधेहिशं ४६
श्रीमैत्रेयउवाच इत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः सलिलेस्वखुराक्रांतउपाधत्तावितावनिम् ४७

शिखाभिः रोमैरुद्धूताः उच्छलिताः येशिवा अंबुबिंदवः तैःसिच्यमानाः वयंपवित्रीकृताः ४५
तवकर्मणांपारंयएषतेऽवलोकयतिज्ञातुमिच्छतीत्यर्थः यस्यतवयोगमाययायोगुणेःसहयोगस्तेनमोहितं यतोवि
श्वस्यमंगलंविधेहि यथात्वामविचिंत्यानंतशक्तिंज्ञात्वाभजेत् तथानुग्रहाणेत्यर्थः ४६ उपस्थीयमानः स्वखुराक्रां
तइतिजलेपिधारणशक्त्याधानेदर्शयति अवितारक्षकः ४७ ॥ ॥ रामरामरामरामरामराम ॥

पूर्वोक्तमेवं सपरिकरं कीर्तयंतः प्रणमंति नमो नम इति अखिलमंत्रादिरूपाय क्रियात्मने सामान्यव्यापाररूपाय किंच
वैराग्यं उक्तकर्मसाध्या सत्वशुद्धिः ततो भक्तिः ततः आत्मजयः चित्तस्थैर्यं तेन अनुभावितं साक्षात्कृतं यज्ज्ञानं तस्मै
एवंभूतज्ञानप्रदाय गुरवे च ४० हे भूधर सभूधरा सपर्वता वनादुदकान्निर्गच्छतो गजेंद्रस्य तदा दंतेन ४१ त्वयाधृता
भूर्विराजते इत्युक्तं इदानीं भूमंडलेन त्वद्रूपं विराजत इत्याहुः त्रयीति अथेत्यर्थांतरे नेदं रूपं दंतेन धृतं यद्भूमंडलं

नमो नमस्तेखिलमंत्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने वैराग्यभक्त्यात्मजयानुभावितज्ञानाय
विद्यागुरवे नमो नमः ४० दंष्ट्राग्रकोट्या भगवंस्त्वयाधृता विराजते भूधर भूः सभूधरा यथा वना
न्निःसरतो दताधृता मतंगजेंद्रस्य सपत्रपद्मिनी ४१ त्रयीमयं रूपमिदं च शौकरं भूमंडलेनाथ दताधृतेन ते
चकास्ति शृंगोढघनेन भूयसा कुलाचलेंद्रस्य यथैव विभ्रमः ४२ संस्थापयैनां जगतां सतस्थुषां
लोकाय पत्नीमसि मातरं पिता विधेम चास्यै नमसा सह त्वया यस्यां स्वतेजोग्निमिवारणावधाः ४३

तेन च कास्ति शोभते शृंगेण ऊढो धृतो योघनः तेन भूयसा अतिमहता विभ्रमो विलासः ४२ लोकाय वासस्थानार्थं ते प
त्नीं जगतां मातरं यतस्त्वं पितासि एवं सति तत्र स्थिताः संतः त्वया पित्रा सह अस्यै मात्रे नमसा विधेम नमनं करिष्यामः
नमस्कारेण परिचरेमेति वा स्वतेजः धारणशक्तिं याज्ञिकाः मंत्रतोग्निमरणाविव अधानिहितवानसि ४३ ॥

नी ३

भा० तृ० चतुर्दशे निदानं तु तद्वधे वक्तुमुच्यते संध्यायां कश्यपाद्गर्भः संभवं कामतो दितेः १ तेनैव येन भूमिरुद्धृता अनुशुश्रु
५८ मत्वेनानुखात् २ मृधः युद्धं ३ साधु त्वे हेतुः यत्त्वं यस्मात्त्वं हरेरवतारकथां पृच्छसीति मृत्योः पाशं विशातयति मो
चयतीति तया तदेव दर्शयति ययाकथया उत्तानपदः पुत्रः ध्रुवः मुनिना नारदेन अर्भक एव यदा ध्रुवाय स्तुतं नारदादिभि

श्रीशुक उवाच ॥ निशाम्य कौषारविणोपवर्णितां हरेः कथां कारणसूकरात्मनः पुनस्स पप्रच्छत
मुद्यतांजलिर्न चातितृप्तो विदुरो धृतव्रतः १ ॥ विदुर उवाच ॥ तेनैव तु मुनिश्रेष्ठ हरिणा यज्ञमूर्
तिना आदिदैत्यो हिरण्याक्षो हत इत्यनुशुश्रुम २ तस्य चोद्धरतः क्षौणीं स्वदंष्ट्राग्रेण लीलया दै
९४ त्यराजस्य च ब्रह्मन् कस्माद्धेतोरभून्मृधः ३ ॥ श्रीमैत्रेय उवाच ॥ साधु वीर त्वया पृष्टमवतारकथां हरेः
यत्त्वं पृच्छसि मर्त्यानां मृत्युपाशविशातनीं ४ ययोत्तानपदः पुत्रो मुनिना गीतयार्भकः मृत्योः कृ
त्वैव मूर्ध्न्यंघ्रिमारुरोह हरेः पदं ५ अथात्रापीतिहासोयं श्रुतो मे वर्णितः पुरा ब्रह्मणा देवदेवेन देवाना
मनुपृच्छतां ६

विमानमानीय तं तदास्य देहत्यागोपेक्षितः स्यादिति मत्वा मृत्याक्रान्तेपि देहं न त्याज
किं तु सोपानवत्स्य मृत्योर्मूर्ध्नि पदं दत्वा विमानमारुह्य विष्णुपदमारूढः वक्ष्यतीति हि परीत्याभ्यर्च्य धिष्ण्याग्र्यं हातस्व
स्त्ययने द्विजैः इत्येवं तदधिष्ठितं तु विभ्रद्रूपं हिरण्मयमिति ५ तयोः संग्रामे हेतुं वक्तुं इतिहासं प्रस्तौति अनुपृच्छतां देवा

५८

४८ कथनीयानिमायिनोमायावंतिचरित्राणियस्य श्रवयेत्तद्गुणवत्मार्थं उशतींकमनीयां हृदिप्रसीदतिमनसि
संतुष्यतीत्यर्थः ४९ यद्यपिसुलभाः तथापिनप्रार्थनीयाइत्याह ताभिराशीभिरलं लवात्मभिः तुच्छाभिः नचतद्
भजनस्यैवफलत्वंशंकनीयमित्याह भगवद्भजनव्यतिरेकेणफलांतरदृष्टिंविना भजतांस्वपदप्राप्तिंस्वयमेवविधत्ते गु

सइत्थंभगवानुर्वींविष्वक्सेनःप्रजापतिः रसायालीलयोन्नीतामप्सुन्यस्यययौहरिः ४८
यएवमेतांहरिमेधसोहरेःकथांसुभद्रांकथनीयमायिनः शृण्वीतभक्त्याश्रवयेतवोशतींज
नार्दनोस्याशुहृदिप्रसीदति ४९ तस्मिन्प्रसन्नेसकलाशिषांप्रभौकिंदुर्लभंताभिरलंलवात्म
भिः अनन्यदृष्ट्याभजतांगुहाशयःस्वयंविधत्तेस्वगतिंपरःपरां ५० कोनामलोकेपुरुषार्थसा
रवित्पुराकथानांभगवत्कथासुधां आपीयकर्णांजलिभिर्भवापहामहोविरज्येतविनानरेत
रं ५१ इतिश्रीमद्भागवतेमहापुराणेतृतीयस्कंधेविदुरमैत्रेयसंवादेसूकरचरित्रेत्रयोदशोध्यायः १३

हाशयत्वादहैतुकीभक्तिंजानन् ५० अतःकोनामपुराकथानांपूर्ववृत्तानांमध्येकथंचिदापीयविरज्येतविर
मेत् नरेतरंपशुंविना ५१ इतिश्रीतृतीयेत्रयोदशोध्यायः १३ रामरामरामरामरामरामरामरामरामरामराम ॥

भा० टी० अयंभावः त्रयोदशानामप्यस्माकंत्वयिभावसाम्येवैषम्याच रएतवानुचिंतमिति १२ मोघंनभवतिमहीयसित्वाद
५१७ शोमहत्तमे १३ प्रवृद्धानंगेन कश्मलंमोहोयस्यास्ता १४ सर्वाश्रमानुपादायेतितान्‌ संध्याकालवंचनायभार्यांप्र
शंस एषइतिपंचभिः वृत्तःयस्याःसकाशात्‌ १५ सर्वाश्रमानुपादायेतितान्‌ यन्त्रादिदानेनकृच्छ्रेनस्तारयन्‌ स्वयं

सविदित्वात्मजातांनोभावंसंतानभावनः त्रयोदशदुरंतास्तांयास्तेशीलमनुव्रताः १२ अ
थमेकुरुकल्याणकामंकंजविलोचन आर्त्तोपसर्पणंभूमन्नमोघंहिमहीयसि १३ इतितांवी
रमारीचःकृपणांबहुभाषिणीं प्रत्याहाऽनुनयन्वाचाप्रवृद्धानंगकश्मलां १४ एषतेहंविधास्या
न४ मिप्रियंभीरुयदिच्छसि तस्याःकामंकःकुर्यात्सिद्धिस्त्रैवर्गिकीयतः १५ सर्वाश्रमानुपाद
यस्वाश्रमेणकलत्रवान्‌ व्यसनार्णवमत्येतिजलयानैर्यथार्णवं १६ यामाहुरात्मनोह्यर्द्धंश्रेय
स्कामस्यमानिनी यस्यांस्वधुरमध्यस्यपुमांश्चरतिविज्वरः १७ यामाश्रित्येंद्रियारातीन्‌ दुर्जया
र:६ नितराश्रमैः वयंजयेमहेलाभिर्दस्यून्दुर्गपतिर्यथा १८

तरतीत्यर्थः १६ आत्मनोदेहस्यार्द्धंकर्मस्वर्द्धयोः महाधिकारात्‌ यच्छ्रुतानांतांतामितितृतीयश्लोकेनसं
बंधः स्वधुरंदृष्टादृष्टकर्मभारंविज्वरःनिश्चिंतः १७ हेलाभिर्लीलाभिःजयेमेतिसभार्य्यस्येंद्रियाणिप्रायो

४

५१७

देवप्रश्नप्रस्तावाय प्रथमं हिरण्याक्षहिरण्यकशिपूत्पत्तिप्रसंगमाह दितिरित्यादिना यावदध्यायसमाप्ति
मरीचेः पुत्रं कश्यपं हृच्छयः कामः तेनार्दिता अतः संध्यायामेव कामितवती तदप्यग्निशालायां तत्रापि समाहितं अ
ग्निजिह्वा यस्य यजुषां यज्ञानां पतिं पुरुषं श्रीमद्धरिं विष्णुं ७ कृपणं वक्तुमाषिण्यैहितलिवद्यति तत्र एष मामिति द्वाभ्यां

दितिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं पतिं अपत्यकामा चकमे संध्यायां हृच्छयार्दिता ॥ इष्ट्वाग्नि
जिह्वं पयसा पुरुषं यजुषां पतिं निम्लोचत्यर्क आसीनमग्न्यागारे समाहितं ॥७॥ दितिरुवाच ॥ एष मां
त्वत्कृते विद्वन्काम आत्तशरासनः दुनोति दीनां विक्रम्य रंभामिव मतंगजः ॥ ८ तद्भवान्दह्यमा
नायां सपत्नीनां समृद्धिभिः प्रजावतीनां भद्रं ते मय्यायुंक्तामनुग्रहं ९ भर्तर्याप्तोरुमानानां
लोकानाविशते यशः पतिर्भवद्विधो यासां प्रजया ननु जायते १० पुरा पिता नो भगवान्दक्षो
दुहितृवत्सलः कं वृणीत वरं वत्सा इत्यपृच्छत नः पृथक् ११

कार्पण्यं भर्त्रीति चतुर्भिः एष वक्तुमाषणं वर्ण्यते दुनोति पीडयति विक्रम्य शौर्य्यमाविर्भाव्य रंभा कदली ८ आयुंक्तां स
र्वतो युनक्तु सम्यक् करोतु ९ भर्त्तरि प्राप्त उरुमानो मानो यासां स्त्रीणां यशो लोकान् आविशते व्याप्नोति प्रजया पुत्ररूपेण तत्
ज्जायाया भवतीति यदस्यां जायते पुनरिति श्रुतेः १० नोऽस्माकं पिता नोऽस्माकं पृथक् अपृच्छत् ११ ॥ ऽऽ ॥ ऽऽ

भा० स्त०
टी०

ननु तथापि महत्त्वेनादरणीयस्य स्वजनस्य च नवसंकेत्तमेनैव तत्राह यस्य स्वजनादिनास्ति सम त्वादीश्वरस्यै
श्वर्य्यमेवाह येन चरणेनो पविद्धं निर्माल्यवद्दूरं त्यक्तांतेन भुक्ता भोगा मज्जंतमायां न न्यायी विभूतिं महत्त्वमसा
दृढत्या शास्महे व्रते स्तमाराध्यः २४ अनि सिद्धसुखत्यागादसौ पिशाचइत्युपहासो न कार्य्य इत्याह हा
न्यां यस्य अनवद्यं विषयाशक्तिशून्यं आचरितं विभिक्तवः भेत्तुमिष्टवः २५ समीहितं अभिप्रेतं लोकशि

न यस्य लोके स्वजनः परो वा नात्यादृतो नोत कश्चिद्विगर्ह्यः वयं व्रतैर्यच्चरणापविद्धामा
शास्महे जांवत भुक्तभोगां २४ यस्यानवद्याचरितं मनीषिणो गृणंत्यविद्यापटलं बिभित्सवः
निरस्तसाम्यातिशयोपि यत्स्वयं पिशाचचर्यामचरद्गतिः सतां २५ हसंति यस्याचरितं हि दु
र्भगाः स्वात्मन्रतस्याविदुषः समीहितं यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयोप
लालितं २६ ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं च माया आज्ञाकरी यस्य पिशाच
चर्या अहो विभूम्नश्चरितं विडंबनम् २७

तादृशं अविद्वांसः यद्वा न विद्वान् यस्मादिति तस्य सर्वेस्येत्यर्थः दुर्भगा नेवाह येरिति श्वभोजनं पशुनां भोज्यं
शरीरं स्वात्मतया अयमेवात्मेति बुध्या २६ अहो अतर्क्यं तस्याचरणमित्याह ब्रह्मादयो येन कृतान्सेतून् स्व
स्वाधिकारान् पालयंति यः कारणं यस्य येन कृतमिदं विश्वं माया च यस्याज्ञाकरी विभूम्नः परमेश्वरस्य विडं

टी० बनमनुकरणमतर्क्यमित्यर्थः २७

तां अनेकोपकारकं त्वां कार्त्स्न्येन अनुकर्तुं प्रत्युपकारैस्त्वत्सदृशीभवितुं न प्रभवः न समर्थाः येचान्ये गुणगृध्रवः गु
णप्रियास्तेपि न समर्थाः संपूर्णेनाप्यायुषा वार्धक्यान्तं मांसलैरपि न प्रभवः इत्युक्तं भवति १९ यद्यपि त्वदनुकरणम
शक्यं प्रजात्यैपुत्रोत्पत्त्यै नातिवोचं तिन निन्दंति प्रतिपालय प्रतीक्षस्व २० निंदां नगणयंती भीषयमाणः श्रीरुद्रम
नुवर्णयति एषेति सप्तभिः घोराणामेषावेलास्वयं च घोरदर्शना २१ भूतपर्षद्भिः भूतगणैः २२ नहि नसंमुखत्वमात्रं

नवयं प्रभवस्तां त्वामनुकर्तुं गृहेश्वरि अप्यायुषा वा कार्त्स्न्येन ये चान्ये गुणगृध्रवः १९ अथापि
काममेतत्ते प्रजात्यै करवाण्यलं यथा मां नातिवोचंति मुहूर्तं प्रतिपालय २० एषा घोरतमा वे
ला घोराणां घोरदर्शना चरंति यस्यां भूतानि भूतेशानुचराणिह २१ एतस्यां साध्वि संध्यायां
भगवान्भूतभावनः परीतो भूतपर्षद्भिर्वृषेणाटति भूतराट् २२ श्मशानचक्रानिलधूलिधूम्र
विकीर्णविद्योतजटाकलापः भस्मावगुंठामलरुक्मदेहो देवस्त्रिभिः पश्यति देवरस्ते २३

वर्जनीयमिति चेत्तत्राह श्मशाने यश्चक्रानिलः वातमंडली तस्मिन्या धूलिस्तया धूम्रः विकीर्णो विक्षिप्तः विद्योतो
द्युतिमान् जटाकलापो यस्य भस्मनावगुंठः प्रावृतः अमलरुक्मवद्देहो यस्य सदेवः त्रिभिः सोमार्काग्निनेत्रैः पश्यती
त्यस्योत्तरश्लोकत्रयेप्यनुषंगः एकस्य जामातारः परस्परं भ्रातरो व्यवह्रियंते अतो मम भ्राता तास्ते सो न वदेवरः इति लज्जार्थे पुष्प २३

भा० टी०
६१

स्वसर्गस्य स्वसंतानस्य आशिषं शुभं लोक्यां लोकहृद्यां हीं संध्यायां योनियमः स निवृत्तो यस्य ३५ ते आत्मनश्चित्तस्या
प्रायत्यादशुचित्वात् मौहूर्त्तिकाद्दोषात् संध्यारूपात् उत अपि मम निर्देशस्याज्ञाया अतिचारेण अतिक्रमेण
देवानां रुद्रानुचराणां तैश्चतु सिद्धैः त्वुभिः जाठराधमौ पुत्रौ प सदौ हे चंडि कोपने ३६ हन्यमानानां शतपर्वधृक् वज्र

श्री मै० उ० च स्वसर्गस्याशिषं लोक्यामाशासानां प्रवेपतीं निवृत्तसंध्यानियमो भार्य्यामाह प्रजा
पतिः ३५ क० प० वा० अप्रायत्यादात्मनस्ते दोषान्मौहूर्त्तिकादुत मन्निदेशातिचारेण
देवानां चैव हेलनात् भविष्यतस्तवाभद्रावभद्रे जाठराधमौ लोकान्सपालांस्त्रींश्चंडि मुहुराक्रं
दयिष्यतः ३६ प्राणिनां हन्यमानानां दीनानामकृतागसां स्त्रीणां निगृह्यमाणानां कोपितेषु महा
त्मसु तदा विश्वेश्वरः क्रुद्धो भगवांल्लोकभावनः हनिष्यत्यवतीर्यासौ यथाद्रीन्छतपर्वधृक् ३७
दि० रु० च वधं भगवता साक्षात्सुनाभोदारबाहुना आशासे पुत्रयोर्मह्यं मा क्रुद्धाद्ब्राह्मणात्प्रभो
३८ न ब्रह्मदंडदग्धस्य न भूतभयदस्य च नारकाश्चानुगृह्णंति यां यां योनिमसौ गतः ३९

धरः इंद्रः ३७ सुनाभेनोदारो बाहुर्यस्य मह्यं मम कोपिते पित्युक्तत्वात् शंकितचित्ता सति प्रार्थयते ब्राह्मणान्मा
भूदिति ३८ नारका अपि तत्थायां यां योनिमसौ गतो भवति तत्रस्याश्च नानुगृह्णंति कृपां न कुर्वंति ३९ ॥ ss

६१

मज्जोदानि रूपकेण एवं संविदिते ज्ञापितेपि सति वृषलीव देश्येव २८ विकर्मणि निषिद्धे दिष्टाय दैवरूपायेश्वराय उपवि
वेशेति मैथुनं लक्षते २९ उपस्पृश्य स्नात्वा गर्भरक्षार्थं विरजं ज्योतिर्ध्यायन् सनातनं ब्रह्मगायत्री प्रणवं वा जजाप ३०
कर्मावद्येन कर्मदोषेण ३१ न अवधीत् मा हन्त्वित्यर्थः वधशंकाबीजमाह रुद्र इति अंहसं अंहः अपराधं अकरवं कृ

श्रीमैत्रेय उवाच ॥ स एवं संविदिते भर्त्रा मन्मथोन्मथितेंद्रिया जग्राह वासो ब्रह्मर्षेर्वृषलीव गतत्रपा २८ सवि
दित्वाथ भार्यायास्तं निर्बंधं विकर्मणि नत्वा दिष्टाय रहसि तयाथोपविवेश ह २९ अथोपस्पृश्य सलिलं
प्राणानायम्य वाग्यतः ध्यायन् जजाप विरजं ब्रह्म ज्योतिः सनातनं ३० दितिस्तु व्रीडिता तेन कर्मावद्येन
भारत उपसंगम्य विप्रर्षिमधोमुख्यभ्यभाषत ॥ ३१ ॥ दितिरुवाच ॥ न मे गर्भमिमं ब्रह्मन् भूतानामृषभो
वधीत् रुद्रः पतिर्हि भूतानां यस्याकरवमंहसं ॥ ३२ ॥ नमो रुद्राय महते देवायोग्राय मीढुषे शिवाय न्य
स्तदंडाय धृतदंडाय मन्यवे ३३ स नः प्रसीदतां भामो भगवानुर्व्वनुग्रहः व्याधस्याप्यनुकंप्यानां स्त्रीणां देवः सतीपतिः ३४

तवत्यस्मि ३२ रुत् दुःखं तत् द्रावयतीति रुद्रः तस्मै उग्राय अनतिलंघ्याय मीढुषे सकामेषु
फलसेचनकर्त्रे निष्कामेषु शिवाय वस्तुतो न्यस्तदंडाय दुष्टेषु धृतदंडाय संहारिमन्यवे ३३ भामो भामिनीभर्त्ता
उरुः अनुग्रहो यस्य व्याधस्य निर्दयस्यापि सतीपतिरित्यनेन स्त्रीणां स्वभावं स्वयमर्पितेनो सूचयति ३४

भा०तृ०

६२

महाभागवतत्वमाह आत्मप्रद इति शीलधरः सुस्वभावः गुणानां धैर्यादीनामाकरो जन्मभूमिः परेषां समृद्ध्या हृष्टः
परेषु दुःखितेषु सत्सु व्यथितो न भूतो जातः शत्रुर्यस्य निदाघभवं तापं चन्द्रो यथा हरति एवं जगतः शोकहर्त्ता भविष्यति ४९ अपरि
च्छिन्नदृष्टित्वमाह अन्तरिति स्वपुरुषाणामिच्छया पुनः पुनर्गृहीतानि रूपाणि येन श्रीरेव ललना सुन्दरी तस्या ललामं मण्डनं द्र

आत्मप्रदः शीलधरो गुणाकरो हृष्टः परर्द्ध्या व्यथितो दुःखितेषु ॥ अभूतशत्रुर्जगतः शोकहर्त्ता नै
दाघिकं तापमिवोडुराजः ॥४९॥ अन्तर्बहिश्चामलमब्जनेत्रं स्वपूरुषेच्छानुगृहीतरूपं ॥ पौत्रस्तव श्री
ललनाललामं द्रष्टा स्फुरत्कुण्डलमण्डिताननं ॥५०॥ श्रीमैत्रेय उवाच ॥ श्रुत्वा भागवतं पौत्रममोदत दि
तिर्भृशं पुत्रयोश्च वधं कृष्णाद्विदित्वासीन्महामनाः ॥५१॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कं
धे विदुरमैत्रेयसंवादे दितिगर्भाधाने चतुर्दशोऽध्यायः ॥१४॥ श्रीमैत्रेय उवाच ॥ प्राजापत्यं हि तत्तेजः परतेजो
हनं दितिः दधार वर्षाणि शतं शंकमाना सुरार्दनात् ॥१॥

छाद्रक्ष्यति ५० महामनाः सोत्साहचित्ता हरिणा
सह युद्धेन मरणे पुत्रयोः सत्कीर्त्तिः महती स्यादिति ५१ इति श्रीतृतीये चतुर्दशः ॥१४॥ हतप्रभैः सुरैः पृष्टः प्राह पंच
दशे विधिः तद्बीजं विप्रशापाद्वै कुंठे विष्णुभृत्ययोः तदेवं देवानां ब्रह्मणश्च संवादप्रस्तावमस्तके इदानीं तं संवादं वक्तु
माह प्राजापत्यं काश्यपं तेजो वीर्यं परेषां तेजो हन्ती तितघा आर्षिः स्वपुत्राभ्यां करिष्यते यत्सुराणां अर्द्दनं पीडनं

६२

कृतो योऽपराधस्तेन शोकः ततोऽनुतापस्तेन प्रत्यवमर्शनात् युक्तायुक्तविचारात् भगवति हरौ भवे श्रीरुद्रे च तैः पंचभिः कारणैः पुत्रस्य हिरण्यकशिपोः पुत्राणां मध्ये एकः सतां मतो भविष्यति ४० तमेव वर्णयति गास्यंतीति सार्द्धैः पंचभिः समं सहस्रदृक् यथा हीनवर्णं हेम यथा योगैर्दाहादिभिरुपायैः शोध्यते तथा यस्य शीलं स्वभावं अनुगंतं प्राप्तुं निर्वैरादिभिः योगैरात्मानं भावयिष्यंति शोधयिष्यंति २ विश्वप्रसादे हेतुः यदात्मकं स्वदृक् आत्मसाक्षी यस्यानन्यया भगवाने

कश्यप उवाच ॥ कृतशोकानुतापेन सद्यः प्रत्यवमर्शनात् भगवत्युरुमानाच्च भवे मय्यपि चादरात् पुत्रस्यैव तु पुत्राणां भवितैकः सतां मतः ४० गास्यंति यद्यशः शुद्धं भगवद्यशसा समं योगैर्हेमेव दुर्वर्णं भावयिष्यंति साधवः निर्वैरादिभिरात्मानं यच्छीलमनुवर्तितुं २ यत्प्रसादादिदं विश्वं प्रसीदति यदात्मकं स स्वदृग्भगवान्यस्य तोष्यतेनन्यया दृशा ३ स वै महाभागवतो महात्मा महानुभावो महतां महिष्टः प्रवृद्धभक्त्या ह्यनुभाविताशये निवेश्य वैकुंठमिमं विहास्यति ४१ ६२

व स तस्य इत्येवं भक्त्या दृशा तोष्यते तोषं प्राप्य ते ३ तत्र हेतुः स वा इति महात्मा अपरिछिन्नदृष्टिः महानुभावः महतामपि मध्ये महिष्टः अतिशयेन महान् प्रवृद्धया भक्त्यानुभाविते संशोधिते चित्ते वैकुंठं हरिं निवेश्य देहाद्यभिमानं त्यक्ष्यति ४२ राम राम राम ॥ ६६

भा० त०
६२
अन्येतु नित्यं कर्मक्लेशिन इत्याहुः यस्येति तंत्या दाम्ना आयत्ता अधीनाः मुख्याय नियंत्रे प्राणरूपायेति वा तथा च श्रुतिः
तस्य वाकंतिर्नामानि दामानीत्यादि ७ तमसा अहोरात्रविभागाभावेन लुप्तानि कर्माणि येषां आपन्नान् आपद्गता
न अस्मान् ८ आपत्कारणमाहुः एष गर्भः तस्य विशेषणं अर्पितं निहितं काश्यपमोजो वीर्यं दिशस्तिमिरय

यस्य वाचा प्रजाः सर्वा गावस्तंत्येव यंत्रिताः हरंति वलिमायत्तास्तस्मै मुख्याय ते नमः ७ सत्वं विध
प३
त्स्व शं भूमन् लोकानां लुप्तकर्मणां अदभ्रदयया दृष्ट्या आपन्नान् अर्हसीक्षितुं ८ एष देव दितेर्गर्भ
ओजः काश्यपमर्पितं दिशस्तिमिरयन्सर्वा वर्द्धते ग्निरिवैधसि ॥ ९ ॥ श्रीमैत्रेय उवाच ॥ स प्रहस्य महाबा
हो भगवांछब्दगोचरः प्रत्याचष्टात्मभूर्देवान्प्रीणन् रुचिरया गिरा ॥ १० ॥ श्रीब्रह्मोवाच ॥ मानसा मे
सुता युष्मत्पूर्वजाः सनकादयः चेरुर्विहायसा लोकांल्लोकेषु विगतस्पृहाः ११ त एकदा भगवतो
वैकुंठस्यामलात्मनः ययुर्वैकुंठनिलयं सर्वलोकनमस्कृतं १२ वसंति यत्र पुरुषाः सर्वे वैकुंठमूर्त म२
यः येऽनिमित्तनिमित्तेन धर्मेणाराधयन्हरिं १३
न्मो व्याप्ताकुर्वन् ९ दितेः कुचेष्टितं ज्ञात्वा प्रहस्य देवानां ये शब्दा विज्ञप्तिवाक्यानि तेषां गोचरो विषयभूतः प्रत्यभाषत १०
युष्मत्सकाशात्पूर्वजाताः ११ वैकुंठाख्यं लोकं ययुः १२ तं वर्णयति वसंतीत्यादि द्वादशभिः वैकुंठस्य हरेरिव मू
र्तिर्येषां ते निमित्तं फलं तन्न निमित्तं प्रवर्तकं यस्मिन् निष्कामेण धर्मेणेत्यर्थः आराधयन् आराधितवंतः १३ ॥ ६२

तेन गर्भतेजसा हृता लोके निरस्तसूर्यादिप्रकाशे हतौजसः हतप्रभावाः ध्वांतेन व्यतिकरं संकरं २ वेत्थ जानासि यद्यतो वयं
व्यग्रा भीताः अव्यक्तं अज्ञातं न स्पृष्टं वर्त्म ज्ञानं प्रचारो यस्य ३ ब्रह्माणं परमेश्वरत्वेन स्तुवंतः प्रार्थयंते देवेति सप्तभिः
लोकनाथानां शिखामणे भाववित् अभिप्रायज्ञोसि केनाभिप्रायेण दितेर्गर्भो वर्द्धत इति जानासीत्यर्थः ४ विज्ञानं वीर्यं ब
लं यस्य इदं ब्रह्मदेहमुपेयुषे प्राप्तवते गृहीतो गुणभेदो रजोगुणो येन व्यक्तस्य प्रपंचस्य योनये कारणाय न व्यक्ता केना

लोकेतेन हता लोके लोकपाला हतौजसः न्यवेदयन् विश्वसृजे ध्वांतं व्यतिकरं दिशां २ तम एत
द्विभो वेत्थ संविग्ना यद्वयं भृशं न ह्यव्यक्तं भगवतः कालेनास्पृष्टवर्त्मनः ३ देवदेव जगद्धातर्लोकना
थशिखामणे परेषामपरेषां त्वं भूतानामसि भाववित् ४ नमो विज्ञानवीर्याय माययेदमुपेयुषे गृही
तगुणभेदाय नमस्तेव्यक्तयोनये ५ ये त्वानन्येन भावेन भावयंत्यात्मभावनं आत्मनि प्रोतभुवनं परं स
दसदात्मकं तेषां सुपक्वयोगानां जितश्वासेंद्रियात्मनां लब्धयुष्मत्प्रसादानां न कुतश्चित्पराभवः ६

पि प्रमाणेन विज्ञाता योनिर्यस्येति वा ५ सकामतया प्रतिक्षणं दुःखमनुभवंतो निष्कामभक्ता न स्तुवंति आद्याभ्यां ये त्वा
त्वां अनन्येन निष्कामेण भावेन भक्त्या ध्यायंति आत्मनो जीवान् भावयतीति तथा स्वस्मिन् प्रोतानि ग्रथितानि भुवनानि येन
चेतनाचेतनप्रपंचकारणमित्यर्थः तत्र हेतुः सदसदात्मकं कार्यकारणरूपं वस्तु वस्तुतस्ताभ्यां परं जितः श्वासेंद्रियाणि
आत्मा मनश्च यैः अतः सुपक्वो योगः अत एव प्राप्तो युष्मत्प्रसादो यैः तेषां ६

मंदारपारिजातौ सुरतरुविशेषौ कुरवस्तिलकवृक्षः उत्पलं रात्रिविकाशि अंबुजं दिनविकाशिना गोनागकेशरः एताः सुमनसः पुष्पजातयः सुगंधा अपि तुलसिकाभरणेन श्रीहरिणा तुलस्या गंधेनार्चितेसति यस्मिन् वने तस्यास्तपो बहु मानयंति अनेनात्र त्यागुणग्राहिणएवनतुमत्सरिण इत्युक्तं एवंभूतं वनं यत्र तद्वैकुंठं यत्पुरि

मंदारकुंदकुरवोत्पलचंपकार्णपुन्नागनागबकुलांबुजपारिजाताः गंधेर्चिते तुलसिकाभरणेन तस्यायस्मिंस्तपः सुमनसो बहु मानयंति १८ तत्संकुलं हरिपदानतिमात्रदृष्टैर्वैदूर्यमारकतहेममयैर्विमानैः येषां बृहत्कटितटाः स्मितशोभिमुख्यः कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः १९

ति पूर्वेणान्वयः १८ पुनर्वैकुंठमेव विशिनष्टि तत्संकुलं व्याप्तं भवति कैः हरिपदयोरानतिः प्रणमस्तावन्मात्रेण दृष्टैर्भक्तानां विमानैः न कर्मादिप्राप्यैः वैदूर्यमारकतैर्हैममयैश्च विमानैः बृहंति कटितटानि यासां स्मितशोभिनि मुखानि यासां ता अपि कृष्णे आत्मा येषां रजः कामं उत्स्मयाद्यैः परिहासादिभिः न आदधुः न जन

शब्दगोचरः वेदांतैकवेद्यः विरजं सत्त्वं मूर्त्तिं विष्टभ्य धृत्वा स्वबोधर्ममूर्त्तिः स्वानां स्वान् १४ तत्रत्यं वनं विशिनष्टि यत्रेति च
तुर्भिः सर्वेषामृतूनां श्रीः पुष्पादिसंपत्तद्युक्तैः १५ चरितानि चरित्राणि भर्तुः प्रभोः अनुविकसंत्यः मधुमकरंदः तद्युक्ता मा
धव्यो वासंत्यो लताः यद्वा अनुविकसन्मधवः प्रसरन्मकरंदाः माधव्यो मधुकालीनाः सुमनसः तासां गंधेन खंडितमा

यत्र चाद्यः पुमानास्ते भगवांछब्दगोचरः सत्त्वं विष्टभ्य विरजं स्वानां नो मृडयन्वृषः १४ य
त्र नैश्रेयसं नाम वनं कामदुघैर्द्रुमैः सर्वर्तुश्रीभिर्विभ्राजत्कैवल्यमिव मूर्त्तिमत् १५ वैमा
निकाः सललनाश्चरितानि शश्वद्गायंति यत्र शमलक्षपणानि भर्तुः अंतर्जलेनुविकसन्मधु
माधवीनां गंधेन खंडितधियोप्यनिलं क्षिपंतः १६ पारावतान्यभृतसारसचक्रवाकदात्यू
हहंसशुकतित्तिरिबर्हिणां यः कोलाहलो विरमतेचिरमात्रमुच्चैर्भृंगाधिपे हरिकथामिव
गायमाने १७

विक्षिप्ता धीर्येषां तेपि तद्गंधप्रापकं अनिलं क्षिपंतः तं तिरस्कुर्वंतो गायंति अनेन भगवत्पार्षदानां निरतिशयवि
षयसुखेपि भजनानंदासक्तिर्दर्शिता १६ अन्यभृताः कोकिलाः दात्यूहाश्चातकाः अचिरमात्रं क्षणमात्रं विरमं
ति अनेन तत्रत्यपक्षिणामपि हरिकथाश्रवणादिपरमानंदो दर्शितः १७

पुनः कथंभूतं तत्र यद्वैकुंठं न व्रजंति के ये कुकथाः शृण्वंति कास्ताः अघं भिनत्तीत्यघभित् तस्य हरेः रचनास्
ष्ट्यादिलीलास्तस्या अनुवादादन्यविषया अर्थकामादिवार्त्ता मतिं घ्नंति नाशिकास्तेषामव्रजने हेतुः यास्तु हतभाग्यैर्न
रैः श्रुताः सत्यः तांस्तान् श्रोतृन् अशरणेषु निराश्रयेषु तमःसु नरकेषु क्षिपंति हंतखेदे कथंभूताः आत्तःसाराः श्रोतृ

यन्न व्रजंत्यघभिदो रचनानुवादाच्छृण्वंति येन्यविषयाः कुकथा मतिघ्नीः यास्तु श्रुता
हतभगैर्नृभिरात्तसारास्तांस्तान्क्षिपंत्यशरणेषु तमःसु हंत म २२ येभ्यर्थितामपि च नो नृ
गतिं प्रपन्ना ज्ञानं च तत्त्वविषयं सहधर्म यत्र नाराधनं भगवतो वितरंत्यमुष्य संमोहिता वि
ततया वत मायया ते २३

सांपुण्यं याभिस्ताः २२ प्रसंगात्तान् शोचति नोऽस्माभिर्ब्रह्मादिभिरप्यभ्यर्थितां नृगतिं मनुष्यजातिं प्रपन्नाः
प्राप्ताः संतोपि हरेराराधनं न कुर्वंति कीदृशीं गतिं यत्र यस्यां धर्मसहितं तत्त्वज्ञानं भवति तदुभयसाधकत्वा
त्तस्यां ते मनुष्यं भगवतो विस्तृतया मायया ननु संमोहिताः वतेति खेदे यदि चैवं संबंधः न केवलं त एव व्रजं
ति किंतु ये भगवदाराधनं न कुर्वंति तेषां मायामोहितत्वादिति २३ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥

श्रीः लक्ष्मीः रूपिणी मनोहरमूर्त्तिधारिणी सती श्रीहरेः सद्मनि संमार्ज्जनं कुर्वतीव यस्मिन् लोके संलक्ष्यते चरणारविं
दक्वणयन्तीन् नूपुरे रणशब्दयंती विमुक्तो दोषश्चांचल्यं यया यद्वा मुक्तेन दोषाप्रसारितेन बाहुना कीदृशे सद्मनि स्फटि
कमयानि कुड्यानि यस्मिन् मध्येमध्ये च शोभार्थमुपेतं संयुक्तं हेम यस्मिन् यस्या अनुग्रहे सा श्रीरनुग्रहं करोतीत्यतद
र्थमन्येषां ब्रह्मादीनां यद्यैलसा अयं भावः यद्यपि तत्र रजो नास्त्येव तथापि स्वर्णपट्टिकावच्छिन्नभित्तिभागेषु वहु

श्रीरूपिणी क्वणयती चरणारविंदं लीलांबुजेन हरिसद्मनि मुक्तदोषा संलक्ष्यते स्फटि
ककुड्य उपेतहेम्नि संमार्जतीव यदनुग्रहलेऽन्यपत्नः २० वापीषु विद्रुमतटास्वमलामृ
तास्सु प्रेष्यान्विता निजवने तुलसीभिरीशं अभ्यर्चती स्खलकमुन्नसमीक्ष्य वक्त्रमुच्छेषि
तेभगवतेत्यमतागयच्छ्री २१

या प्रतिविंविता सती लीलांबुजं भ्रामयंती विनयभक्तीभ्यां तथा लक्ष्यत इति २० अंगहेदेवाः यत्र यस्मिन् लो
के श्रीरेवं अमल अमंस्तमेने किंकुर्वती विद्रुममयानि तटानि यासां अमलामृततुल्या आपो यासां तासु
वापीषु निजवने लक्ष्मीवने लक्ष्मीवने परिचारिकाभिरन्विता तुलसीभिः श्रीविष्णुपूजयंतीत दा उदके प्रति
विंवितं शोभमालकयुक्तं उत्कृष्टनासिकायुक्तं च स्व वक्त्रं वीक्ष्य भगवता उच्छेषितं चुंवितमित्यमन्यत अनेन
लक्ष्म्या अपि सौभाग्यसुखं भगवदनुग्रहेलैवेति द्योतितम् २१

भा० तृ० तस्मिन्वैकुंठे षुषट्कक्षाः प्रकाराद्वाराणि असज्जमानाः भगवद्दर्शनोत्कंठया तत्तद्दृष्टुं तद्दर्शने आसक्तिमकु
६६ र्वाणाः द्वारपालौ देवाववपश्यन् समानवयसौ ययोः गृहीते गदे याभ्यां परार्ध्यैः केयूरादिभिर्विटंकः सुंदरो वेषो य
योः तावेव वर्णयति मत्ता द्विरेफा यस्यां तया वनमालया निवीतौ कंठलंबिन्या अलंकृतौ असिताः नीलाः च

तस्मिन्नतीत्य मुनयः षडसज्जमानाः कक्षाः समानवयसावथ सप्तमायां देवावचक्षत
गृहीतगदौ परार्ध्यकेयूरकुंडलकिरीटविटंकवेषौ मत्तद्विरेफवनमालिकया निवीतौ वि
न्यस्तयासितचतुष्टयबाहुमध्ये वक्त्रं भ्रुवा कुटिलया स्फुटनिर्गमाभ्यां रक्तेक्षणेन च म
नाग्रभसं दधानौ २८ द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा पूर्वा यथा पुरटवज्रकपाटिका
याः सर्वत्र तेऽविषमया मुनयः स्वदृष्ट्या ये संचरंत्यविहता विगताभिशंकाः २९ ॥

तुष्टये चतुःसंख्याका बाहवस्तेषां मध्ये विन्यस्तया वक्त्रं मनाग्रभसं किंचित्क्षुब्धं दधानौ स्फुटौ उत्फुल्लौ निर्ग
मोच्छ्वाससमार्गौ नासापुटे ताभ्यां २८ एतयोर्मिषतोः पश्यतोस्तावनादृत्यापृष्ट्वैव यथा पूर्वाः षट् द्वाराः पुरटालंकृ
तवज्रमय्यः कपाटिका यासु ताः यथा विविशुस्तथा सप्तमायामपि द्वारि तं विविशुः अप्रवेशे हेतुः सर्वत्र ते अव्याहताः
अनिवारिताः संचरंति निःशंकत्वे हेतुः विषमया स्वदृष्ट्येति २९ ॥ ६६

पुनःकथंभूतं यच्चनउपरिस्थितंव्रजंति केअनिमिषांदेवानामृषभःश्रेष्ठोहरिःतस्यानुवृत्त्यादूरेयमोयेषां यद्वादू
रीकृतयमनियमाः पाठांतरेदूरेहमाइतिपाठे दूरीकृताहंकाराइत्यर्थः स्पृहणीयंकरुणादिशीलंयेषां किंच भर्तुःहरेः
यत्सुयशः तस्यमिथःकथनेयोऽनुरागस्तेनवैक्लव्यंवैवश्यंतेनबाष्पकलातयासहपुलकीकृतमंगंयेषां यद्वानःउ
परीतिव्रजंतांविशेषणं निरहंकारत्वादस्मत्तोपिअधिकास्तेयद्व्रजंतीत्यर्थः २४ तत् तदानंदपूर्वं विकुंठं अथो

यच्चव्रजंत्यनिमिषामृषभानुवृत्त्यादूरेयमाह्युपरिनःस्पृहणीयशीलाः भर्तु
र्मिथःसुयशसःकथनानुरागवैक्लव्यबाष्पकलयापुलकीकृतांगाः २४ त
द्विश्वगुर्वधिकृतंभुवनैकवंद्यंदिव्यंविचित्रविबुधाग्र्यविमानशोचिः आपुःपरां
मुदमपूर्वमुपेत्ययोगमायाबलेनमुनयस्तदथोविकुंठं २५

अनंतरमुपेत्यमुनयःपरामुत्कृष्टंमुदमापुः अपूर्वत्वेहेतवः विश्वगुरुणाहरिणाअधिकृतं अधिष्ठितंभुव
नानामेकमेववंद्यं दिव्यमलौकिकं विचित्राणिविबुधाग्र्याणांविमानानियेषांशोचिर्दीप्तिर्यस्मिन् योगमाया
बलेनेति अष्टांगयोगप्रभावेनोपेत्य परमेश्वरेतुयोगमायेतिचिच्छक्तिविलासइतिद्रष्टव्यं २५ ॥ ६६॥

भा० त० भवप्रांकावीजंभेदः सचकस्याप्यस्मिन्नास्तीत्याहुः नहीति समस्तं विश्वंकुक्षौयस्य यत्रयदाभवति धीराविद्वांसआत्मनो
६७ अंतरंभेदंनपश्यंति किंत्वस्मिन्परात्मा नमूर्तमूर्तंनपश्यंतिमहाकाशेघटाकाशमिव तदायथान्यस्यराजादेरुदरभेदि
उदरभेदयुक्तंभयंभवति तथात्रेस्यश्रीहरेः ताहृग्भयंयतः येनकारणेन सुरवेषधारिणोर्युवयोर्विशेषणेत्यादितं न
किंकिंचिदित्यर्थः ३१ ततस्मादमुष्यवैकुंठनाथस्यभक्ताभ्यांवांयुवाभ्यां प्रकृष्टमंदंभद्रमेवकर्तुं इहअस्मिन्नपराधे
यद्युक्तंतद्धीमहीतिचिंतयेम तदेवाहुः अंतरस्यभावःसत्तातद्दृष्टानेनभेददर्शनेन इतोवैकुंठलोकात्व्रजंतः यत्र

नह्यंतरंभगवतीहसमस्तकुक्षावात्मानमात्मनिनभोनभसीवधीराः पश्यंतियत्रयुवयोःसुरलिं
गिनोकिंव्युत्पादितंह्युदरभेदिभयंयतोस्य ३१ तद्वाममुष्यपरमस्यविकुंठभर्तुःकर्तुंप्रकृष्टमिह
धीमहिमंदधीभ्यां लोकानितोव्रजतमंतरभावदृष्ट्यापापीयसस्त्रयइमेरिपवोस्ययत्र ३२ ते
षामि तमुभाववधार्य्यघोरंतंब्रह्मदंडमनिवारणमस्त्रपूगैः सद्योहरेरनुचरावुरुबिभ्यतस्त
तीरि त्पादग्रहावपततामतिकातरेण ३३
येषुलोकेषु अस्यपापीयसाऽंतरभावद्रष्टुरिमेकामक्रोधस्तथालोभइतिगीतोक्तास्त्रयोरिपवोभवंति पापीयसालोका
नितिवा ३२ इतितेषामीरितंभाषणंघोरमवधार्य्यतंचब्रह्मसापमवधार्य्यतं नास्त्रसमूहैरप्यनिवार्य्यमवधार्य्यहरेरनु
चरौअतिकातरेणभयेनतत्पादग्रहणंकुर्वंतौदंडवदपततां कथंभूतस्यहरेः एवंभूतेभ्योमुनिभ्यःताभ्यामपितरु
अधिकंबिभ्यतःभयंभावयंतः ३३ ६७

वातरसनान् नग्नान् वृद्धान् अपि पंचवर्षबालकवत्प्रतीयमानान् चकारात् दाक्ष्याच अस्खलयतां निवारितवंतौ न तत्स्खलनं
महंतीति तथा ताभ्यां अहो अत्रापि धाष्टर्यमित्येवं तेषां तेजो विहस्य भगवतो ब्रह्मण्यदेवस्य प्रतिकूलंशीलंययोः २८ हरेर्द्वार
पालाभ्यां देवेषु पश्यत्सु वार्य्यमाणाः सत्तमुनयः कोवा इत्यादि श्लोकत्रयी ऊचुः सुहृत्तमः श्रीहरिस्तस्य दिदृक्षातो तं दर्शने
छातस्य भंगे सति कामस्यानुजः क्रोधस्तेन सहसा अकस्मात् देवत उपप्लुतानि क्षुभितान्यक्षीणि येषां ते सुष्ठु पूज्यतमा

ताम्वीक्ष्यवातरसनांश्चतुरःकुमारान्वृद्धान्दशार्द्धवयसो विदितात्मतत्वान् वेत्रेणचास्खलय
तामतदर्हणांस्तौतेजोविहस्यभगवत्प्रतिकूलशीलौ २८ ताभ्यांमिषत्स्वनिमिषेषुनिषिध्यमा
नाःस्वर्हत्तमाह्यपिहरेःप्रतिहारपाभ्यां ॥ ऊचुःसुहृत्तमदिदृक्षितभंगईषत्कामानुजेनसहसात
उपप्लुताक्षाः २९ ॥मुनयऊचुः॥ कोवामिहैत्यभगवत्परिचर्य्ययोच्चैस्तद्धर्मिणांनिवसतांविषम
स्वभावः तस्मिन्प्रशांतपुरुषेगतविग्रहेवांकोवात्मवत्कुहकयोःपरिशंकनीयः ३०

अपीति निषेधानर्हत्वे वा हेतुः २९ उच्चैर्महत्या भगवत्परिचर्य्यया यत्प्राप्य इह वैकुंठे निवसतां भगवद्धर्मिणां समदर्शिनां मध्ये
वां युवयोरेव कोयं विषमस्वभावः केचिदत्र वैष्टव्यं कश्चिन्नैवं भूत ननु स्वामिनो रक्षार्थं द्वारपालयोरेष स्वभावो युक्त एवेति
चेदत आहुः तस्मिन्निति कुहकयोः कपटयोः आत्मवत्स्वदृष्टांतेन यथा आवां कपटयोः तथा अन्योपि कश्चित्कपटः प्र
वेक्ष्यतीति अयंभावः नह्यत्र भगवद्भक्तं विना कश्चिदागच्छति न चेश्वरे प्रशांतत्वाद्विद्यमान विरोधे यमाशंका अतो यु

भा॰टी॰स्कं॰३ ३०

भा० त०
६८

कृत्स्नस्य द्वारपालमुनिवृंदस्य प्रसादे सुमुखं स्पृहणीयानां धाम स्थानं स्नेहावलोककलया सप्रेमकटाक्षेण हृदि संस्प
र्शंतं सुखयंतं त्रैलोक्यविवक्षापेक्षे सत्यलोकपर्यंतस्वर्गः तस्य चूडामणिवत्स्थितं स्वधिष्ण्यं वैकुंठं सुभगयंतं
शोभयंतं ॥ २ ॥ पृथुनितंब आश्रयत्वेन विद्यते यस्य तस्य पीतांशुके अलिभिर्नादितया वनमालया च युक्तं सुभगयंत
मिति पूर्वेणैव संबंधः वल्गु प्रकोष्ठेषु वलयानि यस्य गरुडस्य स्कंधे विन्यस्त एको हस्तो येन इतरेणान्येन

कृत्स्नप्रसादसुमुखं स्पृहणीयधाम स्नेहावलोककलया हृदि संस्पृशंतं श्यामे पृथावुरसि शो
भितया श्रिया स्वश्चूडामणिं सुभगयंतमिवात्मधिष्ण्यं ॥ २ ॥ पीतांशुके पृथुनितंबिनि विस्फु
रंत्या कांच्यालिभिर्विरुतया वनमालया च वल्गुप्रकोष्ठवलयं विनतासुतांसे विन्यस्त
हस्तमितरेण धुनानमब्जं ॥ ३ ॥ विद्युत्क्षिपन्मकरकुंडलमंडनार्हगंडस्थलोन्नसमुखं म
णिमत्किरीटं दोर्दंडषंडविवरे हरता परार्ध्यहारेण कंधरगतेन च कौस्तुभेन ॥ ४ ॥

अब्जं धुनानं भ्रामयंतं विन्यस्येति पाठे वल्गुवत्यादि हस्तस्य विशेषणं ॥ ३ ॥ स्वकांत्या विद्युतं क्षिपंती ये मकराकारे कुंडले
तयोर्मंडनस्थले यस्मिन् तच्च तदुन्नसं च मुखं यस्य मणियुक्तं किरीटं यस्य दोर्दंडानां षंडः समूहः तस्य विवरे
मध्ये स्थितेन हरता मनोहरेण विहरते ति वा परार्ध्यं उत्कृष्टस्तेन हारेण कंधरायां स्थितेन ॥ ४ ॥ ॥

६८

अतोऽपराधमस्माभिरित्युक्तत्वमानानत्रत्यूचतुः अघोऽधवतियाउचितो दंडः स एव भगवद्भिरकारि नात्र भवतामपराधः
कश्चित् अतो सौ नो आवयोर्भूयात् यः अशेषमपि सुरहेलनमीश्वराज्ञातिक्रमरूपं पापं हरेत् किंतु युष्माकं यः कृपानिमित्तो
नुतापस्तस्य लेशेन नो आवयोरधोधोमूढयोर्निर्व्रजतोरपि भगवत्स्मृतिप्रतिघातको मोहो मा भवेत् किंतु मोहो विस्मृति
मेव प्रवहतादिति प्रार्थना ३४ एवं स्वानां महत्स्वतिक्रममपराधं तत्क्षणमेव विबुध्य तस्मिन् यत्र ते रुद्धास्तं देशं ययौ अ
र्यहृद्यः मनोज्ञः चरणौ चलयन्निति अयं भावः मच्चरणादर्शनप्रतिघातजं क्रोधं तौ दर्शयन् शमयिष्यामीति त्वरा व्याजेन

भूयादघोनि भगवद्भिरकारि दंडो यो नो हरेत सुरहेलनमप्यशेषं मा वोनुतापकलया भगवत्स्मृतिघ्नो
मोहो भवेदिह तु नौ व्रजतोरधोधः ३४ एवं तदैव भगवानरविंदनाभः स्वानां विबुध्य सदतिक्रममा
र्यहृद्यः तस्मिन् ययौ परमहंसमहामुनीनामन्वेषणीयचरणौ चलयन् सहश्रीः ३५ तं त्वागतं प्रति
हृतौपयिकं स्वपुंभिस्तेचक्षताक्षविषयं स्वसमाधिभाग्यं हंसश्रियोर्व्यजनयोः शिववायुलोलच्छुभ्रा
तपत्रशशिकेशरशीकरांबु १

पद्भ्यामेव ययौ श्रीसाहित्यं च निष्कामानपि विभूतिभिः पूरयित्वा हृसमापयितुं ३५ तत्र तैर्दृष्टं देवमनुवर्णयति पंचभिः तं तु आग
तं अचक्षत अपश्यन् आपंचमादिदमेव क्रियापदं स्वपुंभिः शीघ्रं प्रतिहृतं आनीतं औपयिकं गमनोचितं छत्रपादुकादि यस्य कथं
भूतं स्वसमाधिना भाग्यं भजनीयं फलं यं दृष्टं तदेवाक्षविषयं हंसवत् श्रीर्ययोरुभयतः स्खलतयोर्व्यजनयोर्यः शिवोनुकूलो वायुस्ते
न लोलं तत्स्खलंतः शुभ्रातपत्रात् शशिकेशराः शुभ्रं यदातपत्रं तदेव शशिसादृश्याच्छशी तस्य केशरा मुक्ताहारविलंबाः तेभ्यो ग
लंति शीकरांबूनि यस्मिन् तत् शीकरांबु करणाः १
रां

भा० त०
६९

योगमार्गैर्गतिं मृगयतां पुंसां ध्यानस्य विषयभूतं अत्यादरास्पदं बहूनां तत्त्वदृशां संमतमिति वा पौंस्नं पौरुषं वपुर्दर्शयंतं
अन्येष्वसिद्धैरस्वाधारस्थैरौत्पत्तिकैर्नित्यैरणिमाद्यैश्वर्यैर्युतं समगृणन् सम्यगस्तुवन् ४५ नित्यं ब्रह्मरूपेण प्रकाश
से न तत्र चित्रं इदानीं परममंगलविग्रहस्त्वं मूर्त्या प्रत्यक्षोसि अहो भाग्यमस्माकमित्याहुः हे अनंत । यस्त्वं हृद्गतोपि
दुरात्मनामंतर्हितो न स्फुरसि स नोऽस्माकमंतर्हितो न भवसि नयनमूलं त्वं दृष्टो वा राद्धः प्राप्तोसि अंतर्धानाभावे हेतुः भ
वतः सकाशादुद्भवो यस्य तेनास्मत्पित्रा यर्हि यदैवानुवर्णितरहः उपदिष्टरहस्यः तदैव नः कर्णमार्गेण गुहां बुद्धिं गतः प्राप्तो

पुंसां गतिं मृगयतामिह योगमार्गैर्ध्यानास्पदं बहुमतं नयनाभिरामं ॥ पौंस्नं वपुर्दर्शयंतमनन्यसिद्धैरौ
त्पत्तिकैः समगृणन्युतमष्टभोगैः ॥४५॥ कुमारा ऊचुः ॥ योंतर्हितो हृदिगतोपि दुरात्मनां त्वं सोद्यैव नो न
यनमूलमनंत राद्धः ॥ यर्ह्येव कर्णविवरेण गुहां गतो नः पित्रानुवर्णितरहो भवदुद्भवेन ४६ तं त्वा
विदाम भगवन्परमात्मतत्त्वं सत्वेन संप्रति रतिं रचयंतमेषां यत्तेऽनुतापविदितैर्दृढभक्तियोगैरुद्ग्र
न्थयो हृदि विदुर्मुनयो विरागाः ४७

सीति ४६ ननु पित्रोपदिष्टं भवतामदृष्टमात्मतत्त्वं अहं त्वन्य एव स्यामित्याशंक्यत्वा
न् नैव अस्मत्प्रतिज्ञया भेदनिरसादित्याहुः तं त्वामिति हे भगवन् आत्मतत्त्वमेव परं त्वां विदामः विद्मः प्रत्यभिजानीमः ननु नि
रुपाधेरात्मतत्त्वस्य कथमीदृशमैश्वर्यं स्यादत आहुः सत्वेनेति विशुद्धसत्त्वमूर्त्या येषां भक्तानां सम्यक्प्रतीत्यर्थं रतिं सं
प्रति रतिस्तां रचयंतं आत्मतत्त्वमेवाहुः तेऽनुतापः कृपा तेन विदितैर्ज्ञातैर्दृढैर्भक्तियोगैः श्रवणादिभिर्मुनयो हृदिय
द्विदुः कीदृशा उद्ग्रंथयो निरहंमानाः अत एव विगतरागाः ४७

६९

किंवल्गुनाइंदिरयायाउस्मितं अहमेवसर्वसौंदर्य्यनिधिरित्यहंकरणं अत्रभगवत्सौंदर्य्ये उपस्पृष्टं अस्तंगतमितितस्यानां भक्तानांधियाविरचितं भक्तैःस्वमनस्येवंवितर्कितमित्यर्थः कुतःवल्गुसौष्ठवेन सौंदर्य्येण आढ्यंयुक्तं किंच मह्यंमम भवस्य रुद्रस्य भवतांच कृते अंगभजं तंमूर्तिप्रकटयंतं अचक्षत निरीक्ष्यच कैःशिरोभिर्मुदानम्रैः नमश्चक्रुः नविशेषेणतृप्ताह्रदृशोनेत्राणियेषांते ॥ ४२ ॥ स्वरूपानंदादपितेषांभजनानंदाधिक्यमाह तस्यपादारविंदकिंजल्कैः केशरैर्मिश्रायात्तुलसीतस्यामक

अत्रोपस्पृष्टमितिचात्स्मितमिंदिरायाःस्वानांधियाविरचितंवल्गुसौष्ठवाढ्यं मह्यंभवस्यभवतांचभजं
तमंगंनेमुर्निरीक्ष्यनवितृप्तदृशोमुदाकैः ॥ ४२ ॥ तस्यारविंदनयनस्यपदारविंदकिंजल्कमिश्रतु
लसीमकरंदवायुः अंतर्गतःस्वविवरेणचकारतेषांसंक्षोभमक्षरजुषामपिचित्ततन्वोः ॥ ४३ ॥ तेवाअमु
ष्यवदनासितपद्मकोशमुद्वीक्ष्यसुंदरतराधरकुंदहासं लब्धाशिषःपुनरवेक्ष्यतदीयमंघ्रिद्वंद्वंनखारुणमणि
श्रयणंनिदध्युः ॥ ४४ ॥

रंदेनयुक्तोवायुःस्वविवरेणनासाछिद्रेणअक्षरजुषांब्रह्मानंदसेविनामपिसंक्षोभंचित्तेतितद्वपं तनोरोमांचं ॥ ४३ ॥ हर्षकारितंसंभ्रममाहद्वाभ्यां तेवैकिलवदनमेवासितपद्मस्यकोशोंतर्भागस्तंअसितपद्मकोशमित्यभूतोपमा सुंदरतरेअरुणेअधरेश्वेतकुंदवद्धासोयस्मिंस्तं उत्ऊर्द्ध्वंवीक्ष्यलब्धमनोरथाःसंतः नखाएवअरुणमणयस्तेषांश्रयणमाश्रयभूतंअंघ्रिद्वंद्वंपुनरवेक्ष्यअधोदृष्ट्यावीक्ष्यपुनःपुनरेवंनिरीक्ष्ययुगपत्सर्वांगलावण्यग्रहणाशक्तेःपश्चान्निद

भा० तृ० श्रद्धावयं कृतार्थोऽस्म इत्याहुः हे पुरुहूत विपुलकीर्ते यदिदं प्रादुश्चकर्थ प्रकटितवानसि दृशो नेत्राणि अना
७० त्मनामजितेंद्रियाणां दुरुदयः प्रकटोऽपि इंद्रियः प्रतीतोऽसि तस्मै तुभ्यमिदं नमो विधेम ॥ ४४ ॥ इति तृतीये पंच
दश ॥ १५ ॥ हरिणा वर्तिविग्रैरनुतप्तैस्तु षोडशे तयोरसुरभावे पिकृतोऽनुग्रह ईर्यते इति गृणतां तेषां तद्वाक्यं प्रति

प्रादुश्चकर्थ यदिदं पुरुहूत रूपं तेनेश निर्वृतिमवापुरलं दृशो नः ॥ तस्मादिदं भगवते नम इद्
विधेम योऽनात्मनां दुरुदयो भगवान्प्रतीतः ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुर
मैत्रेयसंवादे वैकुंठवर्णनं पंचदशोऽध्यायः ॥ १५ ॥ ब्रह्मोवाच ॥ इति तद्गृणतां तेषां मुनीनां योगधर्मि
णां प्रतिनंद्य जगादेदं विकुंठनिलयो विभुः १ ॥ श्रीभगवानुवाच ॥ एतौ तौ पार्षदौ मह्यं जयो विजय
एव च कदर्थीकृत्य मां यद्वो बह्वक्रातामतिक्रमम् ॥ २ ॥ यस्त्वेतयोर्धृतो दंडो भवद्भिर्मामनुव्रतैः ॥ स एवा
नुमतो स्माभिर्मुनयो देवहेलनात् ३ ॥ तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे ॥ तद्धीत्यात्मकृतं मन्ये

नं धेनं जगाद एतावत्येकादशभिः १ यस्मात् मां कदर्थीकृत्य तुच्छीकृत्य यत्त्वत्पुंभिरसत्कृताः ४ ॥ ४ ॥
व द्वयथाभवति तथा अतिक्रमं वः कृतवंतौ २ तस्मात्स एव दंडोऽंगीकृतः ॥ ३ हि यस्मा द्ब्राह्मणा एव मे परं दैवतं त भा
तस्माद्वः प्रसादयामि तव कोऽपराध इति चेत्तत्राह तद्धीति मदीयैः पुंभिरसत्कृता तिरस्कृता इतियत्तदात्मन्येव म तृ
७०

स्वयमपि भक्तिं प्रार्थयितुं भक्तानां सुखातिशयमाहुः आत्यंतिकं मोक्षाख्यमपि तव प्रसादं तेन गणयंति नाद्रियंते किंतु कि
मुत्तमन्यदू इंद्रादिपदं ते भ्रुवउन्नयै रुरुजं भित्तेरर्पितं भयं यस्मिंस्तत् केश्रंग हे भगवन् ये भवतः कथायारसज्ञाः कथं
भूतस्य रमणीयत्वेन पावनत्वेन कीर्त्तिन्यं कीर्त्तनार्हं तीर्थं च यशो यस्य ६२ इदानीं स्वापराधं द्योतयंतो भक्तिं प्रार्थ
यंते काममिति हे भगवन् अतः पूर्वमस्माकं त्वं जिनं नाभवत् इदानीं तु सर्वोपि प्रपि जानाति यतस्त्वदंघ्रिकोशशाष्टी अतस्ते

नात्यंतिकं विगणयंत्यपि ते प्रसादं किं त्वन्यदर्पितभयं भ्रुव उन्नयैस्ते ये गत्वदंघ्रिशरणा भव
तः कथायाः कीर्त्तन्यतीर्थयशसः कुशला रसज्ञाः ६३ कामं भवः स्ववृजिनैर्निरयेषु नस्ताच्चेतोलि
वद्यदि नु ते पदयो रमेत वाचश्च नस्तुलसिवद्यदि तेंघ्रिशोभाः पूर्येत ते गुणगणैर्यदि कर्णरंध्रः ६३

स्ववृजिनैर्निरयेषु कामं नोऽस्माकं भवोजन्मस्यात् नु वितर्के यदि तु नश्चेतस्ते पदयोरमेत अलिर्यथार्कंटकैए विध्य
मानोपि पुष्पेषु रमते न तद्वत् ध्यानविगणय यदि रमेत अंघ्रिभ्यां शोभायांसां यथा च तुलसी स्वगुणैः पूर्येत कर्णरंध्र
इत्यल्पस्य पूरणी रये द्रोणत्वं दंघ्रिसंबंधेनैव शोभते तथा यदि नो वाचः शोभेरन् यदि च गुणगणैः पूर्येत कर्णरंध्र इ
त्यल्पस्य पूरणमिव याचकरीत्या प्रार्थयंते अयं तु गूढोभिप्रायः कर्णरंध्रस्याकाशत्वात् गुणगणानां चामूर्त्तत्वात्
न कदाचित् पूरणमतो नित्यमेव श्रवणं फलिष्यतीति ६३ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥

श्री
भा०त०
७१

किंच ॥ ब्राह्मणोममैव श्रेष्ठंमुखं अतोयुष्मदवज्ञयामन्मुखतिरस्कार एवकृतइत्याह नाहमिति वितानेयज्ञेयज
मानस्यहविश्च्युतघृतपुरोडाशादि हुतभुगग्निस्तन्मुखेन अदन् अश्नन्नपितथानाश्नामि यथाश्च्योततघृ
तघृतेनेनंप्लुतंविलोडितंपायसादिप्रतिग्रासंरसास्वादपूर्वकंचरतोनुग्रासनस्यज्ञानिनोब्राह्मणस्यमुखतोश्ना

नाहंतथाद्मियजमानहविर्वितानेश्च्योतद्घृतप्लुतमदन्हुतभुङ्मुखेन य
द्ब्राह्मणस्यमुखतश्चरतोनुघासंतुष्टस्यमय्यवहितैर्निजकर्मपाकैः ८ येषां
बिभर्म्यहमखंडविकुंठयोगमायाविभूतिरमलांघ्रिरजःकिरीटैः विप्रांस्तुको
नविषहेतयदर्हणांभसद्यःपुनातिसहचंद्रललामललामलोकान् ९

मि मयिसमर्पितैः कर्मफलैस्तुष्टस्यनिष्कामस्येत्यर्थः ८ किंच येषाममलंअंघ्रिरजः अहंकिरीटैर्बिभर्मि
तान्विप्रान् अपकुर्वतोपिकोन्योनविषहेत कथंभूतोहं अखंडानवच्छिन्नाविकुंठाप्रतिहताचयोगमायाविला
सभूताविभूतिर्यस्य तथायस्यममार्हणांभःपादोदकंचंद्रललामेनेश्वरेणसहितान्लोकान्सद्यःपुनाति एवंपरमे ७१
श्वरःपरमपावनोपिसन्नहंबिभर्मीति ९

किंच ममैवैताभ्यामनिष्टं कृतमित्याह यस्य स्वामिनो नामानि तस्य कीर्त्तिं आमयोऽत्र श्वेतकुष्ठं ५ यस्यमेऽमृतस्वरूपेऽम लेयशसि श्रवणेनावगाहः प्रवेशः श्वपचमभिव्याप्य जगत्सद्यस्तत्क्षणमेव पुनाति सोऽहं विकुंठः भवद्भ्यो हेतुभूतेभ्यः उ पलब्धा प्राप्ता सुशोभना तीर्थभूता कीर्त्तिर्येन स स्वबाहुस्थानीयं लोके श्वरमपि हन्यां कैल्पस्य कथैवेत्यर्थः स्वगुणानुवर्ण

यन्नामानि च गृह्णाति लोको भृत्ये कृतागसि सोऽसाधुवादस्तत्कीर्त्तिं हंति त्वचमिवामयः ५ य स्यामृतामलयशःश्रवणावगाहः सद्यः पुनाति जगदाश्वपचाद्विकुंठः सोहं भवद्भ्य उपलब्धसु तीर्थकीर्त्तिश्छिंद्यां स्वबाहुमपि वः प्रतिकूलवृत्तिं ६ यत्सेवया चरणपद्मपवित्ररेणुं सद्यः क्षता खिलमलं प्रतिलब्धशीलं न श्रीर्विरक्तमपि मां विजहाति यस्याः प्रेक्षालवार्थ इतरे नियमान्व हंति ७

तत्तु ब्राह्मणोत्कर्षार्थमेव ६ चरणपद्मयोः स्थितिः पवित्रो रेणुर्यस्य अतएव सद्यः क्ष तो निरस्तः अखिलस्य लोकस्य मलो येन यद्वा चरणपद्माद्गतः पवित्रो रेणुर्यस्मिन्निति क्षतो खिलो मलो यस्ये ति च विग्रहः प्रतिलब्धं प्राप्तं शीलं येन एषां सेवया एते गुणा मम अतएव श्रीर्मां न विजहाति प्रेक्षालवार्थे अव लोकावलेशार्थं इतरे ब्रह्मादयस्तेषां वः प्रतिकूलकृतिं छिंद्यामिति पूर्वेणैव संबंधः ७ ॥ ऽऽ ॥ ऽऽ

भा०टी०
७२

तत्तस्मान्मे वयसा यमभिप्रायं अलक्ष्यमाणौ अजानंतौ युष्मदपरोहितां गतिं सद्यः प्राप्य मत्समीपं इतां प्राप्नुतां तत्तदिति
स मेनुग्रहः तमेवाह यद्भृत्ययोर्विवासः अचिरतः शीघ्रं कल्प्यतां संपाद्यतां समाप्यतामिति १२ उशतीं कमनीयां पि
यादेवीं द्योतमानां ऋषिकुल्यां ऋषयो मंत्रास्तद्रूपां ऋषिकुलयोग्यामितिवा सरस्वतीं वाचं आस्वाद्यतन्माधुर्यमनुभूय सर्प
प्रायेणमन्युनादष्टानामपि क्रोधविषव्याप्तानां मनोरसानुभवाभावात् प्रियभाषणमपि न सहते तेषां तु आत्मा मनः नातृप्यत

तन्मे स भर्तुरवसायमलक्षमाणौ युष्मद्व्यतिक्रमगतिं प्रतिपद्य सद्यः भूयो ममांतिकमितां तदनुग्रहो मे यत्क
ल्प्यतामचिरतो भृतयोर्विवासः १२ श्रीब्रह्मोवाच अथ तस्योशतीं देवीमृषिकुल्यां सरस्वतीं नास्वाद्य मन्यु
दष्टानां तेषामात्माप्यतृप्यत १३ सतीं व्यादाय शृण्वंतो लघ्वीं गुर्वर्थगह्वरां विगाह्यागाधगंभीरां न विदुस्तच्चिकी
र्षितं १४ ते योगमाययारब्धपारमेष्ठ्यमहोदयं प्रोचुः प्रांजलयो विप्राः प्रहृष्टाः क्षुभितत्वचः १५

अलमिति नामन्यत १३ सतीं श्रेष्ठां व्यादाय प्रसार्य्य कर्णं दत्त्वेत्यर्थः लघ्वीं मिताक्षरां गुरुभिः अर्थैः गह्वरां दुःप्रवेशां अगाधामभि
प्रायतः गंभीरामर्थतः विगाह्य विचार्यापि किमस्मानभिनंदति निंदति वा अस्मत्कृतं दंडवासं कोचयतीति न विदुः १४ तत्र अभिनंद
तीति ज्ञात्वा ते हृष्टाः संतः प्रोचुः कुपिताः क्षुभिताः रोमांचिताश्च त्वचो येषां कुपितेति पाठे संजातरोमकूपोत्थरोमांचितत्वमेवोक्तं आर
ब्धः आविष्कृतः पारमेष्ठ्यस्य परमैश्वर्यस्य महोदयः परमोत्कर्षो येन तं अधिराज त्वमाविष्कृत्य राजन्ति द्वाभ्यां ब्राह्मणान्

भागवतटीकायांस्कंधः ३
७२

किंच मे तनूः रधिष्ठानानि काः ताः द्विजवरान् दुहती दोग्ध्रीर्गा इत्यर्थः दुहितॄरिति पाठे पि गा एव विष्णुरूपा सूर्याद्
युत्पन्नत्वात् सूर्यस्य ता भगवद् इति वचनात् अलब्धशरणानि रक्षकहीनानि भेदबुद्ध्या मदधिष्ठानेन भवन्तीति पृथक् द्रक्ष्यन्ति
अघेन हतेन ष्टा दृष्टिर्येषां तान् मदीयोधिकृतो दंडनेता यो यमः तस्य गृध्राकाः दूताः अहिवन्मन्युर्येषां ते रुषा क्रोधेन कु
षंति चंचुभिश्छिंदंति १० एवंभूतास्तु मां वशीकुर्वंतीत्याह ये क्षिपतः परुषं भाषमाणानपि ब्राह्मणान् संबोधयंति

॥ ये मे तनूर्द्विजवरान् दुहतीर्मदीया भूतान्यलब्धशरणानि च भेदबुद्ध्या
॥ द्रक्ष्यंत्यघक्षतदृशो ह्यहिमन्यवस्तान् गृध्रा रुषा मम कुषंत्यधिदंडनेतुः १०
ये ब्राह्मणान्मयि धिया क्षिपतोर्चयंतस्तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः
वाण्यानुरागकलयात्मजवद्गृणंतः संबोधयंत्यहमिवाहमुपाकृतस्तैः ११

मयि या धीस्तया वासुदेवदृष्ट्या अर्चयंतः संतः तुष्यद्धृदः प्रीयमाणचित्ताः स्मितमेव सुधा तया उक्षितं सिक्तं प
द्मतुल्यं वक्त्रं येषां अनुरागकलया प्रेमशोभया वाचा गृणंतः स्तुवंतः यथा कुपितमात्मजं स्निग्धः पिता सत्पु
त्रो वा पितरं अहमिव भगवन् युष्मान्स्वामि ते रहं मुपाकृतो वशीकृतः ११ ॥ ९९

भा०त० विविक्तैःचरितैःविशुद्धैःपरिचरणैः अनुवर्त्तमानांसेवमानामपियोनात्याद्रियत् नातीतवान् सएवंभूतस्त्वं अयंभावः इ
७३ त्यनयामातिलंपटतयालक्ष्मीस्त्वांसेवते कथंएवंहिसामेने अयंहिसारग्राहीमधुव्रतः चंचलश्चलत्सञ्चाङ्घ्रिगतायांतुलस्यां
सपरिस्वरेणनिश्चलःसन्रमते अतोऽङ्घ्रिलावण्यमत्यधिकंस्यात् ततोहंवक्षसिस्थितापियोगिभिर्जनादिवक्कुसेवकसंघर्षभंगी
कृत्यापितुलस्यासहसापत्न्येनापिचरणौसेविष्यामीति तदेवममौसत्वेनानुवर्त्तमानामपितांत्वंनातीवाद्रियसे य

यस्त्वंविविक्तचरितैरनुवर्त्तमानांनात्याद्रियेत्परमभागवतप्रसंगः सत्वंद्विजा
नुपथपुण्यरजःपुनीतः श्रीवत्सलक्ष्मकिमगाभगभाजनस्त्वं २१

नःपरमभागवतेष्वेवप्रकृष्टसंगवान् सएवपरमसौभाग्यनिधिस्त्वं अतोब्राह्मणप्रसादान्मांश्रीर्नविजहातीत्यलभ्य
लाभत्वेननिर्द्देशोनसमंजसइति किंचस्वतएवत्वंभगभाजनः भजनीयानांगुणानामाश्रयः परमस्तुद्धश्च तत्त्वांद्विजानाम
नुपथंपथिपथिलग्नंयत्पुण्यरजःतयाचश्रीवत्सलक्ष्मचकिंपुनीतःपवित्रीकृतः किंकिमगावातेतभेआगाःप्राप्तः भ
षणत्वेनस्वीकृतवानसि अतोयत्सेवयाचरणपद्मपवित्ररेणुमित्यादिवचनंलोकसंग्रहमात्रमित्यर्थः २१ ७३

अध्यक्षः सर्वेश्वरः सन् तद्द्विजात्मकृतं मन्य इत्युक्त्वा ममापराधः कृत इति तथा तदनुग्रहो मे इत्यादिवचनेन ममानुग्रहश्चेति यत्प्रभाषसे तेन यच्चिकीर्षितं तन्न विद्मः १६ किलेति लोकशिक्षार्थं स्वाचरितं परमार्थमाहुः विप्राणामिति देवदेवानां देवपूज्यानां अपि भगवान् त्वं आत्मा च देवतं च १७ लोकरक्षार्थताप्रपंचः त्वत्त इत्यष्टाभिः धर्मस्त्वत्त एव भवति रक्षते च तव अवतारैः॥ परमः फलरूपः॥ अत एव गुह्यः गोप्यः न च स्वर्गादि फलवद्विकारी किंतु निर्विकारो मतः अत एवंभूतस्य तवेदं लोकशि

ऋषय ऊचुः॥ नवयं भगवन्विद्मस्तव देव चिकीर्षितं कृतो मेनुग्रहश्चेति यदध्यक्षः प्रभाससे १६ ब्रह्मण्यस्य परं दैवं ब्राह्मणाः किल ते प्रभो विप्राणां देवदेवानां भगवानात्मदैवतं १७ त्वत्तः सनातनो धर्मो रक्ष्यते तनुभिस्तव धर्मस्य परमो गुह्यो निर्विकारो भवान्मतः १८ तरंति ह्यंजसा मृत्युं निवृत्ता यदनुग्रहात् योगिनः स भवान्किंस्विदनुगृह्येत यत्परैः १९ यं वै विभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसा धृतपादरेणुः धन्यार्पितांघ्रितुलसीनवदामधाम्नो लोकं मधुव्रतपतेरिव कामयाना २०

क्षामात्रमिति भावः १८ विपरीतं चेदमित्याहुः तरंतीति यस्यानुग्रहादेव निवृत्ताः विरक्ता योगिनश्च संतो मृत्युं तरंति स भवान् परैरनुगृह्यत इति किंस्वित् न किंचिदित्यर्थः १९ यच्चोक्तं यशसेवया चरणपद्मपवित्ररेणुं सद्यः कृताखिलमलं प्रतिलब्धशीलमित्यादि तदत्यंतमसंभावितमित्याहुर्द्वाभ्यां यं वै विभूति लक्ष्मीः अनुवेलं अवसरे अवसरे उपयाति सेवते धृतः पादरेणुर्यस्य धन्यैः सुकृतिभिरर्पितं अंघ्रौ यत्तुलस्याः नवं दाम माला तद्धाम स्थानं यस्य तस्य मधुव्रतपतेः भ्रमरमुख्यस्य लोकं स्थानं मक्षिका मयमानेव २० ॥ ॥

भा० तृ०
७४

नश्यत्विति च त्राहुः तद्धेदमार्गेन शानमिति लोकोकोक्तिः सत्वनिधित्वाज्जनाय क्षेमं विधातुमिच्छोः अत एव निजभक्तिभिः
एजादिभिरुत्पादितधर्म्मत्तत्प्रतिपक्षस्य अतस्तवब्रह्मकुलेऽवनतिर्युक्तैव ननु महतोऽल्पेष्ववनतिस्तेजोहानिक
रीतत्राहुः एतावतात्रधर्मत्राणप्रयोजनेन अवनतस्य न मनं कृतवतस्तवतेजः प्रभावोनक्षतंनक्षीणं यतः सनमना

तत्तेनभीष्टमिवसत्त्वनिधेर्विधित्सोः क्षेमंजनायनिजशक्तिभिरुद्धृतारेः नैतावतात्र्यधिपते
र्वत विश्वभर्तुस्तेजःक्षतंत्ववनतस्य सतेविनोदः २४ यंवानयोर्दममधीशभवान्विधत्ते वृत्तिंनुवा
तदनुमन्महिनिर्व्यलीकं अस्मासुवायउचितोध्रियतांसदंडोयेनागसौवयमयुंक्ष्महिकिल्बिषेण
२५ श्रीभगवानुवाच एतौसुरेतरगतिंप्रतिपद्यसद्यः संरंभसंभृतसमाध्यनुबद्धयोगौ भूयः सका
शमुपयास्यतआशुयोवः शापोमयैवनिमितस्तदवेतविप्राः २६

दिस्तेविनोदः २४ शापानुग्रहंपरि
त्यज्यविज्ञापयंति यंवान्यदंडंविधास्यतिभवान् वृत्तिंनुअधिकांवातत्सर्वमनुमन्यामहे येवयंनिरपराधा
वेतौकिल्बिषेणशापेनायुंक्ष्महियोजितवंतः २५ मत्कारित्वात्शापस्ययुष्माकंनापराध इत्याश्वाशयन्नाह ए
तौसद्य एवासुरयोनिंप्राप्यभूयोप्याशुमत्समीपमागमिष्यतः संरंभेणक्रोधावेशेनसंभृतः संवृद्धोयः समाधिः
एकाग्रतातेनानुबद्धोदृढीकृतोयोगोययोः हेविप्राः योवःशापः युष्मत्कृतःशापः नदितिसः मयैवनिमितः

श्री [illegible]
७४

१०९

धर्मम्रक्षैश्वतवेदमुचितमेवेत्याहुः धर्मस्येतित्रिभिः त्रिष्वेवयुगेष्वाविर्भवतीतित्रियुगः यद्वा त्रीणियुगलानिषड्गुणाः
भगवत्सख्वाच्याःसंत्यस्येतित्रियुगः हेत्रियुग धर्मरूपस्यतवत्रिभिःपद्भिःस्वैरसाधारणैस्तपःसौचदयादिभिःसत्यस्य
धर्मपादरूपस्यधर्मविह्नवेपिकलयानुवर्त्तमानत्वात्त्रिभिरित्युक्तं भृतंपालितं किंकृत्वानास्माकंवरदयासत्वेन त
नुवातन्वोसत्वमूर्त्त्येतदभिधानितेषांपादानामभिधानकंरजश्चतमश्चनिरस्य निराकृत्य द्विजानांदेवतानांचप्र

धर्मस्यतेभगवतस्त्रियुगत्रिभिःस्वैःपद्भिश्चराचरमिदंद्विजदेवतार्थे नूनंभृतंतदभि
धातिरजस्तमश्चसत्वेननोवरदयातनुवानिरस्य २२ नत्वंद्विजोत्तमकुलंयदिहात्म
गोपंगोप्तावृषःस्वर्हणेनससूनृतेन तर्ह्येवनंक्ष्यतिशिवस्तवदेवपंथालोकोग्रहीष्य
दृषभस्यहितत्प्रमाणम् २३

योजनायतन्भृतं यद्वाहिलोपेरूपंनिरस्येति अस्माकंतन्निवर्त्तयेत्यर्थः २२ आत्मगोपंत्वयैवरक्षणीयं द्विजो
त्तमानांकुलंयदि हस्फुटं त्वंनगोप्तानरक्षिता तृन्नत्ययांतत्वात्षष्ठीप्रयोगः वृषःश्रेष्ठः हेदेव पंथावेदमा
र्गोनंक्ष्यति नाशंयास्यति ऋषभस्यश्रेष्ठस्य हियस्मात्तत् अनर्हणं असूनृतंच अग्रहीष्यत् तदुक्तं
गीतासु यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः सयत्प्रमाणंकुरुतेलोकस्तदनुवर्त्ततइति २३ ॥ ॥

भा० तृ०
७५

विकुंठस्य धिषण्यात् स्थानात् पुत्रकाः हे देवाः ३२ काश्यपं तेजो वीर्यं प्राप्तौ ३३ सह गर्भं प्रविष्टौ यमौ तयोः तेजसा
युष्मत्तेजः आक्षिप्तं तिरस्कृतं न चात्र कृतविधिः शक्यः यत एवं तर्हि इदानीं भगवानेव तद्देवं विधातुमिच्छति ३४ तथा
पि कोप्युपायो विचार्यतामिति चेत्तत्राह त्रयाणां गुणानामीशः स एव सर्वोत्कर्षः कालेन क्षेमं विधास्यति विमृशेन

तदा विकुंठधिषणात्तयोर्निपतमानयोः हाहाकारो महानासीद्विमानाग्र्येषु पुत्रकाः ३२ तावेव ह्य
धुना प्राप्तौ पार्षदप्रवरौ हरेः दितेर्जठरनिर्विष्टं काश्यपं तेज उल्बणं ३३ तयोरसुरयोरद्य तेजसा
यमयोर्हि वः आक्षिप्तं तेज एतर्हि भगवांस्तद्विधित्सति ३४ विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो योगे
श्वरैरपि दुरत्यययोगमायः क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्मदीयविमृशेन कियानिहार्थः
३५ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरमैत्रेयसंवादे जयविजयभ्रंशो षोडशोध्यायः ॥ १६ ॥ श्रीमै
त्रेय उवाच ॥ निशम्यात्मभुवा गीतं कारणं शंकयोज्झिताः ॥ ततः सर्वे न्यवर्तंत त्रिदिवाय दिवौकसः ॥ १ ॥ दि
तिस्तु भर्तुरादेशादपत्यपरिशंकिनी ॥ पूर्णे वर्षशते साध्वी पुत्रौ प्रसुषुवे यमौ २

विमर्शेन ॥ ३५ ॥ इति तृतीये षोडशः ॥ १६ ॥ ततः सप्तदशेऽनन्तयोर्लोकभयंकरं हिरण्याक्षप्रभावश्च वर्ण्यते दितिजयोरिह तु ॥
क्षेमं विधास्यतीति ब्रह्मवच नानंतरं तयोः शंकया त्यक्ताः १ भर्तुरादेशात् लोकान् सपालान् स्त्रीश्च डिमुकुराकं दयिष्यत इति वा
कश्यपात् स्वापत्याभ्यां परिशंकिनी देवोपद्रवशंकमाना २

७५

मैत्रोत्सवजनकं विकुंठः हरिः तन्निवासं वैकुंठलोकं स्वयंप्रभं प्रकाशांतरानपेक्षं सत्वपरिणामत्वात् अनुमान्य अनुज्ञाप्य
परिक्रम्य प्रदक्षिणीकृत्य ॥२७॥ समेवतुमतं संमतं इदमत्र तत्वं यद्यपि सनकादीनां क्रोधं न संभवति न च भागवत्पार्षदयो
स्तयोर्ब्राह्मणप्रतिकूल्यं न च भगवतः स्वभक्तोपेक्षा ॥ न च वैकुंठगतानां पुनर्जन्म तथापि भगवतः सिसृक्षादिवशात् दाचि
त् उत्तामजनि ॥ तदा अन्येषामल्पवलत्वात् स्वपार्षदानां च तत्तुल्यवलत्वेपि प्रतिपक्षानुपपन्ने एतावेव ब्राह्मणनिवारणे

श्रीब्रह्मोवाच ॥ अथ ते मुनयो दृष्ट्वा नयनानंदभाजनं वैकुंठं तदधिष्ठानं विकुंठं च स्वयंप्रभुं भग
वंतं परिक्रम्य प्रणिपत्यानुमान्य च प्रत्याजग्मुः प्रमुदिताः शंसंतो वैष्णवीं श्रियं २७ भगवाननुगावा
ह यातं मा भैष्टमस्तु शं ब्रह्मतेजः समर्थोपि हंतुं नेच्छे मतं तु मे २८ मयि संरंभयोगेन निस्तीर्य ब्र
ह्महेलनं प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः २९ द्वास्थावादिश्य भगवान् विमानश्रेणि
भूषणं सर्वातिशयया लक्ष्म्या जुष्टं स्वं धिष्ण्यमाविशत् ३० तौ तु गीर्वाणऋषभौ दुस्तराद्धरिलोक
तः हतश्रियौ ब्रह्मशापादभूतां विगतस्मयौ ३१

प्रवर्त्यैतेषु क्रोधमुद्दीप्य तच्छापव्याजेन प्रतिपक्षौ विधाय युद्धकौतुकं संपादनीयमिति भगवद्भावसितं अतः स
र्वं संगच्छते तदिदमुक्तं शापो मयैव निर्मितः इति मा भैष्टमिति अस्तु शमिति हंतुं नेच्छे मतं तु मे इत्यादि च २८
प्रत्येष्यतं प्रत्येष्यथः निकाशं समीपं २९ ३० दुस्तरात् ब्रह्मशापात् हरिलोकतः पततां तु भौ वितिशेषः हरिलोकतः एव हत

भा० तृ०
७६

ग्रामसिंहाः पशुवच्छ्वानः १० कर्कशैस्तीक्ष्णैः हे क्षत्तः खार्कारो गर्दभजातिशब्दस्तस्मिन् रभसो संभ्रमो येषां वरूथशः
संघशः ११ रासभशब्दात्त्रस्ताः सर्वतः क्रोशंतः १२ गावोऽत्रसन् असृग्दोहाश्च बभूवुः देवलिंगानि व्यरुदन् प्रति
मानां अश्रुस्रावश्चासीदित्यर्थः १३ पुण्यतमान् गुरुबुधादीन् भगणान् वक्रनिनक्षत्राणि च अन्ये क्रूरग्रहा मंगलादयः

सगीतवद्रोदनवदुन्नमय्य शिरोधरं व्यमुचन् विविधा वाचो ग्रामसिंहास्ततस्ततः १० खराश्च कर्कशैः
क्षत्तः खुरैर्घ्नंतो धरातलं खार्कार रभसा मत्ताः पर्यधावन् वरूथशः ११ रुदंतो रासभत्रस्ता नीडादुद
पतन् खगाः घोषेऽरण्ये च पशवः शकृन्मूत्रमकुर्वत १२ गावोऽत्रसन्नसृग्दोहास्तोयदाः पूयव
र्षिणः व्यरुदन् देवलिंगानि द्रुमाः पेतुर्विनानिलं १३ ग्रहान्पुण्यतमानन्ये भगणांश्चापि दीपिताः अ
तिचेरुर्वक्रगत्या युयुधुश्च परस्परं १४ दृष्ट्वान्यांश्च महोत्पातानतत्त्वविदः प्रजाः ब्रह्मपुत्रान् ऋते भी
ता मेनिरे विश्वसंप्लवं १५ तावादिदैत्यौ सहसा व्यज्यमानात्म पौरुषौ ववृधाते श्मसारेण का
येनाद्रिपती इव १६ दिविस्पृशौ हेमकिरीटकोटिभिर्निरुद्धकाष्ठौ स्फुरदंगदाभुजौ गां कंपयंतौ चरणैः
पदे पदे कट्या सुकांच्यार्कमतीत्य तस्थतुः १७

अतिचेरुः अतिक्रम्य जग्मुः वक्रगत्या इत्यत्र युयुधुश्च १४ ब्रह्मपुत्रान् ऋते विना तेषां स्वरूपादिज्ञानात् १५ व्यज्यमाना आत्मपौरु
षं पूर्वसिद्धं स्वपौरुषं ययोः १६ निरुद्धा व्याप्ता काष्ठा दिशो याभ्यां स्फुरंत्यंगदानि येषु ते भुजौ ययोः अंगदेत्यावंतत्वमार्षं

श्रीमद्भागवतटीकायां ७
७६

तत्रनिपेतुः ३ उद्बभ्रुः अचलैःसहिताभुवःप्रदेशाः केतवश्चउदयंचक्रुरितिशेषः ४ फूत्कारानितितीव्रवायुशब्दानुक
र्वन्नगपतीन्महावृक्षान् वात्याएवअनीकंयस्यरजएवध्वजोयस्य ५ उद्यदीर्हसंत्यइवतडितोयेषुतेषामंबुदानांघटयासमू
हेननष्टोभागणःसूर्यादिग्रभासमूहोयस्मिन्पदंस्थानंनव्यादृश्यतेस्म ईषदपिनादृश्यत ६ वार्द्धिःसमुद्रःविमनाइव

उत्पाताबहवस्तत्रनिपेतुर्जायमानयोः दिविभुव्यंतरिक्षेचलोकस्योरुभयावहाः ३ सहाचलाभुव
श्चेलुर्दिशःसर्वाःप्रजज्वलुः सोल्काश्चाशनयःपेतुःकेतवश्चार्त्तिहेतवः ४ ववौवायुःसुदुःस्पर्शः
फुत्कारानीरयन्मुहुः उन्मूलयन्नगपतीन्वात्यानीकोरजोध्वजः ५ उद्यसत्तडिदंभोदघटयान
ष्टभागणे व्योम्निप्रविष्टतमसानस्मव्यादृश्यतेपदं ६ चुक्रोशविमनावार्द्धिरुद्गूर्मिःक्षुभितोदरः
सोदपानाश्चसरितश्चुक्षुभुःशुष्कपंकजाः ७ मुहुःपरिधयोभूवन्सराह्वोःशशिसूर्ययोः निर्घा
तारथनिर्ह्रादाविवरेभ्यःप्रजज्ञिरे ८ अंतर्ग्रामेषुमुखतोवमंतोवह्निमुल्वणं शृगालोलूकटंकारैः
प्रणेदुरशिवाःशिवाः ९

उद्गताऊर्मयोयस्मात् क्षुभितंउदरंस्यामकरादयोयस्मिन् उदपानेर्वापीकूपादिभिःसहिताःशुष्काणिपंकजानिया
सु ७ परिधयःपरिवेषाःसराह्वोः राहुग्रस्तयेनिर्घाताःनिरभ्रगर्जितानि रथनिर्ह्रादतुल्यध्वनयःविवरेभ्यःगि
रिगुहाभ्यः ८ शृगालानामुलूकानांचटंकारैर्ध्वनिभिःसहशिवाःशृगाल्यः ९

स्वेन महसा तिरोहितान् दृष्ट्वा त्वा क्षीबान् मत्तांस्तान् अपश्यन् सन् क्षीवानिति पाठे पौरुषहीनान् २२ २३ सन्नात्र अवसन्ना धी येषां वर्चसा तेजसा प्रधर्षिताः अभिभूताः सन्तः २४ महोर्मीन् अभिजघ्ने मौर्व्या मारयतीति मौर्वी काष्र्णायसं तन्मय्या

सवै तिरोहितान् दृष्ट्वा महसा स्वेन दैत्यराट् सेन्द्रान् देवगणान् क्षीवानपश्यन् व्यनदद् भृशं २२ ततो निवृत्तः क्रीडिष्यन् गंभीरं भीमनिस्वनं विजगाहे महासत्वो वार्धिं मत्त इव द्विपः २३ तस्मिन् प्रविष्टे वरुणस्य सैनिका यादोगणाः सन्नधियः ससाध्वसाः अहन्यमाना अपि तस्य वर्चसा प्रधर्षिता दूरतरं प्रदुद्रुवुः २४ स वर्षपूगान् उदधौ महाबलश्चरन् महोर्मीञ्छ्वसनेरितान् मुहुः मौर्व्याभिजघ्ने गदया विभावरीमासेदिवांस्तात पुरीं प्रचेतसः २५ तत्रोपलभ्यासुरलोकपालकं यादोगणानामृषभं प्रचेतसं स्मयन् प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संयुगं २६ त्वं लोकपालोऽधिपतिर्बृहच्छ्रवा वीर्यापहो दुर्मदवीरमानिनां विजित्य लोकेऽखिलदैत्यदानवान् यद्राजसूयेन पुरायजत् प्रभो २७

यद्वा मूर्वी नाम तृणविशेषः तन्मयरज्ज्वा दृढनिबद्धयेत्यर्थः विभावरी संज्ञां आसेदिवान् प्राप्तः २५ असुरगणं लोकं पान्तीति तत्पालकं प्रलब्धुं उपलसितुं प्रणिपत्य २६ यद्यस्मात् राजसूयेन भवान् अयजत् २७ ॥

यमयोर्मध्येयःस्वदेहात्प्रथममजायत तंयथाहिरण्यकशिपंविदुः सादितिःप्रथमंयंअसूततंहिरण्याक्षं
यथाविदुःतथानामकृतवानित्यर्थः अयंभावः यदाहिगर्भाधानसमयेयोनिपुष्पंविशद्वीर्यंद्विधाविभक्तंआदि
पश्चाद्भावेनप्रविशतितदायमौभवतः प्रवेशक्रमविपर्य्ययेणमातृतःप्रसूतिः यदाविशेद्द्विधाभूतंवीर्य्यंपुष्पंपरि
हरेत् द्वौतदाभवतोगर्भौप्रसूतिर्व्वैषविपर्य्ययादितिपिंडसिद्धिस्मरणात् अतःस्वदेहात्पूर्वंयोजातः तस्यहिरण्यक

प्रजापतिर्नामतयोरकार्षीद्यःप्राक्स्वदेहाद्यमयोरजायत तंवैहिरण्यकशिपुं विदुःप्रजायंतंहि
रण्याक्षमसूतसाग्रतः १८ चक्रेहिरण्यकशिपुर्दोर्भ्यांब्रह्मवरेणच वशेसपालांल्लोकांस्त्रीनकुतो
मृत्युरुद्धतः १९ हिरण्याक्षोनुजस्तस्यप्रियःप्रीतिकृदन्वहं गदापाणिर्दिवंयातोयुयुत्सुर्मृगयन्
रणं २० तंवीक्ष्यदुःसहजवंरणत्कांचननूपुरं वैजयंत्यास्रजाजुष्टमंसन्यस्तमहागदं मनोवीर्यवरो

शिपुरिति दितिःप्रथमंयंअसूततस्यहिरण्याक्षइतिनामकृतवानिति १८ दोर्भ्यामुद्धतः ब्रह्मवरेणाकुतोमृ
त्युः १९ रणंयुद्धम् २० दुःसहोजवोवेगोयस्य रणंतौकांचनमयौनूपुरौयस्य अंसेन्यस्तामहतीगदायेन
मनसासौर्येणवीर्य्येणबलेनवरेणचउत्सिक्तंगर्वितं असृण्यंनिरंकुशं निलिल्यिरेलीनाबभूवुः २१

[illegible] मूल०१ रोत्सिक्तमसृण्यमकुतोभयं भीतानिलिल्यिरेदेवास्तार्क्ष्यत्रस्ताइवाहयः २२

१६०
प
नु

भा० टी०
७८

एहि आगच्छ रसौकसां पातालवासिनां नोऽस्माकं समर्पिता अन्यथा पातालावतरणमस्यानघटनमिति भावः हिरण्या
क्षेणाधिपार्थे प्रयुक्तापि भारती वस्तुतो भगवंतं स्तौति तथाहि अक्षगोचरः जलशयानः श्रीनारायणः स एव योगिभिर्मृ
ग्यते दुष्टान्वा हन्तुं मृगयत इति मृगः अज्ञः नास्ति ज्ञो यस्मात् सर्वज्ञ इत्यर्थः सुराधमा यस्मात् हे असुरोत्तम ममेक्ष
माणस्यापि सतः मामनादृत्यापि च मनया सह वर्त्तमानः नोऽस्मदीयं स्वस्ति समस्तं मंगलं राज्यं यास्यसि नात्र संदेहः त
थाप्यस्मत्कृपया विमुंचेत्यर्थः आसादिता लीलया स्वीकृता सूकराकृतिर्येन ३ अभवाय नाशाय भृतः पुष्टः वस्तुत

आहैनमेह्यज्ञ महीं विमुंच नो रसौकसां विश्वसृजेयमर्पिता न स्वस्ति यास्यस्यनया ममेक्ष
तः सुराधमासादितसूकराकृते ३ त्वं नः सपत्नैरभवाय किं भृतो यो मायया हंत्यसुरान्प
रोक्षजित् त्वां योगमायाबलमल्पपौरुषं संस्थाप्य मूढ प्रमृजे सुहृच्छुचः ४ ॥

स्तु मोक्षाय भृतो धृतः आश्रित इत्यर्थः यो भावात् परोक्षेण चौर्येण जयतीति तथा वस्तुतस्तु दूर एव स्थि
त्वा जयतीति संस्थाप्य हत्वा वस्तुतस्तु योगमायारूपमचिंत्यं बलं यस्य अल्पं पौरुषं यस्मात् तं त्वां सम्यक्प्र
स्थापयित्वा भक्त्या हृदि स्थिरीकृत्येत्यर्थः हे मूढगत प्रतिश्राप्यायतीति तथा एपूतौ विति धातुः सुहृदः शुचः सं
सारदुःखानि मृजे नाशयामि यतस्त्वं स्मत्तुर्वां धवानपि मोचयसीति भावः ४ ॥ ६६

७८

उपशामं युद्धादिकौतुकाद्दुपरमं २८ युद्धमार्गनिपुणं त्वायस्तोषयिष्यति तं द्रष्टुं गच्छ गदपाणेस्तु वंति ॥ २९ ॥ आरात्स्व
ष्टुं विस्मयः नष्टगर्वः वीरशायेरणांगणे रूपाणि वाराहाद्युचतारान्द ३० ॥ इति तृतीये सप्तदशः ॥ १७ ॥ अष्टादशे हिरण्याक्ष

स एव मुत्सिक्तमदेन विद्विषा दृढं प्रलब्धो भगवानपांपतिः रोषं समुत्थं समयत्स्वयाधिया न्यवोच
दंगोपशमंगतावयं २८ पश्यामि नान्यं पुरुषात्पुरातनाद्यः संयुगे त्वां रणमार्गकोविदं आराधयि
ष्यत्यसुरर्षभेहितं मनस्विनो यं गृणंति भवादृशाः २९ तं वीरमारादभिपद्य विस्मयः शयिष्यसे वीरश
ये श्वभिर्वृतः ॥ यस्त्वद्विधानामसतां प्रशांतये रूपाणि धत्ते सदनुग्रहेच्छया ॥ ३० ॥ इति श्रीमद्भागवते म
हापुराणे तृतीयस्कंधे विदुरमैत्रेयसंवादे आदिदैत्योत्पत्तिर्नाम सप्तदशोध्यायः ॥ १७ ॥ श्रीमैत्रेय उवाच ॥ तदे
वमाकर्ण्य जलेशभाषितं महामनास्तद्विगणय्य दुर्मदः हरेर्विदित्वा गतिमंग नारदाद्रसातलं निर्वि
विशे त्वरान्वितः १ ददर्श तत्राभिजितं धराधरं प्रोन्नीयमानावनिमग्रदंष्ट्रया मुष्णंतमक्ष्णा स्वरुचोरु
णश्रिया जहास चाहो वनगोचरो मृगः २
धरोद्धर्त्तवराहयोः निर्विशेषं महायुद्धं देवद्रोभि निरूप्यते प्रतियोद्धारं श्रुत्वा महामनाः शयिष्यस इति यदुक्तं तद्वि
गणय्य अगणयित्वा यतो दुर्मदः १ अभिजितो जयती त्यभिजितस्तं श्रीहरिं प्रकर्षेणोर्द्ध्वं नीयमाना अवनिर्येन अग्रदंष्ट्र
या दंष्ट्राग्रेण स्वरुचः हिरण्याक्षतेजांसि अरुणश्रिया युक्तं यन्नेत्रं तेन नेत्रेण मुष्णंतं तिरस्कुर्वंतं अहो चित्रं वनगोचरो मृगः

भागवराहः २

स्तभगयान्विश्वसृजामिष्टुतो विबुधैश्च प्रसन्नैर्विबुधैरभिष्टुतः इति सलिलस्योदस्तात् उपरिव्यवहारगोचरे देशे
गां विन्यस्य स्वसत्त्वमाधारशक्तिं निहितवान् ७ ईशस्तस्य पश्यत एव ८ पराएष्टतोऽनुषक्तो लग्नः तपनीयोपकल्पं
सुवर्णाभरणं कांचनमयः चित्रो दंशः कवचं यस्य तं दैत्यं प्रचंडमन्युत्वं अधिक्षेपादिकं चानुकरणमात्रं दैत्यवा
क्यभीतानां देवानां भयनिरस्तये वस्तुतस्तेन तथाऽनुक्तत्वेन कोपादिहेत्वभावात् ९ ग्रामसिंहान्शुनः प्रति

सगामुदस्तात्सलिलस्य गोचरे विन्यस्य तस्यामदधात्स्वसत्त्वं अभिष्टुतो विश्वसृजा प्रसूनैरापूर्यमा
णो विबुधैः पश्यतोरेः ८ परानुषक्तं तपनीयोपकल्पं महागदं कांचनचित्रदंशं मर्माण्यभीक्ष्ण
प्रतुदंतं दुरुक्तैः प्रचंडमन्युः प्रहसंस्तं बभाषे ९ श्रीभगवानुवाच सत्यं वयं भो वनगोचरा मृगा युष्मद्वि
धान्मृगये ग्रामसिंहान् न मृत्युपाशैः प्रतिमुक्तस्य वीरा विकत्थनं तव गृह्णन्त्यभद्र १० एते वयं न्यासह
रा रसौकसां गतह्रियो गदया द्राविताः ते तिष्ठामहेऽथापि कथंचिदाजौ स्थेयं क्व यामो बलिनोत्पाद्य
वैरम् ११

मुक्तस्य बद्धस्य विकत्थनं श्लाघाम् १० न्यासहरा निक्षेपहराः द्राविताः पलायनं कारिताः अथापि त्रस
मर्था अपि तिष्ठामः तत्किं यतः स्थेयम् स्यातव्यमेवास्माभिः तत्किमित्याह क्व यामः गंतव्यदेशाभावात् ११

श्री

अस्मद्भ्रुजच्युतयापि शरदयाग्रशीर्ष्णि शीर्षं यस्य तथाभूते त्वयि सुखं स्थिते सति ये तुभ्यमधुना बलिं हरन्ति नवीना भक्ता ये च पूर्वं भक्ताः ऋषयो देवाश्च ते सर्वे स्वयमेव तु द्य(मं) विनैव अमूल्या न भविष्यन्ति किं तु दृढमूला भविष्यन्तीत्यर्थः ५ स हरिः अरेर्दुरुक्तान्येव तोमराः शस्त्रविशेषास्तैस्तुद्यमानो व्यथ्यमानः दंष्ट्राग्रगतां पृथ्वीं भीतां मा त्यक्त्वा दृष्ट्वा दुरुक्तं व्यथां मृष्यन् सहमान एव निर्गतः करेणुर्हस्तिनी वस्तुतस्तु अरिदुरुक्तानि अमरैर्निमित्तभूतैस्तुद्यमानः यथा स्तुता यग्राहिणं ब्रह्मादीनां व्यथां दृष्ट्वा अनुकम्पया पीड्यमान इत्यर्थः तोदं मृष्यन्नित्यस्याप्ययमेवार्थः ६ सलिलान्निर्गच्छन्तम्

त्वयि संस्थिते गदयाशीर्णशीर्षण्यस्मद्भुजच्युतया ये च तुभ्यं बलिं हरन्त्यृषयो ये च देवाः स्वयं सर्वे न भविष्यन्त्यमूलाः ५ स तुद्यमानोऽरिदुरुक्ततोमरैर्दंष्ट्राग्रगां गामुपलक्ष्य भीतां तोदं मृषन्निरगादम्बुमध्याद्ग्राहाहतः सकरेणुर्यथेभः ६ तं निःसरन्तं सलिलादनुद्रुतो हिरण्यकेशो द्विरदं यथा झषः करालदंष्ट्रोऽशनिनिःस्वनोऽब्रवीद्गतह्रियां किं त्वसतां विगर्हितम् ७

नुगतः स च हिरण्यकशिपुः केशा यस्य दैत्यस्य झषो मकरः करालादंष्ट्रा यस्य अशनिवन्निःस्वनो यस्य निर्ल्लज्जानामसतां किं विगर्हितं मल्लिनिन्दाभयाभावात् पलायनं नायुक्तमित्यर्थः वस्तुतस्तु गतह्रियः प्राप्तह्रियः न सन्ति येभ्यः तेषां कृपालूनां किं विगर्हितं न किंचित् अतः कृपालुत्वाद्दंष्ट्राश्रितभूरक्षणार्थं किंचित्पलायनमपि न निन्दितमित्यर्थः यद्वा लोकोपकाराय भुवं उद्धरतोऽनुद्रवणमनुचितं मन्वानो दैत्य आत्मानमेवा

पिपद्मि पति गतह्रियां त्वा ऐकपक्ष्यं असतामस्माकं द किं विगर्हितं न मत्स्ये पितुर्नास्य वधिगस्मानित्यब्रवीदि

भूत२

भा०त० स्पर्धोः स्पर्द्धमानयोः तिग्माभ्यांगदाभ्यां अहतानित्रंगानिययोः द्वतादास्रवतीतिस्रुतास्रवंतस्यघ्राणमवघ्रा
८० यंतेनविवृद्धोमन्युर्ययोः विचित्रान्गदायुद्धभ्रमणप्रभेदान् मार्गान् चलतोः तस्यांनिमित्तभूतायांपृथिव्याम
त्तयोरीषभयोः प्रस्तुतेपिइलापृथ्वीतदर्थं वृषभौहिखलुनिनादानिसंग्रथितानुगच्छंतौसंघर्षविदीर्णगल
द्रुधिरौपरस्परोपमर्दव्यमोग्रसंरंभौचमत्कारिगजयूथपौयुध्यमानौतिष्ठतइतिप्रसिद्धं मृ० १९ यज्ञा

तयोःस्पर्धोस्तिग्मगदाहतांगयोः क्षतास्रवघ्राणविवृद्धमन्व्योः विचित्रमार्गांश्चरतोर्जिगीषया
व्यभादिलायामिवशुष्मिणोर्मृधः १९ दैत्यस्ययज्ञावयवस्यमाययागृहीतवाराहतनोर्म
हात्मनः कौरव्यमह्यांद्विषतोर्विमर्दनं दिदृक्षुरागादृषिभिर्वृतःस्वराट् २० आसन्नशौंडीरमपे
तसाध्वसंकृतप्रतीकारमहार्य्यविक्रमं विलक्ष्यदैत्यंभगवान्सहस्रणीर्जगादनारायणमादि
सूकरं २१

स्वावयवायस्यतस्य मह्यांमहीनिमित्तंद्विषतोः २० आगत्यचनारायणमाह किंकृत्वा दैत्यंविलक्ष्यकथंभू
तम् आसन्नप्राप्तंशौंडीरंशौर्य्यमदोवायेन अपेतंसाध्वसंयस्मात् कृतःप्रतीकारोयेन अहार्य्यः अप्रतिका
र्य्योविक्रमोयस्य सहस्रणीः ऋषिसहस्राणाम् नेता २१ राम रामरामरामरामराम ॥ ss ॥ ss

८०

यद्रथानां पदातीनां ये यूथपास्तेषामधिपः मुख्य इत्यर्थः अस्वस्तये पराभवार्थं आशु घटस्व यतस्व अनुहोति
वितर्कः यो नातिपिपर्त्ति न पूरयति पालयति वा असावसभ्यः सभायामनर्हः १२ सोधिक्षिप्तः सत्यं वयमिति स्मि
केन रुषा प्रलब्धः उपहसितश्च एते वयमिति द्वाभ्याम् क्रीडां कार्यमाणोः हिराट् महासर्प इव १३ मन्युप्रचलि

त्वं पद्रथानां किल यूथपाधिपो घटस्व नोऽस्वस्तय आश्वनूहः संस्थाप्य चास्मान्प्रमृजाश्रु स्वकानां
यः स्वां प्रतिज्ञां नातिपिपर्त्यसभ्यः १२ श्री मैत्रेय उ च सोधिक्षिप्तो भगवता प्रलब्धश्च रुषा भृशं आ
जहारोल्बणं क्रोधं क्रीड्यमानो हिराडिव १३ सृजन्नमर्षितः श्वासं मन्युप्रचलितेन्द्रियः आसाद्य तरसा
दैत्यो गदयाभ्यहनद्धरिं १४ भगवांस्तु गदावेगं विसृष्टं रिपुणोरसि अवंचयत्तिरश्चीनो योगारूढ इव
अंतकं १५ पुनर्गदां स्वामादाय भ्रामयंतमभीक्ष्णशः अभ्यधावद्धरिः क्रुद्धः संरंभाद्दष्टदच्छदं
१६ ततश्च गदयारातिं दक्षिणस्यां भ्रुवि प्रभुः आजघ्ने स तु तां सौम्य गदया कोविदोहनत् १७ एवं ग
दाभ्यां गुर्वीभ्यां हर्यक्षो हरिरेव च जिगीषया सुसंरब्धावन्योन्यमभिजघ्नतुः १८

तेंद्रियतानि दृढभितानींद्रियाणि यस्य १४ अंतकं मृत्युं १५. १६ सौम्य विदुर तां गदाम् स्व
गदामेवाहनत् १७ हर्यक्षो हिरण्याक्षः १८ रामराम रामराम रामराम ॥ रामरामराम

भा०टी०
८१

इति च्छायेऽष्टादशः ॥१८॥ ऊनविंशे विरिंच्यादिप्रार्थितेन महामृधे वाराहेण हिरण्याक्षवधः श्लाघ्योऽनुवर्ण्यते नि
र्व्यलीकं च पाठांतरे निष्कपटमभिप्रायं स्नतं च कालात्मनोऽपि ममानुकूलं तत्त्वमुपदिशतीति प्रहस्य अपांगावलोकेन
स्वीकृतवान् १ मुखतः अभिमुखे विहरन्तं कपोलस्याधोभागे अक्षजः ब्रह्मणो घ्राणेंद्रियादाविर्भूतः २ सा स्वगदया तेन

इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरमैत्रेयसंवादे अष्टादशोऽध्यायः ॥१८॥ मैत्रेय उवाच ॥ अवधार्य
विरिंचस्य निर्व्यलीकामृतं वचः प्रहस्य प्रेमगर्भेण तदपांगेन सोऽग्रहीत् १ ततः सपत्नं मुखतश्चरंतमकुतो
भयं जघानोत्पत्य गदया हनावसुरमक्षजः २ सा हता तेन गदया विहता भगवत्करात् विघूर्णि
तापतद्रेजे तदद्भुतमिवाभवत् ३ स तदा लब्धतीर्थोऽपि न बबाधे निरायुधम् मानयन्स मृधे ध
र्मं विष्वक्सेनं प्रकोपयन् ४ गदायामपविद्धायां हाहाकारे विनिर्गते माभैष्टेति सुरानुक्त्वा सुना
भं चास्मरद्विभुः ५ तं व्यग्रचक्रं दितिपुत्राधमेन स्वपार्षदमुख्येन विषज्जमानं चित्रा वाचोऽतद्वि
दां खेचराणां तत्र स्मासन्स्वस्ति तेऽमुं जहीति ६ हता ताडिता ततो विहता विच्युतासीत् विघूर्णिता भ्रमंत्यापतत्तत्र रेजे
च तत् भगवत्करात्पतनं यद्यपि तत्पदस्यावृत्त्या रेजे इत्यनेनापि संबंधः तत् दैत्यपौरुषं रेजे इति ३ लब्ध
तीर्थोऽपि लब्धावसरोऽपि सन् न बबाधे न प्राहरत् समानयन्नवमन्येति वाक्यभेदात् स इत्यस्यापौनरुक्त्यं ४ ५
व्यग्रं संभ्रमं चक्रं यस्य विसज्जमानं विशेषेण संगं प्राप्नुवंतं प्रति अतद्विदां तत्प्रभावमजानतां आसमंता ८१

दृय २

हे देव ते अंघ्रिमूलं प्राप्तानां देवादीनां एषोऽसुरः आगस्कृत् दृष्टैवापराधारोपकः तत्परिहाराय प्रवृत्तौ भयकृत् भीतं दृष्ट्वा दुः
कृत् अर्थप्राणादिहर्ता अस्मत्तो राद्धो वरो येन अन्वेषन् प्रतिरथमवलोकयन् अप्रतिरथः प्रतिपक्षशून्यः २२ यद्यस्मा
देवं भजो यं पापं तस्मा देव मा क्रीडय हे देव यथा उत्थितं क्षुभितं आशीविषं बालाः पुच्छकर्षणादिना क्रीडयति तद्वत् २३ स्वां

ब्रह्मोवाच ॥ एष ते देव देवानामंघ्रिमूलमुपेयुषां विप्राणां सौरभेयीणां भूतानामप्यनागसां आग
स्कृद्भयकृद्दुष्कृदस्मद्राद्धवरोऽसुरः अन्वेषन्नप्रतिरथो लोकानटति कंटकः २२ मैनं मायाविनं दृप्तं नि
रंकुशमसत्तमं आक्रीड बालवद्देव यथाशीविषमुत्थितं २३ न यावदेष वर्द्धेत स्वां वेलां प्राप्य दा
रुणः स्वां देव मायामास्थाय तावज्जह्यघमच्युत २४ एषा घोरतमा संध्या लोकछंबट्करी प्रभो
उपसर्पति सर्वात्मन्सुराणां जयमावह २५ अधुनैषोऽभिजिन्नाम योगो मौहूर्तिको ह्यगात् शि
वाय नस्त्वं सुहृदामाशु निस्तर दुस्तरं २६ दिष्ट्या त्वां विहितं मृत्युमयमासादितः स्वयं विक्रम्यैनं मृ
धे हत्वा लोकानाधेहि शर्मणि २७

आसुरी हे देव स्वां मायां अघं पापं २४ वेलामेवाह एषेति लोकानां छंब
ट्करी विघ्नकरी छंबदित्यव्ययं विनाशे वर्त्तते अभिजिन्मध्याह्ने स एव मौहूर्तिको योगः समुहूर्तः शुभदः का
लः आगात् गतप्राय अतो यावन्मुहूर्त्तशेषोऽस्ति तावदेवाशु त्वमेनं निरस्तरजहि २६ त्वां मृत्युं त्वयैव प्राप्तानुग्र

हृत्काले विहितं निर्मितं आसादितः प्राप्तः शर्मणि सुखे
आधेहि स्थापय २७

भा० टी० अंतरे आकाशमध्ये चकाशमानं उदीर्णं उत्कटा दीधितिर्दीप्तिर्यस्य निशाततनेमिना शितधारे हरिरिंद्रोयघातर्ये
८२ स्यपतत्रमुज्झितं चिच्छेद देवान्निर्जित्य अमृतकलशानयनात् गरुडेनेंद्रप्रयुक्तवज्रस्यामोघस्य मानं दातुं प
क्षमेकं त्यक्तं तद्वद्यथाइंद्रपक्षिच्छेद छिन्नंच ततः यथा खप्रकाशन् तद्वत्प्रकाशमान इत्यभिसंबंधः १४ अरातिसं

ततोजसादैत्यमहाभटार्पितं चकासदंतःस्वनुदीर्णदीधितिः चक्रेणचिच्छेदनिशाततनेमिना ह
रिर्यथाताक्ष्यपतत्रमुज्झितं १४ दृढकेलस्वमूलेवज्रधारिणा हरेःप्रत्येत्यविस्तीर्णमुरे विभूतिमत
प्रकृद्धरोषःसकठोरमुष्टिनानदन्प्रहत्यांतरधीयतासुरः १५ तेनेत्यमाहतःतत्र भगवानादिसूकरः
नाकंपत मनाक्कापि स्वजाहत इवद्विपः १६ अथोरुधाम्नःजन्मायांयोगमाये सुरेहरौ यांविलो
क्यप्रजास्त्रस्तामेनिरेस्योपसंयमं १७ प्रववुर्वायवश्चंडस्तमःपांशवमैरयन् दिग्भ्योनिपेतुर्ग्रा
वाणःक्षेपणैःप्रहिताइव १८ द्यौर्नष्टभगणाभ्रौघैःसविद्युत्स्तनयित्नुभिः वर्षद्भिःपूय
केशासृग्विण्मूत्रास्थीनिचासकृत् १९

त्यस्येत्यरिचक्रं तेनवज्रधारकेलेश्छिन्नेसति प्रत्येत्य अभिमुखमागत्य हरेरुरुःवक्षःप्रहृत्य १५ मनाक्
ईषदपि क्वापंगे १६ अस्यजगतउपसंयमं प्रलयं १७ पांसुकृतंतमसमश्चप्रेरितवंतः क्षेपणैः यंत्रैः १८ नष्टो
भगणो नक्षत्रसमूहोयस्यां अनेनदैत्यवत्तातिरेकात् ब्रह्मदत्तमुहूर्तोतिक्रमोगम्यते अह्निनक्षत्रगणमसंभवात् १९ ८२

सदैत्यस्तस्माच्चक्रंनिशाम्यदृष्ट्वाअग्रतोव्यवस्थितंचविलोक्यअमर्षेणक्रोधेनपरिप्लुतानिक्षुभितानींद्रियाणिय
स्यसः अदशात्दष्टवान् ७ चक्षुर्भ्यांदहन्निवसंचक्षाणः पश्यन् इवेतिचस्तुतः क्रोधाभावमाह हतोसिज्ञातोसि
इतिवाक्ययोऽर्थः ८ वात्तरंहसं वायुवेगं ९ घटस्वउद्यमंकुरु यतस्त्वंजेतुमिच्छसि १० ११ हतोमानोगर्वोयस्य १२

ग्रं १ सतंनिशाम्यात्तरथांगमग्रतोव्यवस्थितंपद्मपलाससलोचनं विलोक्यचामर्षपरिप्लुतेंद्रियोरुषास्वदं
तछदमादशच्छ्वसन् ७ करालदंष्ट्रश्चक्षुर्भ्यांसंचक्षाणोदहन्निव अभिप्लुत्यस्वगदयाहतोसी
त्याहनहरिं ८ पदासव्येनतांसाधोभगवान्यज्ञसूकरः लीलयामिषतःशत्रोःप्राहरद्वातरंहसं ९
आहचायुधमाधत्स्वघटस्वत्वंजिगीषसि इत्युक्तःसतयाभूयस्ताडयन्व्यनदद्भृशं १० तांसआपततीं
वीक्ष्यभगवान्समवस्थितः जग्राहलीलयाप्राप्तामाहत्मानिवपन्नगी ११ स्वपौरुषेप्रतिहतेहतमा
नोमहासुरः नैच्छद्गदांदीयमानांहरिणाविगतप्रभः १२ जग्राहत्रिशिखंशूलंज्वलज्ज्वलनलो
लुपं यज्ञायधृतरूपाय विप्रायाभिचरन्यथा १३

ज्वलत्तोज्वलतः नष्टलोलुपंग्रसनव्यग्रं यज्ञायविष्णुमालक्ष्य अक्रोयकरलेदृष्टांतः विप्रमुद्दिस्याभि
॥ ६६ ॥ चारंकुर्वन् १३ राम रामराम ॥

भा०त्त०
८३
संस्थितंम त्युं २७ आसित आरोपिता तहिंगाशरीरात मोक्कमिछ्या वराहस्य पूर्वपादयोरेव करत्वात् कर
रेणेति पदाहत इतिचाविरुद्धं २८ २९ अखिलयज्ञानांत त्ववे विस्ताराय कारणायेतिवा अरुं तुदो मर्मभेत्ता ३०

क्षितौशयानंतमकुंठवर्चसंकरालदंष्ट्रं परिदष्टदच्छदं अजादयोवीक्ष्य प्रशंसुरागता अहोइमं
कोनुलभेतसंस्थितिं २८ यंयोगिनोयोगसमाधिनारहो ध्यायंति लिंगादसतोमुमुक्षया तस्यै
मग्नतहतो षदैत्यर्षभःपदाहतोमुखंप्रपश्यंस्तनमुत्ससर्ज २८ एतौतौपार्षदावस्यशापाद्यातावसद्ग
तिं पुनःकतिपयैःस्थानंप्रपत्स्येतेहजन्मनि २९ ॥देवाऊचुः॥ नमोनमस्तेखिलयज्ञतंतवेस्थि
तौगृहीतामलसत्वमूर्तये दिष्ट्याहतोयंजगतामरुंतुदस्त्वत्पादभक्त्यावयमीशनिर्वृताः ३० श्री
मैत्रेयउवाच॥ एवंहिरण्याक्षमसह्यविक्रमंससादयित्वाहरिरादिसूकरः जगामलोकंस्वमखंडि
तोत्सवंसमीडितःपुष्करविष्टरादिभिः॥३१॥मयायथानूक्तमवादितेहरेःकृतावतारस्यसुमित्रचेष्टि
तं॥यथाहिरण्याक्षउदारविक्रमोमहामृधेक्रीडनवन्निराकृतः॥३२॥सूतउवाच॥इतिकौसारवा
ख्यातामाश्रुत्यभगवत्कथां॥क्षत्तानंदंपरंलेभेमहाभागवतोद्विज॥३३॥

सादयित्वाहत्वेत्यर्थः पुष्करविष्टरादिभिः ब्रह्मादिभिः संस्तुतः ३१ यथानूक्तं गुरूक्तिमनतिक्रम्यमयावादितुभ्यं

३३
८३

नायुधानिमुंचतीतितथा यातुधान्यश्चप्रत्यदृश्यंत २० हिंस्राः छिंधिभिंधीत्येवंभूताः आतिवैशसा अत्युग्रावाचः उत्सृष्
ष्टा इत्यत्रैववाक्यसमाप्तिः २१ प्रादुष्कृतानामितिप्रकटिताःमायातांविनाशयेत् विनशननमितिपाठे यथाश्रुतेवषष्ठी त्री

गिरयः प्रत्यदृश्यंतनानायुधमुचोनघ दिग्वाससोयातुधान्यः शूलिन्योमुक्तमूर्द्धजाः २० बहुभिर्यक्षर
क्षोभिः पत्त्यश्वरथकुंजरैः आततायिभिरुत्सृष्टा हिंस्रावाचोतिवैशसा २१ प्रादुष्कृतानांमायानामासुरी
णांविनाशनं सुदर्शनास्त्रंभगवान्प्रायुंक्तदयितंत्रिपात् २२ तदादितेःसमभवत्सहसाहृदिवेप
थुः स्मरंत्याभर्तुरादेशंस्तनाच्चासृक्प्रसुस्रुवे २३ विनष्टासुस्वमायासुभूयश्चाव्रज्यकेशवं रुषोपगू
हमानोमुंददृशेवस्थितंवहिः २४ तंमुष्टिभिर्विनिघ्नंतंवज्रसारैरधोक्षजः करेणकर्णमूलेह
नयथात्वाष्ट्रंमरुत्पतिः २५ सआहतोविश्वजिताह्यवज्ञयापरिभ्रमद्गात्रउदस्तलोचनः विशीर्ण
बाह्वंघ्रिशिरोरुहोपतत्तयथानगेंद्रोलुलितोनभस्वता २६ गिरिस्तवनानियदीयस्ययज्ञस्तत्त्रिरित्यर्थः

त्रयोऽस्यपादा इतिश्रुतेः २२ भर्तुरादेशंत्वत्पुत्रोभगवान्हनिष्यतीत्येवंभूतं २३ उपगूहमानः वाह्वोरंत
र्निधाय्यसंघट्टयन् २४ अहन्जघानत्वाष्ट्रंवृत्रंमरुत्पतिरिंद्रः २५ परिभ्रमन् गात्रंशरीरंयस्य उदस्ते व
हिर्निर्गते लोचने यस्य विशीर्णावाह्वादयो यस्य नगेंद्रोमहाद्रुमः उन्मीलितः नभस्वतावायुना २६ ॥ ऽऽ४

भा० त० विदुरमैत्रेयसंवादेनैवैतज्ज्ञास्यतइतितमेवसंवादंप्रष्टुमाह सूतेतिपंचभिः श्रीकृष्णस्यसुहृत्त्वेहेतुःयइति दुर्योधनादि
८४ भिरपत्यैःसहितमग्रजंधृतराष्ट्रं अघवानघंकृतवानितिहेतुःयइतिहेतोः श्रीकृष्णोक्तमंत्रंणादरात्यस्तत्याज २
अनवरःअन्यूनः महत्वेमहिम्नि ३ कुशावर्त्तेगंगाद्वारे ४ यत्किमपिपृच्छत्किंतदेतिचेत्तत्राह तयोरितिश्र

सूत्रामहाभागवतःकृष्णस्यैकांतिकःसुहृत् यस्तत्याजाग्रजंकृष्णेसापत्यमघवानिति २ द्वैपायना
दनवरोमहित्वेतस्यदेहजः सर्वात्मनाश्रितःकृष्णंतत्परांश्चाप्यनुव्रतः ३ किमन्वपृच्छन्मैत्रेयंविर
जास्तीर्थसेवया उपगम्यकुशावर्त्तआसीनंतत्त्ववित्तमं ४ तयोःसंवदतोःसूतप्रवृत्ताह्यमलाःकथाः
आपोगांगाइवाघघ्नीर्हरेःपादांबुजाश्रयाः ५ तानःकीर्त्तयभद्रंतेकीर्त्तन्योदारकर्मणः रसज्ञःको
नुतृप्येतहरिलीलामृतंपिबन् ६ एवमुग्रश्रवाःपृष्टऋषिभिर्नैमिषायनैः॥भगवत्यर्पिताध्या
त्मस्तानाहश्रूयतामिति॥७॥सूतउवाच॥हरेर्धृतक्रोडतनोःस्वमाययानिशम्यगोरुद्धरणंरसा
तलात् लीलांहिरण्याक्षमवज्ञयाहतंसंजातहर्षोमुनिमाहभारत॥८॥

घ्नीः अघघ्न्यःकथाःप्रवृत्ताः ५ कीर्त्तन्यानिकीर्तनार्हाणिउदाराणिकर्माणियस्यहरेः ६ एवमिति
श्रीव्याससंवादंउग्रश्रवाःरोमहर्षणपुत्रः नैमिषमयनमाश्रयोयेषां अर्पितमध्यात्मंमनोयेन ७ गोरुद्ध
रणंलीलांहिरण्याक्षंचावज्ञयाहतंनिशम्य [illegible] भारतोविदुरः ८ ८४

कथामुपश्रुत्य भक्तिमात्रेणपशूनामपिसुलभः अन्यथाद्देवानामपिदुर्लभ इतितत्कथाश्रवणेकस्यानंदोनस्यादित्या हद्वाभ्या ३४ झषोग्राहः क्रोशंतीनामितिचापलत्वमुक्तं संकटाद्मोचयत् ३५ ३६ कारणेन पृथिव्युद्धरणेन सूकरस्य एतद्धरेः विक्रीडितंशृण्वतां अन्तेनारायणगतिर्भवति महापुण्यंस्वर्गादिपदं अलंपवित्रंअतिशयेनशोधकं धन्यंधनावहं यशस्यं

अन्येषांपुण्यश्लोकानामुद्दामयशसांसतां उपश्रुत्यभवेन्मोदः श्रीवत्सांकस्यकिंपुनः ३४ योगजेंद्रंझ षग्रस्तंध्यायंतंचरणांबुजं क्रोशंतीनांकरेणूनांकृच्छ्रतोमोचयद्द्रुतं ३५ तंसुखाराध्यमृजुभिरनन्यश रणैर्नृभिः कृतज्ञःकोनुसेवेतदुराराध्यमसाधुभिः ३६ योवैहिरण्याक्षवधंमहाद्भुतंविक्रीडितंकार णसूकरात्मनः शृणोतिगायत्यनुमोदतेंजसाविमुच्यतेब्रह्मवधादपिद्विजाः ३७ एतन्महापु ण्यमलंपवित्रंधन्यंयशस्यंपदमायुराशिषां प्राणेंद्रियाणांयुधिशौर्यवर्द्धनंनारायणोंतेगति रंगशृण्वतां ॥३८॥ इतिश्रीमद्भागवतेमहापुराणेतृतीयस्कंधेएकोनविंशोध्यायः ॥१९॥ शौनकउवाच महींप्रतिष्ठामध्यस्यसौतेस्वायंभुवोमनुः कान्यन्वतिष्ठद्द्वाराणिमार्गायावरजन्मनां १

कीर्तिवर्द्धनं आयुष्मश्च आयुषांपदंस्थानं पवित्राणांप्राणानामिंद्रियाणांचवर्द्धनं अंगशौनकेतिवाच्यं विदुर ३८ इतितृतीयेएकोनविंशः ॥१९॥ विंशेवाराहजन्मादिव्यवधानाद्यथादितः सर्गोनुस्मार्यतेवक्तुं मन्वंतरप्रस्तुतोमनोः प्रति ष्ठास्थानं अध्यस्यप्राप्य सौतेसूतस्यपुत्रमहर्षेःपुत्रस्य अवरंअर्वाचीनंजन्मयेषांईश्वरलीलानांमार्गायनिर्गमा

य कानिद्वाराणिकृतवान् अर्वाचीनान्प्राणिनः केरुपायैः सृष्टवानित्यर्थः १

भा०स्क०
८५

भौतिकं हैममण्डमेकैकशः अत्येकं स्वयुग्मसमयोनि संतिसंहृत्य ससृजुः १४ अन्ववासीत् अधिष्ठितवान् १५ स
हस्राकांशामिवोरुदीधितिर्यस्य तत् सर्वजीवनिकायानामोकः स्थानं पदं स्वराट् ब्रह्मा १६ यः शालिलाशये गर्भो
दकस्यान्तः शेते तेन भगवतानुविष्टोऽधिष्ठितः सन् स्वराट् तया संस्थया नामरूपादिक्रमेण १७ छायाप्रभावप्र
तियोगिनी तया अबुद्ध्येत्यर्थः यस्त्ववुद्धिकृतः प्रभोरित्युक्तत्वात् महातम इति महामोहः स्वरूपनिर्देशमात्रवि

तानि चैकैकशः स्रष्टुमसमर्थानि भौतिकं संहत्य दैवयोगेन हैममण्डमवासृजन् १४ सोऽशयिष्टाब्धि
सलिले आण्डकोशो निरात्मकः साग्रं वै वर्षसाहस्रमन्ववात्सीत्तमीश्वरः १५ तस्य नाभेरभूत्पद्मं स
हस्रार्कोरुदीधिति सर्वजीवनिकायौको यत्र स्वयमभूत्स्वराट् १६ सोऽनुविष्टो भगवता यः शेते शलि
लाशये लोकसंस्थां यथा पूर्वं निर्ममे संस्थया स्वया १७ ससर्ज छायया विद्यां पंचपर्वाणमग्रतः तामि
स्रमंधतामिस्रं तमो मोहो महातमः १८ विससर्जात्मनः कायं नाभिनंदंस्तमोमयं जगृहुर्यक्षरक्षांसि
रात्रिं क्षुत्तृड्समुद्भवां १९

वस्तयामोह इति प्रथमा प्रयोगः १८ तदेवं प्रथमोक्ता साधारणी सृष्टि
मनुष्यकेन चिद्विशेषेण साधारणं सृष्टिमाह विससर्जेत्यादिना वत्समाप्ति तद्धि सृष्टं कायं रात्रिरूपं तत एव ज्ञाना
तियक्षरक्षांसि जगृहुः क्षुत्तृषोः समुद्भवो यस्यां तां अत्र याऽस्य सा तनूरासीत् तामजहात् तमिस्राऽभवदित्यादिश्रुतिरनु

स्कं० अध्या० २०
८५

यस्मात्त्वमव्यक्तमार्गवित् ब्रह्मणो वा विशेषणं ९ एतत्तज्जगत् अभावयन् उत्पादयामास १० सद्वितीयाः सभार्याः
स्वतंत्राः भार्यानपेक्षाः कर्मसु प्रजासर्गादिषु संहताः परस्परापेक्षाः इदं जगत् ११ प्रश्नादिमारभतेतिप्रश्नस्यपस्तारे
नस्य च यानित्युत्तरं वक्तुं पूर्वोक्तां सृष्टिमनुस्मारयति दैवेनेति सप्तभिः मन्वादिप्रश्नानां तु तृतीयाध्यायमारभ्योत्तरं भवि
ष्यति दुर्वितर्केण दैवेन जीवादिष्टेन परेण प्रकृत्यधिष्ठात्रा महापुरुषेण अनिमिषेण कालेन च हेतुना भगवतो निर्वि

विदुर उवाच ॥ प्रजापतिपतिः सृष्ट्वा प्रजासर्गे प्रजापतीन् किमारभत मे ब्रह्मन् प्रब्रूह्यव्यक्तमार्गवि
त् ९ ये मरीच्यादयो विप्रा यस्तु स्वायंभुवो मनुः ते वै ब्रह्मण आदेशात्कथमेतदभावयन् १० सद्वितीया
किमसृजन्स्वतंत्रा उत कर्मसु आहोस्वित्संहताः सर्वे इदं स्म समकल्पयन् ॥११॥ श्रीमैत्रेय उवाच ॥ दै
वेन दुर्वितर्क्येण परेणानिमिषेण च जातक्षोभाद्भगवतो महानासीद्गुणत्रयात् १२ रजःप्रधानान्मह
तस्त्रिलिंगो दैवचोदितात् जातः ससर्ज भूतानि वि य दीनि पंचशः १३ दा
कारात् जातक्षोभं यद्गुणत्रयं प्रधानं तस्मान्महानासीत् तदुक्तं तंत्रे विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः
प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति १२ महतो जातो भूतादि
१ शः रहंकारः त्रिलिंगः त्रिगुणः रजःप्रधानादिति स्वतः सत्वप्रधानस्यापि महतोऽहंकारोत्पत्तिकाले कार्यानुरूपं रजः
प्रधानत्वं भवतीति भावः पंच तन्मात्राणि महाभूतानि ज्ञानेंद्रियाणि कर्मेंद्रियाणि च तत्तद्देवताश्चेति पंच पंच सम

भा० ८०
८६

भक्तेच्छानुरूपमात्मानं दर्शयतीति तद्ध्यातो उपव्रज्य पाहीति [illegible] भ्यां प्रार्थितवान् २५ यभितुं मैथुने धर्षयि
तुं २६ लोकानां उनानां तव अनासन्नौ अनाश्रितौ पादौ येस्तेषां २७ विविक्तं असंदिग्धं अध्यात्मदर्शनम् परचित्तज्ञानं
यस्य हरेः घोरं कामकश्मलं स्वतनुं विमुच्येति उक्तवानिति विशेषः इत्युक्तमध्यक्षहरा तां तनुं विमुमोच सर्वत्र तनुत्यागो नाम तत्
त्कृतनोभावत्यागो विवक्षितः ग्रहणं च तत्कृतापत्तिरिति द्रष्टव्यं २८ सा हि रात्रिर्या ःसंधिरभवदिति श्रुतेः सा तेन विसृ

स उपव्रज्य वरदं प्रपन्नार्तिहरं हरिं अनुग्रहाय भक्तानामनुरूपात्मदर्शनं २५ पाहि मां परमात्मंस्ते प्रेषणे
नासृजं प्रजाः ता इमा यभितुं पापा उपाक्रामंति मां प्रभो २६ त्वमेकः किल लोकानां क्लिष्टानां क्लेशनाशनः
३ त्वमेकः क्लेशद स्तेषामनासन्नपदां तव २७ सोवधार्यास्य कार्पण्यं विविक्ताध्यात्मदर्शनः विमुंचात्मतनुं घोरामित्यु
क्तो विमुमोच ह २८ तां क्वणच्चरणांभोजां मदविह्वललोचनां कांचीकलापविलसद्दुकूलच्छन्नरोध
सं अन्योन्यश्लेषयोत्तुंगनिरंतरपयोधरां सुनासां सुद्विजां स्निग्धहासलीलावलोकनां गूहंतीं व्रीडयात्मानं
नीलालकवरूथिनीं उपलभ्यासुरा धर्म सर्वे संमुमुहुः स्त्रियं २९

ष्टा तनुः सायंतनी संध्या बभूव सा च कामोद्रेकवेला असुराश्च रजस्सत्वात् स्त्रीलंपटाः अतस्तां संध्यामेव स्त्रियं कल्पयित्वा
ते संमोहं प्रापुरित्याह तामिति त्रिभिः नूपुराभ्यां क्वणंती चरणांभोजे यस्याः मदेन विह्वले लोचने यस्याः कांचीकलापेन वि
लसद् दुकूलं तेन छन्नो रोधः कटितटं यस्यास्तां अन्योन्यश्लेषया उपमर्देन हेतुना उत्तुंगौ निरंतरौ पयोधरौ यस्याः सुद्विजां सुदंतीं
स्निग्धो हासो लीलावलोकनं च यस्याः गूहंतीं वस्त्रांचलेन हरावानां नीला नाम अलकानां वरूथः स्तोमो विद्यते यस्याः

हे धर्म विदुर तां स्त्रियमुपलभ्य मन्वानः २९
८६

उपसृष्टाः अभिभूताः जग्धुं अत्तुं भक्षयितुं यतो वयं क्षुत्तृड्भ्यामर्दिता अतस्तयेनं पिबेति क्षपयामासक्षतेति एके ऽ
न्यतु यक्षध्वं भक्षयेति ब्रुवंतः यक्ष भक्ष हसनयोरिति धातुः २० देवो ब्रह्मा संविग्नो भीतः सन् मां मा यक्षत किंतु रक्ष
त अहो हे रक्षयक्षांसि यूयं मे प्रजाः सुताः बभूविथ जाताः स्थ एवमुग्रस्वभावाः यक्षा रक्षांसि जाता इत्यर्थः तत्र ये यक्ष रक्षे
ध्वमित्यूचुस्ते यक्षाः ये तु रक्षतेति ते राक्षसा इति ज्ञेयं एतच्च तिर्यगादितामससर्गस्याप्युपलक्षणं २१ प्रभया दीव्यन् द्यो

क्षुत्तृड्भ्यामुपसृष्टास्तेतं जग्धुमुपदुद्रुवुः मा रक्षतैनं यक्षध्वमित्यूचुः क्षुत्तृड्डर्दिताः २० देवस्तानाह
संविग्नो मा मा यक्षत रक्षत अहो मे यक्षरक्षांसि प्रजा यूयं बभूविथ २१ देवताः प्रभया या या दीव्यन्प्र
मुखतोऽसृजत् तेहार्षुर्देवयंतो विसृष्टां तां प्रभामहः २२ देवो देवान् जघनतः सृजति स्मातिलोलु
पान् त एनं लोलुपतया मैथुनायाभिपेदिरे २३ ततो हसन्स भगवानसुरैर्निरपत्रपैः अन्वीयमानस्तरसा क्रु
द्धो भीतः परापतत् २४

घ २

तमानाः या या देवता द्युतिमत्यः सात्विक्यस्ता ताः प्रमुखतः प्राधान्येनासृजत्
ते देवा देवता इति स्त्रीत्वेन निर्दिष्टानामप्यर्थमात्रमर्थमात्रं विवक्षयेति ते इति पुंस्त्वेन प्रतिनिर्देशः एवं यक्षरक्षांसि इत्यत्रा
पि ज्ञेयं तेन विसृष्टां त्यक्तां प्रभां अहः दिवसरूपां सतीं देवयंतः क्रीडयंतः अहार्षुः जगृहुः २२ अदेवानिति छेदः स
जघनादसुरान्सृजति स्मेत्युक्तेः अतिलोलुपान् स्त्रीलंपटान् अभिपेदिरे प्राप्ताः २३ परापतत् पलायत २४ ॥ ११

भा० टी० प्रमदेवाचरंती स्त्रियं मत्वा जगृहुः ३५ प्रहस्यात्मानमात्मना जिघ्रंत्या कांत्या सौंदर्येण प्रहसनमात्मानं घ्राणं च सौं
८७ दर्यं तु भावचातुर्य्यं विकारः ३६ ज्योत्स्नां चंद्रिकारूपां तस्य गंधर्वादिगणाः विश्वावसुपुरोगमो मुख्यो येषु ३७ आ
त्मनस्तंद्रिणा आलस्येन तांश्च नानारूपान् मुक्तकेशान् वीक्ष्य नेत्रे निमीलितवान् ३८ इंद्रियाणां विक्लेदः स्रावो यया तां

इति सायंतनीं संध्यामसुराः प्रमदायतीं प्रलोभयंतीं जगृहुर्मत्वा मूढधियः स्त्रियं ३५ प्रहस्य भावगंभीरं स२
जिघ्रंत्यात्मानमात्मना कांत्या ससर्ज भगवान् गंधर्वाप्सरसां गणान् ३६ विससर्ज तनुं तां वै ज्योत्स्नां कांतिम
तीं प्रियां त एव चाददुः प्रीत्या विश्वावसुपुरोगमाः ३७ सृष्ट्वा भूतपिशाचांश्च भगवानात्मतंद्रिणा दिग्वा
ससो मुक्तकेशान्वीक्ष्य चामीलयद्दृशौ ३८ जगृहुस्तद्विसृष्टां तां जृंभणाख्यां तनुं प्रभोः निद्रामिंद्रियवि
क्लेदो यया भूतेषु दृश्यते ३९ येनोच्छिष्टान् धर्षयंति तमुन्मादं प्रचक्षते ऊर्जस्वंतं मन्यमान आत्मा
नं भगवानजः साध्यगणान् पितृगणान् परोक्षेणासृजत्प्रभुः ४०

निद्रां प्रचक्षते ३९ येनेंद्रियविक्लेदनहेतुना उच्छिष्टांश्च सतः धर्षयंति भ्रांतान्कुर्वंति तं भूतादिगणं उन्मादं
प्रचक्षते तंद्राजृंभिकानिद्रोन्मादहेतुत्वेन भूतादीनां तनूनां चातुर्विध्यमुक्तम् ऊर्जस्वंतं सत्ववंतं परोक्षे
ण अदृश्यरूपेण ४० ६१

नं

संभ्रमौ विभावनाक्रममाह अहो इति ३० अभिसंभाव्य सत्कृत्य विस्रंभात् प्रणयात् कुतुहृद्यस्तेनां पप्रच्छुः कामिति
त्रिभिः ३१ कासि जात्या कस्य वा कन्या हे भामिनि कोपने रूपमेव द्रविणं अनर्घ्यं वस्तु तद्वेव पण्यं क्रियाहं ते न त
द समर्पणेन विवाधसे ३२ किं जातिकुलादिप्रश्नेन यावा काचिद्भवादिष्ट्या त्वदंतावद्वृज्ञाते यत्तवदर्शनं किंतु केवलं
नोमनः उत्सनोषि विवध्नासि हे भिनचित्तानां वा क्व हे शालिनि श्लाघ्ये एकत्र न जयति न स्थिरीभवति यद्वा नैकत्र

अहो रूपमहो धैर्य्यमहो यस्यान्नवं वयः मध्ये कामयमानानामकामेव विसर्पति ३० वितर्कयंतो वहुधा तां स
ध्योप्रमदा हूति अभिसंभाव्य विस्रंभात्पर्य्यप्रच्छन् कुमेधसः ३१ कासि कस्यासि रंभोरु को वार्थस्तेत्र भा
मिनि रूपद्रविणपण्येन दुर्भगान्नो विवाधसे ३२ या वा काचित्त्वमवले दिष्ट्या संदर्शनं तव उत्सुनोषीक्षमा
णानां कंदुकक्रीडया मनः ३३ नैकत्र ते जयति शालिनि पादपद्मं घ्नंत्या मुहुः करतलेन पतत्पतंगं म
ध्यं विषीदति वृहत्स्तनभारभीतं श्रांतेव दृष्टिरमला सुशिखा समूहः ३४

अनेकगतिविलासे भुजयति सर्वोत्कर्षेण वर्त्तते पतत्पतंगं उच्छलंतं कंदुकं वृहतोः स्तनयोर्भारात् भीतं तव कृशं मध्यं वि
षीदति श्राम्यति श्रांता मंथरे चप्रसरति सुशिखा समूहः शोभनः केशकलापस्ते पाठांतरे सुशिखाः शोभनाः के
शा न वकीर्य्यमाणान् समूहवधानेति अत्र च अस्तंगच्छन्नत्यर्य एव पतंगः मेघविच्छेदे मध्याविषादः तारकारूपा

यदात्मानमन्यमानोऽभूत्तदात्मनूनसृजत् ४७ तेभ्यः स्त्रीयं पुरुषं पुरुषाकारं पुरं देहं अत्यस्तं हृदि तान्मन्वन्तरान् ४८ तेत्वयाक्ष
तस्तकृतश्च माकुः यस्मिन्नतु सर्गे क्रियाग्निहोत्राद्याः अतो स्मिन्सर्वे वयं साकं सह अन्नं हविर्भागादि अदाम भक्ष
याम हे ब्रह्मन् ४९ कर्मसृष्टिमुक्त्वा ऋषीणां सृष्टिमाह तपसेति विद्योपासना योगः आसनादिः सुसमाधिः वैरा
सम्यगात्मानं मन्यमानः कृतकृत्यमिवात्मानं तदात्मनूनसृजत् ते मनसा लोकभावनान् ४७ तेभ्यः सोत्यसृ
जत् स्त्रीयं पुरं पुरुषमात्मनः तान्दृष्ट्वा ये पुरा सृष्टाः प्रससंसुः प्रजापतिं ४८ अहो एतज्जगत्स्रष्टः सुकृ
तं वत ते कृतं प्रतिष्ठिताः क्रिया यस्मिन्साकमन्नमदाम हे ४९ तपसा विद्यया युक्तो योगेन सुसमाधिना ऋ
षीनृषिर्हृषीकेशः ससर्जाभिमताः प्रजाः ५० तेभ्य एकैकशः स्वस्य देहस्यांशमदाद्विजः यत्तत्समाधि त
योगर्द्धि तपो विद्या विरक्तिमत् ५१ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरमैत्रेयसंवादे
जगत्सृष्टिर्विंशतितमोऽध्यायः ॥ २० ॥ विदुर उवाच ॥ स्वायंभुवस्य च मनोर्वंशः परमसंमतः कथ्य
तां भगवन्यत्र मैथुनेनैधिरे प्रजाः १
ऐश्वर्यादियुक्तः समाधिः तेन युक्तः ॥ हृषीकेशः स्ववशेंद्रियः सन्
ऋषिर्ब्रह्मा ऋषीन्प्रजाः ससर्ज ५० किं च देहं यस्यांशमदादित्यत आह यदिति ॥ समाधिश्च योगश्च ऋद्धिश्च ऐश्व
र्यं तपश्च विद्या च विरक्तिश्च विद्यंते यस्मिन् तत् ५१ ॥ इति तृतीये विंशः ॥ २० ॥ एकविंशे तपो विद्यातोषितेन तु विष्णु
ना कर्दमस्य मनोः पुत्र्याः विवाहघटनोच्यते एधिरे एधांचक्रिरे १

आत्मनः सर्गोयस्मात्तेयत् येनकायेनसंप्रदायत्वतिमित्तेनकवयः कर्मकोविदाः साध्येभ्यः पितृभ्यश्च पितृरूपेभ्यः
वितन्वते श्राद्धादिना हव्यंकव्यंचददंति ६१ तिरोधानेनदृश्यत्वेसत्यप्यंतर्द्धानशब्दवाच्या ६२ प्रत्यात्म्येन प्रतिबिंबेन
आत्माभासं प्रतिबिंबं आत्मना आत्मनोमानः प्रतिबिंबदर्शिनः सुंदरस्य शिरःकंपादिचेष्टा अतएवतत्स्रष्टानांमि
थः संमानेन नित्यंमिथुनीभावः ६३ तस्यप्रतिबिंबरूपं कर्मभिस्तत्परक्रमानुवर्णनैः ६४ भोगआभोगोविस्तारः पा

तआत्मसर्गंतंकायंपितरःप्रतिपेदिरे साध्येभ्यश्चपितृभ्यश्च कवयोयद्वितन्वते ६१ सिद्धान्विद्या
धरांश्चैवतिरोधानेनसोऽसृजत् तेभ्योऽददात्तमात्मानमंतर्द्धानाख्यमद्भुतं ६२ सकिन्नरान्किंपुरुषा
न्प्रत्यात्म्येनासृजत्प्रभुः मानयन्नात्मनात्मानमात्माभासंविलोकयन् ६३ तेतुतज्जगृहूरूपंत्यक्तं
यत्परमेष्ठिना मिथुनीभूयगायंतस्तमेवोषसिकर्मभिः ६४ देहेनवैभोगवताशयानोबहुचिंतया सर्गे
नुपचितेक्रोधादुत्ससर्जहतद्वपुः ६५ येहीयंतामुतःकेशाअहयस्तेंगजज्ञिरे सर्पाःप्रसर्पतःक्रूरानागा
भोगोरुकंधराः ६६

दादिप्रसारएववतादेहेन अनुपचितेवृद्धिमप्राप्तेतद्योगक्रोधादियुक्तं ६५
अमुतः अमुष्मात्देहात् येकेशाअहीयंतप्रच्युताः तेऽहयोजाताः प्रसर्पतःपादाद्याकुंचनैःप्रचलतोऽमुष्मात्सर्पाः अत
एवआगान्नभवंतिनागाः अतिवेगवंतइत्यर्थः भोगवतोजातत्वात्भोगेनफणेनउरुविस्तीर्णाकंधरायेषां सर्वेचैतेक्रो
धयांगात्क्रूराः तेषांअवांतरजातिभेदः सर्पसिद्धांतेप्रसिद्धः ६६

भा०तृ० मनःस्पर्शं मनस्यानंदजनकं स्मितमीक्षणं च यस्य तं [illegible] वक्षसि श्रीर्यस्य तं कौस्तुभः कंधरायां यस्य प्रीतिरेव स्व
८९ भावः स्वतःसिद्धो धर्मो यस्य तथाविधः आत्मा मनो यस्य ९ त्वां मन्ते परमानंदं धिगन्यवरकामुकं अथापि कृपया मा
नुगृहाणवरदानतः वर्त्तेति हर्षे हरीड्यानोः स्वाभित्तं सत्वनिधे स्तवदर्शनात् अथाद्य णः सांसिद्ध्यं साफल्यं जुष्टं से
वितं द्दर्शनमेव महाफलमित्युपपादयति यस्य त्वदर्शनं सद्भिरुत्तरोत्तरमायाद्भिः प्रहर्षे जन्मभिरूढयोगैर्योगिभिर्यथेत्तापि १०
किरीटिनं कुंडलिनं शंखचक्रगदाधरं श्वेतोत्पलक्रीडनकं मनःस्पर्शस्मितेक्षणं विन्यस्तचरणांभोज
मंसदेशे गरुत्मतः दृष्ट्वा खेवस्थितं वक्षःश्रियं कौस्तुभकंधरं जातहर्षोपतन्मूर्ध्ना क्षितौ लब्धम
नोरथः गीर्भिस्त्वभ्यगृणात्प्रीतिस्वभावात्मा कृतांजलिः ९ ऋषिरुवाच जुष्टं बताद्याखिलसत्वरा
शेः सांसिद्ध्यमक्ष्णोस्तवदर्शनान्नः यद्दर्शनं जन्मभिरीड्य सद्भिराशासते योगिनो रूढयोगाः १० ये
मायया ते हतमेधसस्त्वत्पादारविंदं भवसिन्धुपोतं उपासते कामलवाय तेषां रासीश कामान्निरयेपि ये स्युः
११ तथा स चाहं परिवोढुकामः समानशीलां गृहमेधिधेनुं उपेयिवान्मूलमशेषमूलं दुराशयः कामदुघांघ्रि पस्य १२
सकामभक्तान्विगर्हयन्नाह य इति ते विषयान्निरयेपि स्युः तेषां कामानां लवाय त्वन्मायया नष्टबु
द्धयस्त्वमेवोपासते त्वं तु तेषां तान्कामान्निरासि ददासि ११ यः सकामान्निंदति सोहमपि तादृश एवेत्याह तथेति गृह
मेधाः गृहाश्रमः तत्र धेनुं त्रिवर्गदोग्ध्रीं भार्यां परिणेतुमिच्छन् कामदुघांघ्रिपस्य कल्पद्रुमस्य तव मूलं त्वत्पादमुपेयिवा
वान् प्रपन्नोस्मि ननु कामार्थमन्यत् किमप्युपास्यतां नेत्यतः अशेषेषु पुरुषार्थेषु मूलमेतदेव १२ ॥ ॥ ८९

धर्मं मही च यथा जुगुपतुः तन्मे वदेति तृतीयेनान्वयः २ ३ योगलक्षणैर्यमादिभिर्युक्तायां कतिधा वीर्यं ससर्ज
कति पुत्रानुत्पादयामासेत्यर्थः ४ मनोः कन्यां आकूतिं प्रसूतिं च भार्यां लब्ध्वा यथा भूतानि ससर्ज तन्मे वदेति चकार
स्यार्थः ५ सहस्राणां समा दश सहस्राणि संवत्सरानित्यर्थः ६ तस्मिंस्तपसि क्रियायोगे पूजाप्रकारेण संप्रपेदे सिषेवे प्र

प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य वै यथाधर्मं जुगुपतुः सप्तद्वीपवतीं महीं २ तस्य वै दुहिता ब्रह्म
न्देवहूतीति विश्रुता पत्नी प्रजापतेरुक्ता कर्दमस्य त्वयानघ ३ तस्यां स वै महायोगी युक्तायां योगलक्षणैः
ससर्ज कतिधा वीर्यं तन्मे शुश्रूषवे वद ४ रुचिर्यो भगवान्ब्रह्मन्दक्षो वा ब्रह्मणः सुतः यथा ससर्ज भू
तानि लब्ध्वा भार्यां च मानवीं ५ श्रीमैत्रेय उवाच प्रजाः सृजेति भगवान्कर्दमो ब्रह्मणोदितः सरस्वत्यां
तपस्तेपे सहस्राणां समा दश ६ ततः समाधियुक्तेन क्रियायोगेन कर्दमः संप्रपेदे हरिं भक्त्या प्रपन्नवरदा
शुषं ७ तावत्प्रसन्नो भगवान्पुष्कराक्षः कृते युगे दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः ८ स तं वि
रजमर्काभं सितपद्मोत्पलस्रजं स्निग्धनीलालकव्रातवक्त्राब्जं विरजांबरं ९

पन्नेभ्यो भक्तेभ्यो वरदातारं ७ शब्दैकवेद्यं यद्ब्रह्म तन्मयं वपुर्दधत् तं प्रत्यात्मानं दर्शयामास ८ स कर्दमस्तं दे
वं स्थितं दृष्ट्वा मूर्ध्ना क्षितावपतत् गीर्भिश्चाभ्यगृणात् इति चतुर्णामन्वयः पद्मोत्पले दिनरात्रिविकाशे सितानां पद्मा
नामुत्पलानां च स्रक् यस्य तं नीलाः स्निग्धाश्च ये अलकास्तेषां व्रातो वक्राब्जं यस्य शतोत्पलं क्रीडनकं यस्य ९

भा० टी०
९०

नेमयो यस्य अनंताः क्षणलवादयः छदाः पत्राकाराधाराः संत्यस्य त्रीणि चातुर्मास्यानि नाभयः आधारभूतानि यस्य याति
यस्य करालस्रोतः तीव्रवेगं एतैर्विशिष्टं यैरेव संवत्सरात्मकं चक्रमुक्तमिति द्रष्टव्यं १५ ननु निरुपाधिमुदासीनां मोहं किंया
चस तथापि मायया विश्वस्रष्ट्यादिकर्तृत्वात्त्वमेव याच्य इत्याह स्वयमेक एव सन्नपि आत्मन्यधिकृतया योगमायया हेतु
नायाः स्वीकृताः शक्तयः सत्वाद्याः ताभिः अदो विश्वं स्वव्यतिरिक्तसाधनापेक्षात्वे दृष्टांतः यथेति १६ यद्यपि मायिकत्वा
भक्तेभ्यो विषयसुखं दातुं नेच्छसि तथाप्यस्मदभिप्रायानुसारेणतत्संपादयेत्याह नैतदिति हे अधीश नोऽस्माकं भजतां भूतसू

एकः स्वयं सन्जगतः सिसृक्षया द्वितीययात्मन्नधियोगमायया सृजस्यदः पासि पुनर्ग्रसिष्यसि यथोर्णना
भिर्भगवान्स्वशक्तिभिः १६ नैतद्बताधीश पदं तवेप्सितं यन्मायया नस्तनुषे भूतसूक्ष्मं अनुग्रहाया
स्त्वयि यर्हि मायया लसत्तुलस्या तनुवा विलक्षितः १७ तं त्वानुभूत्योपरतक्रियार्थं स्वमायया वर्तितलोकतं
त्रं नमाम्यभीक्ष्णं नमनीयपादसरोजमल्पीयसि कामवर्षं १८ ॥

क्ष्मरूपं शब्दादिविषयसुखं मायया तनुषे विस्तारयसीति यत् यद्यपीप्सितं न भवति तथाप्यस्मदनुग्रहायास्तु अस्य
त्वया पाकरणानंतरमेवापवर्गीयं भवत्वित्यर्थः यर्हि यतः मायया परिच्छिन्न इव लसंत्या तुलस्या युक्तस्त्वं विलक्षितोसि एवंभू
तस्य तव दर्शनं यतो भुक्तिमुक्तिप्रदमित्यर्थः १७ तं त्वां भुक्तिमुक्तिप्रदं नमामि मुक्तिप्रदत्वे हेतुः अनुभूत्या ज्ञानेनोपर
तः क्रियार्थः कर्मफलयोगो यस्मिन् भोगदत्वे हेतुः स्वमायया आवर्तितं लोकतंत्रं विश्वोपकरणं येन अतः सकामैर्नित्यं
मेभ्य नमनीयं पादसरोजयुगं यस्य तं तत्र अल्पीयसि सकामे पुंसि भजने वा कामान्वर्षसीति तथा १८ ९०

ननुतर्हिमुक्त्यर्थमेवकिंनभजसि अनधिकारादित्याह हे अधीश यस्त्वंप्रजापतिस्तस्यवचसातंत्या अयंकामहतोलोकःपशु
वद्बद्धः हेशुक्लधर्ममूर्ते अहंचकिललोकानुगतः अतस्तुभ्यंबलिंवहामि कर्ममयींवृत्तामनुवर्ते अनिमिषायकाला
त्मने तदर्थंभार्यांचेच्छामीति चकारस्यार्थः नकेवलंलोकानुगतोवहामि किंतु ऋणत्रयापाकरणार्थमित्युक्तम् १३

प्रजापतेस्तेवचसाधीशतंत्यालोकःकिलायंकामहतोनुबद्धः अहंचलोकानुगतोवहामिबलिंच
शुक्लानिमिषायतुभ्यं १३ लोकांश्चलोकानुगतान्पशूंश्चहित्वाश्रितास्तेचरणातपत्रं परस्परंत्वद्गुणवा
दसीधुपीयूषनिर्यापितदेहधर्माः १४ नतेजराक्षभ्रमिरायुरेषांत्रयोदशारंत्रिशतंषष्टिपर्व ष
ण्नेम्यनंतच्छदियत्त्रिनाभिकरालस्रोतोजगदाच्छिद्यधावत् १५

अनिमिषायेत्यनेनकालात्मकात्वत्तोभीतःकर्मकरोमीत्युक्तं एतत्तुभयंत्वद्भक्तानांनास्तीत्याहद्वाभ्यां लोकान्कामाभि
भूतान्तान्अनुसृतान्पशूंश्चविवेकेसत्यपिपुनःकर्मजडान्हित्वाअनादृत्ययेतवचरणरूपमातपत्रंश्रिताःतानेवाह त्वद्गुण
नावादःसएवसीधुसंसारविस्मारकत्वात् तेननिर्यापिताविलापितादेहधर्माःक्षुत्पिपासादयोयैः एषामित्युत्तरेणान्व
यः १४ तवयत्त्रिगुणनाभिकालचक्रंतत् जगदाच्छिद्यआक्रम्यधावदपिएषांत्वद्भक्तानामायुराच्छिद्यधावन्नभवति कथंभू
तम् अजरंअक्षंतस्मिन्अक्षरूपेभ्रमिःभ्रमणंभ्रमदितिवक्तव्ये अतिभ्रमणशीलत्वात् उपचारेणभ्रमिरितिभेदेननिर्देशः
अधिकमासेनत्रयोदशमासाअरायस्यत्रिशतंषष्टिश्चाहोरात्राःपर्वाणियस्य शतशब्देनविभक्तेरलुगार्षः षट्ऋतवो

 गार्हस्थ्योदयां कृत्वा संन्यासे चाभयं दत्वा मामपि आत्मानं जगच्च सह हैकीभूतं द्रक्ष्यसि २८ त्वद्वीर्येण सह देवहूत्यां
 अवतीर्येति शेषः ॥२९॥ प्रत्यग्भूते षड्दोषु जायते आविर्भवतीति प्रत्यगक्षजः सरस्वत्यानद्या परिवेष्टितात् ३० अशे
षसत्तपो मंत्रादिसिद्धेश्वरैरभिष्टुतः सिद्धमार्गः वैकुंठमार्गो यस्य यद्वा अशेषसिद्धेश्वराभिष्टुतस्थासौ सासिद्धैर्मृग्यत इति

कृत्वा दयां च जीवेषु दत्वा चाभयमात्मवान् मय्यात्मानं सह जगद्द्रक्ष्यस्यात्मनि चापि मां २८ स
चाहं स्वांशकलया त्वद्वीर्येण महामुने तव क्षेत्रे देवहूत्यां प्रणेष्ये तत्त्वसंहितां २९ श्रीमैत्रेय उ
वाच ॥ एवं तमनुभाष्याथ भगवान्प्रत्यगक्षजः जगाम बिन्दुसरसः सरस्वत्या परिश्रितात् ३० निरीक्षत
स्तस्य ययावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः आकर्णयन्पत्ररथेंद्रपक्षैरुच्चारितं स्तोममुदीर्णसा
म ३१ अथ संप्रस्थिते शुक्ले कर्दमो भगवानृषिः आस्ते स्म बिंदुसरसि तं कालं प्रतिपालयन् ३२ मनुः स्यं
दनमास्थाय शातकौंभपरिच्छदं आरोप्य स्वां दुहितरं सभार्यः पर्यटन्महीं तस्मिन्सुधन्वन्नहनि भगवान्
यत्समादिशत् उपायादाश्रमपदं मुनेः शांतव्रतस्य तत् ३३ सिद्धमार्गं स्पष्टयति पत्ररथेंद्रः गरुडस्तस्य पक्षैरुदीर्णम

भिव्यक्तं समाकर्णयन् बृहद्रथंतरे पक्षाविति श्रुतेः उच्चारितं स्तोमं वचसामाधारभूतानामृचां समुदायं स्तएवं तु स्तोम आख्यात इति श्रुतेः समास
पाठे उच्चारितस्तोमः स्तोत्रीयः समुदायो यस्य तानि इति ३१ तं कालं परस्परं त्युक्तं प्रतीक्षमाणः ३२ शातकौंभाः सौवर्णाः प्रकाराः यस्मि
न् तं रथमास्थाय दुहितरं चारोप्य वरान्वेषणार्थं पर्यटन् हे सुधन्वन् विदुर यत् अहः ३३ ॥ ६६

अमृतस्सुखकरेण प्रेमस्मिताभ्यामीक्षणेन विभ्रमंती भ्रूर्यस्य ॥१९॥ चैत्यं हार्दभावं मे मया समयोजितं घटितं यदर्थमेवाहं समर्चि
तः ॥२०॥ मयि संगृभितः संगृहीतः ॥ एकाग्रीकृत आत्मा चित्तं यैस्तेषां जन्म द्रुहिणे त्वादृशेषु अतितरां सर्वथा निष्फलं न स्यात् २१

मैत्रेय उवाच ॥ इत्यव्यलीकं प्रणुतोऽब्जनाभस्तमाबभाषे वचसामृतेन सुपर्णपक्षोपरि रोचमानः प्रेमस्मितोद्वी
क्षणविभ्रमद्भ्रूः ॥१९॥ श्रीभगवानुवाच ॥ विदित्वा तव चैत्यं मे पुरैव समयोजि तत् यदर्थमात्मनियमैस्त्वयैवाह
समर्चितः २० न वै जातु मृषैव स्यात्प्रजाध्यक्ष मदर्हणं भवद्विधेष्वतितरां मयि संगृभितात्मनां २१ प्रजा
पतिसुतः सम्राट् मनुर्विख्यातमंगलः ब्रह्मावर्तं योऽधिवसन् शास्ति सप्तार्णवां महीं २२ स चेह विप्र रा
जर्षिर्महिष्या शतरूपया आयास्यति दिदृक्षुस्त्वां परश्वो धर्मकोविदः २३ आत्मजामसितापांगीं वयः
शीलगुणान्वितां मृगयंतीं पतिं दास्यत्यनुरूपाय ते प्रभो २४ समाहितं ते हृदयं यत्रेमान् परिवत्सरान् सा त्वां
ब्रह्मन्नृपवधूः काममाशु भजिष्यति २५ या त आत्मभृतं वीर्यं नवधा प्रसविष्यति वीर्ये त्वदीये ऋषय
आधास्यंत्यंजसात्मनः २६ त्वं च सम्यगनुष्ठाय निदेशं म उशत्तमः मयि तीर्थीकृताशेषक्रियार्थो मां प्रपत्स्य
ते २७

विख्यातं मंगलं सदाचारादिलक्षणं यस्य २२ हे विप्र महिष्या सह २३ २४ यत्र यस्यां भार्यायां समा
हितं अभिसंधानेन स्थितं नृपवधूः राजकन्या २५ ते वीर्ये आत्मनि भृतं धृतं या प्रसविष्यति वीर्ये प्रसूतासु कन्या
सु अंजसा आत्मनः पुत्रानाधास्यंति २६ निदेशमाज्ञां उशत्तमः शुद्धसत्वः तीर्थं पात्रं तेन दानं लक्ष्यते मयि समर्पितं सर्वं कर्म

भा० द० उग्रो युक् योगो यस्य तेन वपुषा विद्योतमानं तस्य भगवतो व्याहृतं भाषणमेवामृतकला ऽमृतं तन्मयस्य चंद्रस्य कलात
६२ न्मयं पीयूषं तस्य श्रवणेन च नातिक्षामं तपसा कृशं ६२ प्रांशुमुन्नतं उपसंसृत्य समीपं गत्वा मलिनं दृढ शेते इति दृढ चे
वक्रियासंबंधः अर्हते ऽनेनेत्यर्हणं म्हारतंतनत् असंस्कृतं अनिर्णिक्तं यथा मलिनं दृश्यते तेन हृतं ६३ उदंकं पणिस्य

विद्योतमानं वपुषा तपस्युग्रयुजा चिरं नातिक्षामं भगवतः स्निग्धापांगावलोकनात् तद्व्याहृ
तामृतकलापीयूषश्रवणेन च ६२ प्रांशुं पद्मपलाशाक्षं जटिलं चीरवाससं उपसंसृत्य मलिनं
यथार्हणमसंस्कृतं ६३ अथोदङ्कमुपायातं नरदेवं प्रणम्य पुरः सपर्य्यया प्रत्यगृह्णात् प्रतिनंद्या
नुरूपया ६४ गृहीतार्हणमासीनं संयतं प्रीणयन् मुनिः स्मरन् भगवदादेशमित्याह श्लक्ष्णया
गिरा ६५ नूनं चंक्रमणं देव सतां संरक्षणाय ते वधाय चासतां यस्त्वं हरेः शक्तिर्हि पालिनी ६६
यो ऽर्केन्द्वग्नीन्द्रवायूनां यमधर्मप्रचेतसां रूपाणि स्थान आधत्से तस्मै शुक्लाय ते नमः ६७ ॥ श्री

ञ्जलिं प्राप्तं पुरः पादसमीपे प्रणतं आशीर्भिरभिनंद्य सपर्य्ययार्हणया प्रत्यगृह्णात् सत्कृतवान् ६४ ६५ ते चंक्र
मणं पर्य्यटनं हि यस्मात् ६६ मनस्य विहंतुं प्रणमति यदिति स्थाने तत्कर्मावसंसरे शुक्लाय विश्वसे ६७ ॥ ६२

तत्प्रवेशमात्रेणपरमानंदंप्राप्ताइतिदर्शयितुं आश्रमंवर्णयति यस्मिन्नित्यादिभिःसप्तभिःश्लोकैः प्रपन्नेकर्दमे ३४ शिवमा
रोग्यं श्रमघ्नंस्वादुजलंयस्मिन् ३५ कूजंतःपुण्यामृगाद्विजाश्चयस्मिन् तैः पुण्यद्रुमलताजालैःसमृद्धैर्युक्तं ३६ घुष्टंना
दितं भ्रमराणांभ्रमोविनोदोयस्मिन् मत्तावर्हिणएवनटास्तेषामाटोपोनृत्यसंभ्रमोयस्मिन् आह्वयंतःमिथोमत्ताःकोकिला

या १ यस्मिन्भगवतोनेत्रान्न्यपतन्नश्रुबिंदवः कृपयासंपरीतस्यप्रपन्नेर्पितयाभृशं ३४ तद्वैबिंदुसरोनामसरस्व
त्यापरिप्लुतं पुण्यंशिवामृतजलंमहर्षिगणसेवितं ३५ पुण्यद्रुमलताजालैःकूजत्पुण्यमृगद्विजैः सर्व
र्तुफलपुष्पाढ्यंवनराजिश्रियान्वितं ३६ मत्तद्विजगणैर्घुष्टंमत्तभ्रमरविभ्रमं मत्तवर्हिनटाटोपमा
ह्वयन्मत्तकोकिलं ३७ कदंबचंपकाशोककरंजबकुलासनैः कुंदमंदारकुटजैश्चूतपोतैरलंकृतं ३८
कारंडवैःप्लवैर्हंसैःकुररैर्जलकुक्कुटैः सारसैश्चक्रवाकैश्चचकोरैर्वल्गुकूजितं ३९ तथैवहरिणैः
क्रोडैःश्वाविद्गवयकुंजरैः गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतं ४० प्रविश्यतत्तीर्थवरमादि
राजःसहानुगः ददर्शमुनिमासीनंतस्मिन्हुतहुताशनं ४१ यस्मिन् ३७ कदंबादिभिर्वृक्षैरलंकृतं ३८
कारंडवादिभिः वल्गुयथाभवतितथाकूजितं ३९ हरिणादिभिर्वृतं तत्रक्रोडःसूकरःश्वावित् शल्लकः मर्को
मर्कटः तद्विशेषागोपुच्छाः हरिर्वानरः सिंहोवा नाभिःकस्तूरीमृगः ४० हुतःहुताशनोब्रह्मचारियोग्योयेन ४१

भा० तृ० ६२

मदीया कन्या त्वया परिणेयेति विज्ञापयिष्यन् युष्मदस्मत्संबंधस्तावदीश्वरेण पूर्वमेव घटितमित्याह ब्रह्मेति सार्द्धद्वाभ्यां
आत्मनः पर्याप्तिः पालनं वेदप्रवर्त्तनं तस्येच्छया युष्मान्ब्राह्मणान् २ तत्त्राणाय ब्राह्मणपालनाय ब्रह्म ब्राह्मणजातिः
क्षत्रं क्षत्रियजातिः ३ एवं स देव एव रक्षति स्म कोऽसौ यः सदसदात्मकः सर्वात्मकः तथापि अव्ययो निर्विकारः ४ तं विज्ञा

मनुरुवाच ॥ ब्रह्मासृजत्स्वमुखतो युष्मानात्मपरीप्सया छंदोमयस्तपोविद्यायोगयुक्तानलंपटा
न् २ तत्त्राणायासृजच्चास्मान्दोःसहस्रात्सहस्रपात् हृदयं तस्य हि ब्रह्म क्षत्रमंगं प्रचक्षते ३ अतो
ह्यन्योन्यमात्मानं ब्रह्म क्षत्रं च रक्षतः रक्षति स्माव्ययो देवः स यः सदसदात्मकः ४ तव संदर्शनादेवछि
न्ना मे सर्वसंशयाः यत्स्वयं भगवान्प्रीत्या धर्ममाह रिरक्षिषोः ५ दिष्ट्या मे भगवान्दृष्टो दुर्दर्शो योऽकृता
त्मनां दिष्ट्या पादरजः स्पृष्टं शीर्ष्णा मे भवतः शिवं ६ दिष्ट्या त्वयानुशिष्टोऽहं कृतश्चानुग्रहो महान् ॥
अपावृतैः कर्णरन्ध्रैर्जुष्टा दिष्ट्योशतीर्गिरः ७ स भवान्दुहितृस्नेहपरिक्लिष्टात्मनो मम श्रोतुमर्ह
सि दीनस्य श्रावितं कृपया मुने ८ प्रियव्रतोत्तानपदोः स्वसेयं दुहिता मम अन्विच्छति पतिं युक्तं वयःशील
गुणादिभिः ९

पयितुं मे वक्तृदर्शनादिकमभिनंदति तवेति त्रिभिः ५ ६ अनुग्रहोऽनुशासनादिरूप
एव उशतीः उशत्यः ७ विज्ञापयति स भवानिति सप्तभिः दुहितुः स्नेहेन परिक्लिष्ट आत्मा यस्य श्रावितं विज्ञापितं ८ प्रि
यव्रतोत्तानपदोः स्वसेति पुत्रिकाकरणशंका निरस्ता मम सु

६२

नयद्देतिपंचानामर्थः यद्यपिधर्मरक्षार्थंसर्वतःपर्यटनस्तवप्रसंगादप्यागमनंसंभवति तथापिविशेषकार्य्यं
चेदस्तितत्कथ्यतामिति जैत्रंजयप्रदं मणिगणार्पितायस्मिन्तंरथं हृद्यत्वंयदाभुवोमंडलंनपर्य्यटसि तदासेतवो
भिर्घोरत्रितित्रपाणामन्वयः विस्फूर्जत् नादंकुर्वच्चंडंयस्य ४८ स्वसैन्यस्यचरणैः क्षुत्तंसंघट्टितं ४९ वर्णाश्रमा

नयदारथमास्थायजैत्रंमणिगणार्पितं विस्फूर्जच्चंडकोदंडं रथेनत्रासयन्नघान् ४८ ससैन्य
चरणक्षुत्तंवेपयन्मंडलंभुवः विकर्षन्बृहतींसेनांपर्य्यटस्यंशुमानिव ४९ तदैवसेतवः सर्वेवर्णा
श्रमनिबंधनाः भगवद्रचितताराजन्भिद्येरंश्चतदस्युभिः अधर्मश्चसमेधेतलोलुपैर्व्यंकुशैर्नृभिः ५०
शयानेत्वयिलोकोयंदस्युग्रस्तोविनंक्ष्यति ॥ ५१ ॥ अथापिपृच्छेत्वांवीरयदर्थंत्वमिहागतः तद्वयंनिर्व्यली
केनप्रतिपद्यामहेहृदा ॥ ५२ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे मनुकर्दमसंवादे एकविंशतित
मोध्यायः ॥ २१ ॥ श्रीमैत्रेय उवाच ॥ एवमाविष्कृताशेषगुणकर्मोदयोमुनिं सव्रीडइवतंसम्राडुपारतमुवा
चेह १

संगनिबंधनंयैः वतत्रहोनिरंकुशैःनरैः निमित्तभूतैः ५० शयानेनिश्चिंते ५१ निर्व्यलीकेन संधर्षेण
प्रतिपद्यामहेस्वीकुर्महे ५२ इ त ये क शः २१ हुविंशेकईमादाद्यपद्यादिष्टंहिविस्मुना मनुदुहितरंदेवहू
तिमित्युपवर्ण्यते एवमोविष्कृतत्रशेषाणांगुणानांकर्मणांच उदयउत्कर्षोयस्यससम्राट्मनुः सव्रीडइवस्वकीर्त्तिं

नवः २

४

भा॰ तृ॰ ५ भजिष्ये स्वीकरिष्ये यावदपत्योत्पत्तिस्तावद्गार्हस्थ्यं ततः परं संन्यास इति भाषाबंधः समयः तमेवाह यावत् आत्मनो
९४ मम च तेजो गर्भं बिभृयात् यद्वा ममात्मनो देहस्थं तत्तेजो वीर्यं बिभृयादिति अतः परं पारमहंस्यं ज्ञानं तस्मिन् मु
ख्यान् शुक्लेन विष्णुना साक्षात्प्रकर्षेणोक्तान् अविहिंस्रान् हिंसारहितान् समादीन् बहु यथा भवति एवमहं
तां प्रार्थयंतीं ललनाललाममसेवितश्रीचरणैरदृष्टां वत्सां मनोरुच्चपदः स्वसारं को वा नानुमन्येत
बुधोभियातां १७ अतो भजिष्ये समयेन साध्वी यावत्तेजो बिभृयादात्मनो मे अतो धर्मान् पारम
प्रो॰३ हंस्यमुख्यान् शुक्लप्रोक्तान्बहु मन्येऽविहिंस्रान् १८ यतोऽभवद्विश्वमिदं विचित्रं संस्थास्यते यत्र च
वावतिष्ठते प्रजापतीनां पतिरेव मह्यं परं प्रमाणं भगवाननंतः १९ स उग्रधन्वन्नियदेवाबभाष
आसीच्च तूष्णीमरविंदनाभं धियोपगृह्णन्स्मितशोभितेन मुखेन चेतो लुलुभे देवहूत्याः २० सोऽनु
ज्ञात्वा व्यवसितं महिष्या दुहितुः स्फुटं तस्मै गुणगणाढ्याय ददौ तुल्यां प्रहर्षितः २१
प्रियां मन्ये १८ ननु तव पितुः प्रजापतेराज्ञा सृष्ट्यावेव न संन्यासे तत्राह यत इति संस्थास्यते विलयं यास्यति
वावतिष्ठते एवार्थे ऋणत्रयापाकरणानंतरं संन्यास एव मादृशानां भगवता कृत इत्यर्थः १९ हे उग्रधन्वन् लुलुभे मु
खेन प्रलोभ्यते स्मि यद्वा देवहूत्याः मुखेन प्रलोभितवान् २० स मनुः अनु अनंतरं महिष्याश्च व्यवसितं
९४

१० प्रतीच्छस्वीकुरु ११ उद्यतस्य स्वतःप्राप्तविषयस्य प्रतिवादः प्रत्याख्यानं १२ कीनाशं कृपणं अवज्ञया पन्नमाने
१३ यस्य सावधि ब्रह्मचर्यं स उपकुर्वाणः प्रत्तां मया दत्तां १४ अप्रत्ता चेति मय्येव कृतनिश्चयत्वात् कस्मैचित् प्रतिश्रुतानभ
तीत्यर्थः आद्यः प्रथमः ततः पूर्वं विवाहाभावात् मुख्य इति वा १५ भूयात् भवेत् प्रतीतः ग्रह्लामिति सौभाग त्वायह

यदा तु भवतः शीलश्रुतरूपवयोगुणान् अशृणोन्नारदादेवात्वय्यासीत्कृतनिश्चया १० न तत्प्रतीच्छ
द्विजाग्र्येमां श्रद्धयोपाहृतां मया सर्वात्मनानुरूपां ते गृहमेधेषु कर्मसु ११ उद्यतस्य हि कामस्य प्रति
वादो न शस्यते अपि निर्मुक्तसंगस्य कामरक्तस्य किं पुनः १२ य उद्यममनादृत्य कीनाशमभियाचते क्षी
यते तद्यशः स्फीतं मानश्चावज्ञया हतः ॥१३॥ अहं त्वा शृणवं ब्रह्मन् दुहित्रर्थे समुद्यतं अतस्त्वमुपकु
र्वाणः प्रत्तां प्रतिगृहाण मे ॥१४॥ ऋषिरुवाच ॥ बाढमुद्वोढुकामोऽहमप्रत्ता च तवात्मजा आवयोरनु
रूपोऽसावाद्यो वैवाहिको विधिः १५ कामं स भूयान्नरदेव तेऽस्याः पुत्र्याः समाम्नायविधौ प्रतीतः क एव ते तन
यां नाद्रियेत स्वयैव कान्त्याक्षिपतीमिव श्रियं १६ यां हर्म्यपृष्ठे क्वणदङ्घ्रिशोभां विक्रीडतीं कन्दुकविह्वला
क्षीम् विश्वावसुर्न्यपतत्स्वाद्विमानाद्विलोक्य संमोहविमूढचेताः १७
स्तं मयापत्येत्यादि मंत्रः प्रसिद्धः स्वयांगकान्त्या वश्रियं भूषणादि शोभां १६ यां विलोक्य न्यपतत् संमोहेन विमूढं व्याकुलं चेतो
य क्वणद्भ्यामंघ्रिभ्यां शोभा यस्याः ललना नालसा मंभूषणभूतां असेवितौ श्रियम्भ्वरले स्तैरदृष्टां दृष्टुमप्ययोग्यां उच्चैपदः उ

की ३

भा०स्क० यत इति यत्रायजत् भुवंस्थानं लब्ध्वेति त्वन्प्रत्ययांतं लब्धवान्सन्नित्यर्थः यतोलब्धवान् तं यज्ञपुरुषमितिवा स्वर्गादपिभ्र
९५ शिंश्रेष्ठा तत्रापितत्स्थानंश्रेष्ठमित्युक्तंभवति २८ प्रस्तुतमाह यांवर्हिष्मतीनामपुरींसमावसत् पूर्वयस्यामुषितः तस्यां
निविश्यभवनंप्रविष्टःसन्भोगान्वुभुजइत्यन्वयः २९ अन्येषांधर्मादीनामविरोधेन प्रत्यूषेषु उषस्सुसंगीयमानासत्कीर्त्ति

कुशाकाशमयंवर्हिरास्तीर्य्यभगवान्मनुः अयजद्यज्ञपुरुषंलब्धास्थानंयतोभुवम् २८ वर्हिष्मतीनामवि
भुर्निर्विविश्यसमावसत् तस्यांप्रविष्टोभवनंतापत्रयविनाशनं २९ सभार्य्यःसप्रजःकेमान्विभुजेऽन्याविरोध
तः संगीयमानःसत्कीर्त्तिःसस्त्रीभिःसुरगायकैः प्रत्यूषेष्वनुवद्धेनहृदाश्रृण्वन्हरेःकथाः ३० निष्मातंयोग
मायासुमुनिंस्वायंभुवंमनुं यदाभ्रंशयितुंभोगान्नशेकुर्भगवत्परं अयातयामोस्तस्यासन्यामाःस्वांतर
कु यापनाः शृण्वतोध्यायतोविष्णोः कुर्वतोब्रुवतःकथाः ३१ सएवंस्वांतरंनिन्येयुगानामेकसप्ततिं वासुदेवप्रसं
गेनपरिभूतगतित्रयः ३२

र्यस्य तथापिस्वयंहरेरेवकथाःशृण्वन्भोगान्वुभुजे ३० योगमायासुराहिकभोगरचनासुयत्नवतः भ्रंशयितुंअभिभ
वितुं अतःयातायातोयामोयस्य पाकस्यान्नस्यतद्धत्तसारंभवति अतोऽन्यद्रूपिगततसारंयातयामात्रेग तसाराआसन्
स्वांतरंतदीयंमन्वंतरंनयंतियेयामाःकालावयवाःकुर्वतः स्वधाकेचरुपानिवध्नतः ३२ परिभूतंगतत्रयंजाग्रदादिसा ९५

पारिवर्हान्विवाहकालेदेयान् भूषणानिचवासांसिपरिछदान्गृहोपकरणानिच २३ प्रत्तांप्रदत्तां सदृक्षायसदृशा
य गतव्यथाचिंतायस्य औत्कंठ्येनोन्मथितःआशयोयस्यतस्याविरहंसोढुं हेअंबहेवत्सेतिब्रुवन् संधिगताः शिखाःके
शानासिंचत् २५ ऋषिकुल्यहितायाः उभयोःसुरोधसोःशोभनतटयोः २६ अभिप्रेत्यज्ञात्वाब्रह्मावर्त्तात्देशात् प्रजाः

शतरूपामहाराज्ञीपारिवर्हान्महाधनान् दंपत्योःपर्य्यदात्प्रीत्याभूषावासःपरिच्छदान् २३ प्रत्तांदुहित
रंसम्राट् सदृक्षायगतव्यथः उपगुह्यचबाहुभ्यामौत्कंठ्योन्मथिताशयः अशक्नुवंस्तद्विरहंमुंचन्बाष्पक
लांमुहुः आसिंचदंबवत्सेतिनेत्रोदैर्दुहितुःशिखाः २३ आमंत्र्यतंमुनिवरमनुज्ञातःसहानुगः प्रत
स्थेरथमारुह्यसभार्य्यःस्वपुरंनृपः उभयोःऋषिकुल्यायाःसरस्वत्याःसुरोधसोः ऋषीणामुपशांतानांप
श्यन्नाश्रमसंपदः २४ तमायांतमभिप्रेत्यब्रह्मावर्त्तात्प्रजापतिम् गीतसंस्तुतिवादित्रैःप्रत्युदीयुःप्रह
र्षिताः २५ वर्हिष्मतीनामपुरीसर्वसंपत्समन्विता न्यपतन्यत्ररोमाणियज्ञस्यांगंविधुन्वतः २६ कुशाः
काशास्तएवासन्शश्वद्धरितवर्च्चसः ऋषयोयैःपराभाव्ययज्ञघ्नान्यज्ञमीजिरे २७

स्वपतिंप्रत्युजग्मुः २५ कोसौब्रह्मावर्त्तइत्यपेक्षायामाह यत्रवर्हिष्मतीनामपुरी सापिकुत्रयत्रयज्ञस्ययज्ञवराहस्यरोमाणिन्य
पतन्निति यत्रेतिसंबध्यते २६ वर्हिष्मतीनामनिरुक्तिं ब्रुवन् प्रसंगाद्देशस्यश्रैष्ठ्यमाहद्वाभ्यां कुशाःकाशाश्चासन् सम्यक्नित्यंहरि
तवर्च्चसोवर्णोयेषां यज्ञघ्नान्रक्षसादीन्पराभवंनीत्वायज्ञंविष्णुं २७

भा० त० सुहृस्त्रियः मदर्थे क्षपितुं नावेक्षिताः न गण्यतः समुचितः श्लाघितः मत्सेवासक्तया त्वयोपेक्षित इत्यर्थः ४ तपश्च समाधि
९६ श्च विद्या च उपासना तास्तु यः आत्मयोगाः चित्तैकाग्र्यं तेन जिताः प्राप्ता भगवतः प्रसादाः दिव्या भोगाः तानेव तेऽवरुद्धा
न् त्वयापि वशीकृतान् पश्य दिव्यां दृष्टिं वितरामि यया द्रष्टुं शक्ष्यसि ५ अन्ये पुनर्भोगाः किं न किमपि अतितुच्छा इत्यर्थः

तुष्टोऽहमद्य मानविमानदायाः शुश्रूषया परमया परया च भक्त्या यो देहिनामयमतीव सुहृत्स देहो नावेक्षि
तः समुचितः क्षपितुं मदर्थे ४ ये मे स्वधर्मनिरतस्य तपःसमाधिविद्यात्मयोगविजिता भगवत्प्रसादाः
तानेव ते मदनुसेवनयावरुद्धान्दृष्टिं प्रपश्य वितराम्यभयानशोकान् ५ अन्ये पुनर्भगवतो भ्रुव उद्विजृंभ
विभ्रंशितार्थरचनाः किमुरुक्रमस्य सिद्धासि भुंक्ष्व विभवान्निजधर्मदोहान्दिव्यान्नरैर्दुरधिगान्नृपवि
क्रियाभिः ६ एवं ब्रुवाणमबलाखिलयोगमायाविद्याविचक्षणमवेक्ष्य गताधिरासीत् संप्रश्रयप्रणयविह्व य २
लयागिरेषद्व्रीडावलोकविलसद्धसिताननाह ७

तत्र हेतुः भगवत उरुक्रमस्य याः भ्रूः तस्याः उद्विजृंभः वक्रीभावः तेन विभ्रंशिता अर्थरचना मनोरथा येषु निजधर्मेण प
ति प्रत्येन दुह्यंत इति तथा तान् दुरधिगान् दुःप्रापान् नृपावयमिति या विक्रियास्तत्तद्भोग्यविकृतयः ताभिः ६ अखिलायो
गमायाश्च विद्याश्च तत्तदुपासनास्तासु विचक्षणमेवं ब्रुवाणं पतिमवेक्ष्य गताधिर्निश्चिंता जाता संप्रश्रयो विनयः प्रणयः प्रेम
ताभ्यां विक्लवा गद्गदा तया गिरा ईषद्व्रीडासहितो योऽवलोकस्तेन विलसद्धसितमाननं यस्याः सा आह जगाद ७ ९६

दिव्यास्त्वं परिच्छाः मानुषाः शत्रुप्रभवाः भौतिकाः शीतोष्मादिप्रभवाः वैयासे विदुर ३३ तस्य ज्ञानातिशयमाह यदृति
नृणां साधारणधर्मान् ३४ तस्य यदपत्यं देवहूतिः तस्योदयं प्रभावः ३५ ॥ इति तृतीये द्वाविंशः ॥ २२ ॥ त्रयोविंशे तपोयोग

शारीरा मानसा दिव्या वैयासे ये च मानुषाः ॥ भौतिकाश्च कथं क्लेशा बाधंते हरिसंश्रयं ३३ यः पृष्टो मुनिभिः
प्राह धर्मान्नानाविधान्शुभान् नृणां वर्णाश्रमाणां च सर्वभूतहितः सदा ३४ एतत्ते आदिराजस्य मनो
श्चरितमद्भुतं वर्णितं वर्णनीयस्य तदपत्योदयं शृणु ॥ ३५ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे देव
हूतिप्रदानं द्वाविंशोध्यायः ॥ २२ ॥ श्रीमैत्रेय उवाच ॥ पितृभ्यां प्रस्थिते साध्वी पतिमिंगितकोविदा नित्यं पर्यचर
त्प्रीत्या भवानीव भवं प्रभुं १ विश्रंभेणात्मशौचेन गौरवेण दमेन च शुश्रूषया सौहृदेन वाचा मधुरया च वि
भो विसृज्य कामं दंभं च द्वेषं लोभमघं मदं अप्रमत्तोद्यता नित्यं तेजीयांसमतोषयत् २ स वै देवर्षिवर्य्यस्तां
मानवीं समनुव्रतां दैवाद्गरीयसः पत्युराशासानां महाशिषः कालेन भूयसा क्षामां कर्षितां व्रतचर्य्यया ॥
प्रेमगद्गदया वाचा पीडितः कृपयाब्रवीत् ३

निर्मिते सर्वसंपदि विमाने कामगे चित्रा तयोरतिहृद्यते प्रस्थिते गमने सति १ दंभं कपटं अयं निसिद्धाचरणं तेजीयांसं
अतितेजस्विनं २ दैवाद्गरीयसः दैवादपि गुरुतरात् दैवमप्यन्यथाकर्तुं समर्थादित्यर्थः व्रतचर्य्ययाकर्षितां तत्रापि भूयसा

भागवतटीका ४

भा० द० ९७

नदेवविप्राणिष्टि सर्वकामदुघ इति नवभिः सर्वैश्वर्यरत्नादिभिः समन्वितं सर्वर्द्धीनां सर्वसंपदां य उपचयस्तस्य उदर्कः
उत्तरोत्तराभिवृद्धिर्यस्मिन् उपस्कृतं शोभितं ११ उपस्कराणां परिकरः पट्टिकाश्च अल्पविस्तारपटवस्त्रविशेषाः पताका
विस्तृतास्ताभिः १२ विचित्राणि माल्यानि पुष्पाणि यासु मंजु यथा भवत्येवं शिंजतः षडंघ्रयो यासु ताभिः स्रग्भिः १३

सर्वकामदुघं दिव्यं सर्वरत्नसमन्वितं सर्वर्द्ध्युपचयोदर्कं मणिस्तंभैरुपस्कृतं ११ दिव्योपस्करणो
पेतं सर्वकालसुखावहं पट्टिकाभिः पताकाभिर्विचित्राभिरलंकृतं १२ स्रग्भिर्विचित्रमाल्याभिर्मं
जुशिंजत्षडंघ्रिभिः दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितं १३ उपर्युपरि विन्यस्तनिलयेषु पृ
थक्पृथक् क्षिप्तैः कशिपुभिः कांतैः पर्यंकव्यजनासनैः १४ तत्र तत्र विनिक्षिप्तनानाशिल्पो
पशोभितम् महामरकतस्थल्या जुष्टं विद्रुमवेदिभिः १५ द्वार्षु विद्रुमदेहल्या भातं वज्रकपाटव
त् शिखरेष्विंद्रनीलेषु हेमकुंभैरधिश्रितं १६ चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषु निर्मितैः जुष्टं वि
चित्रवैतानैर्महार्हैर्हेमतोरणैः १७

उपर्युपरि विरचितगृहेषु कशिपुभिः शय्याभिः कांतं कमनीयं पर्यंकादिभिश्च कांतं १४ १५ द्वारेषु विद्रुमनिर्मिता
देहली उदुंबरस्तया भातं शोभितं वज्ररचितकपाटयुक्तं इंद्रनीलमयेषु शिखरेषु प्रासादाग्रभागेषु १६ चक्षुष्मत

इवये पद्मरागाग्र्यास्तैः यद्वा चक्षुष्मद्भिर्वकैः पद्म
रागाग्र्यैः विचित्रवैतानैर्वितानसमूहैः १७

९७

वतेति रद्धं हे द्विजवृष द्विजश्रेष्ठ हे भर्त्तः त्वयि एतत्सर्वं राद्धं सिद्धमेव तदहमवैमि जानामि किंतु यस्ते त्वया समयोभिमतः स ताव
द्भूयात् सकृदिति गर्भसंभवमात्रपर्यंतमित्यर्थः यस्माद्गरीयसि श्रेष्ठे भर्त्तरि हेतुभूते स्त्रीणां प्रसवो गुणः महान् लाभः स
मासपाद्गरीयसि पत्यौत्पन्नसतीनां । यतो गुणप्रसवः गुणो विस्तारो भवति अतः पुत्रोत्पत्त्या प्रसवगुणविस्तारे ज्ञाते पश्चा
त्वदुक्तं सर्वं भवत्विति भावः ॥९॥ अंगसंगार्थं च प्रथममिति कर्त्तव्यतां संपादयेत्याह हे ईश तत्र अंगे इति कृत्यं साधनं यथोप

देवहूतिरुवाच ॥ राद्धं बत द्विजवृषैतदमोघयोगमायाधिपे त्वयि विभो तदवैमि भर्त्तः यस्तेभ्यधायि समयः सकृ
दंगसंगो भूयाद्गरीयसि गुणः प्रसवः सतीनां ९ तत्रेतिकृत्यमुपशिक्ष यथोपदेशं येनैष मे कर्षितोतिरिरं
सयात्मा सिध्येत ते कृतमनोभवधर्षितायाः दीनस्तदीश भवनं सदृशं विचक्ष्व ९॥ श्रीमैत्रेय उवाच ॥ प्रियायाः
प्रियमन्विष्यन्कर्दमो योगमास्थितः विमानं कामगं क्षत्तस्तर्ह्येवाविरचीकरत् ॥१०॥

देशं कामशास्त्रानुसारेण उपशिक्षस्व संज्ञानीहितः उपकल्पयेत्यर्थः येन साधनेनाभ्यंगभोजनादिना अतीव रं
तुमिच्छया कर्षितो दीनश्च मम एव आत्मा देहः सिध्येत अतिसमर्थो भवेत् कथंभूतायाः ते त्वयैव कृतः उद्भावि
तो यो मनोभवस्तेन धर्षितायाः तत्र तेन रूपं भवनं च विचक्ष्व वितर्क्य विचारयेति यावत् ९ तर्हि तत्क्षणमेव
आविरचीकरत् आविर्भावयामास १०

भा० त्व० ततः स्नानेन स्नानयोग्यं तैलादिना पराद्ध्यानि उत्कृष्टानि वरीयांसि तन्वप्रियाणि दीप्तिमन्ति च पानं पेयं अमृतं तस्या
२९ दु आसवं मादकं २४ आदर्शे स्वमात्मानं ददर्शेति शेषः आत्मानं विशिनष्टि चतुर्भिः कृतं स्वस्त्ययनं मंगलं यस्य
यस्त्वमात्मशब्दसामानाधिकरण्यात् किरूढमित्यस्य प्रपंचः स्नानं उद्वर्त्यक्षालितं कृतं शिरःस्नानम् अभ्यंगो येन भूषितत्वमेव
स्नानेन तां महार्हेण स्नापयित्वा मनस्विनी दुकूले निर्मले नूत्ने दद्दुरस्यै च मानदाः भूषणानि पराद्ध्या
नि वरीयांसि चार्चिमन्ति च अन्नं सर्वगुणोपेतं पानं चैवामृतासवं २४ अथादर्शे स्वमात्मानं स्नाविवर्णं विरजोंव
रं विरजं कृतस्वस्त्ययनं कन्याभिर्विदुमानितं स्नातं कृतशिरस्नानं सर्वाभरणभूषितं निष्कग्रीवं वलयि
नं कुर्जत्काञ्चनन्नूपुरं श्रोण्यां रथ्यस्तया कांच्या कांचन्या बद्धरत्नया हारेण च महार्हेण रुचकेन वि
भूषितं सुदतीं सुभ्रुवां श्लक्ष्णां स्निग्धापांगेन चक्षुषा पद्मकोशस्पर्धिनी लोलकैश्चलसन्मुखं २५
यदा सस्मार दक्षभ्रमर्षी रामां दयितं पतिं तत्रास्ते सहस्रीभिर्यत्रास्ते स प्रजापतिः २६
र निष्कं पदकं ग्रीवायां यस्य वह्निनि रत्नानि यस्यां तया रुचकेन मंगलद्रव्येण कुंकुमादिना तदुक्तं विश्वप्रकाशे
रुचकं मंगलद्रव्ये ग्रीवाभरणदंतयोरिति सुदतीं सुभ्रुवां चक्षुषेति जातावेकवचनानि येलैसर शोभमाने
मुखं यस्य कथं भूतेन च चक्षुषा श्लक्ष्णोमनोहरः स्निग्धोपांगो नेत्रप्रांतो यस्य पद्मकोशेनस्पर्द्धत इति पद्मकोश

२९ स्पष्टं तेन २५ दृष्ट्वाच यदा पतिं सस्मार तदायसौ
तत्रैव स्वयमप्यास्ते २६

कृत्रिमानपिहंसादीन्स्वान्जातीयान् मन्यमानैस्तत्र तत्राधिरुह्यनिकूजितं १८ विहारस्थानं क्रीडाप्रदेशा विश्रामः
शयनगृहं संवेशउपभोगस्थानं प्रांगणंगृहाद्बहिः अजिरंप्राकाराद्बहिः यथोपयोषं यथासुखं आत्मनःस्वस्यमाया
विनोपिविस्मयजनकमेव १९ नातिप्रीतेनमलिनदेहत्वात् परिचारिकाभावाच्च २० अस्मिनङ्कविंदुसरसि आह

हंसपारावतव्रातैस्तत्र तत्र निकूजितं कृत्रिमान्मन्यमानैःस्वानधिरुह्याधिरुह्यच १८ विहारस्थानवि
श्रामसंवेशप्रांगणाजिरे। यथोपयोषंरचितैर्विस्मापनमिवात्मनः १९ ईदृग्गृहंतत्पश्यंती नातिप्रीत
नचेतसा सर्वभूताशयाभिज्ञःप्रावोचत्कर्दमःस्वयं २० निमज्ज्यास्मिन्ह्रदेभीरु विमानमिदमारुह
इदंशुक्लकृतंतीर्थमाशिषांयापकंनृणां २१ सातद्भर्तुःसमादाय वचःकुवलयेक्षणा सरजंबिभ्रती
वासोवेणीभूतांश्चमूर्द्धजान् अंगंचमलपंकेनसंछन्नंसवलस्तनं आविवेशसरस्वत्याःसरःशिवजला
शयं २२ सांतःसरसिवेश्मस्थाःशतानिदशकन्यकाः सर्वाःकिशोरवयसोददर्शोत्पलगंधयः तांदृष्ट्वास
हसोत्थायप्रोचुःप्रांजलयःस्त्रियः वयंकर्मकरीस्तुभ्यं साधिनःकरवामकिं २३
ह आधिरोह शुक्लेनविष्णुनाकृतं आनंदविंदुनिपातेनयापकंप्रापकं २१ समादायसंहत्यसरजंमलिनं सवलौविवर्णौ
स्तनौयस्मिन्तत् सरस्वत्याःशिवानिजलानिशेरतेयस्मिन् शिवाजलाशयान्जलचरायस्मिन्निति वा २२ सातत्रनिमग्ना
सतीविस्मयंददर्श तमाह सांतःसरसीतिदशभिः उत्पलगंधयः प्रोचुः तवकर्मकरीःपरिचारिकावयं अस्मानाज्ञापयेति

स्त्रियः१

भा० तृ० वैस्रंभकादिषु देवोद्यानेषु मानसे च सरसि रतः प्रीतः सन् ३१ अत्यशेत अतिक्राम्यास्थितः ३२ उद्दामचेतसां धीरा
१२१ णां व्यसनं संसारः तस्यात्ययो यस्मात् ३३ प्रेक्षयित्वा दर्शयित्वा गोलं मंडलं स्वसंस्थया द्वीपवर्षादिरचनया यावान्
तावंतं बह्वाश्चर्यो यस्मिंस्तं ३४ विभज्य नवधा नवप्रभेदैरात्मानं कृत्वा ३५ शरदः संवत्सरा मनाकुईदि ५२

वैस्रंभके सुरसने नंदने पुष्पभद्रके मानसे चैत्ररथ्ये च स रेमे रामया रतः ३१ भ्राजिष्णुना विमाने
न कामगेन महीयसा वैमानिकानत्यशेत चरन् लोकान् यथानिलः ३२ किं दुरापादनं तेषां पुंसामुद्दा
मचेतसां यैराश्रितस्तीर्थपदश्चरणो व्यसनात्ययः ३३ प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान्स्वसंस्थया
बह्वाश्चर्यं महायोगी स्वाश्रमाय न्यवर्तत ३४ विभज्य नवधात्मानं मानवीं सुरतोत्सुकां रामां निरमय
न् रेमे वर्षपूगान्मुहूर्तवत् ३५ तस्मिन्विमान उत्कृष्टां शय्यां रतिकरीं श्रिता न चाबुध्यत तं कालं त
दपीच्येन संगता ३६ एवं योगानुभावेन दंपत्यो रममाणयोः शतं व्यतीयुः शरदः कामलालसयोर्मनाक् ३७
तस्यामाधत्त रेतस्तां भावयन्नात्मनात्मवित् नोधा विधाय रूपं स्वं सर्वसंकल्पविद्विभुः ३८

व्यतीयुः ३७ आत्मना स्वदेहार्धरूपेण अतिप्रीत्या भावयन् तथा सति सदपत्यं भवेदिति नोधा नवधा सर्वसंकल्पवि
दिति तस्या वदु सत्यसंकल्पं जानन्नित्यर्थः विभुः स यथा कर्तुं समर्थश्च आत्मवदिति च तस्यां मनाशक्तत्वात् स्त्रियो जा १२१
तो इति भावः पुमान्पुंसोधिके शुक्रे स्त्री भवत्यधिके स्त्रिया इति स्मृतेः ३८

आत्मानं निशाम्य दृष्ट्वा तां च योगगतिं योगप्रभावं दृष्ट्वा संशयं किमिदमिति विस्मयं २७ स मुनिः विवाहात् प्रा
क् यदात्मनो रूपं तद्वपुर्बिभ्रतीं संवीतौ प्रावृतौ रुचिरौ स्तनौ यस्याः पार्श्वांतरैस्तु रूपविशेषणं शोभने वाससी
यस्याः जातो भावः प्रेमा यस्य हे अमित्रहन् जितकाम २८ तस्मिन्विमाने मुनिश्रेष्ठ बभ्राजे लुप्तो महिमा स्वा
तंत्र्यं यस्य उपचीर्णं शुश्रूषितं वपुर्यस्य विकसितकुमुद्गणवान् अपीच्यो अतिसुंदरः पूर्णचंद्र इव मुनिः नभ इव विमा

भर्तुः पुरस्तादात्मानं स्त्रीसहस्रवृतं तदा । निशाम्य तद्योगगतिं संशयं प्रत्यपद्यत २७ स तां कृतमलस्ना
नां विभ्राजंतीमपूर्ववत् । आत्मनो बिभ्रतीं रूपं संवीतरुचिरस्तनीं । विद्याधरीसहस्रेण सेव्यमानां सुवा
ससं । जातभावो विमानं तदारोहयदमित्रहन् २८ तस्मिन्नलुप्तमहिमा प्रिययानुरक्तो विद्याधरीभिरुप
चीर्णवपुर्विमाने । बभ्राज उत्कचकुमुद्गणवानपीच्यस्ताराभिरावृत इवोडुपतिर्नभस्थः २९ तेनाष्टलो
कपविहारकुलाचलेंद्रद्रोणीष्वनंगसखमारुतसौभगासु । सिद्धैर्नुतो द्युधुनिपातशिवस्वनासु रेमे चिरं
धनदवल्ललनावरूथी ३०

नं ताराः स्त्रियः कुमुदानीव ता सांनेणीति ज्ञेयः २९ तेन विमानेन अष्टलोकपालानां वि
हारो यस्मिन् कुलाचलेंद्रे मेरौ तस्य द्रोणीषु दरीषु अनंगस्य सखा यो मारुतः शीतः सुगंधः मंदानिलः तेन सौभाग्यं सौंदर्यं
यासु सिद्धैर्नुतः स्तुतः सन् द्युधुनिर्गंगा तस्याः पातेन शिवः स्वनो यासु तासु रेमे ललनावरूथी स्त्रीरत्नसमूहवान् ३० ॥

नेह यत्कर्मधर्माय न विरागाय कल्पते २

विरा३

भा० तृ० स्वकृतमनुशोचंत्याह ॥ इंद्रियार्थेष्विति चतुर्भिः ॥ मे मायापरं भावं तत्त्वं ब्रह्मविदिति ॥ ५४ ॥ प्रसंगः कथमभया
१०० स्तु तत्राह संग इति अधिया अज्ञानेन ॥ ५५ ॥ स्वभावतः प्रवृत्तं यस्य कर्म धर्मार्थं न कल्पते धर्माभिमुखं न भवे
त् ॥ तत्रापि कामधर्मा [illegible] द्वारागायन कल्पते तद्वा वा च तीर्थपदस्य हरेः सेवार्थं न पर्यं यस्येदित्य

इंद्रियार्थेषु सज्जंत्या प्रसंगस्त्वयि मे कृतः ॥ अजानंत्या परं भावं तथाप्यस्त्वभयाय मे ॥ ५४ ॥ संगो
यः संसृतेर्हेतुरसत्सु विहितोधिया ॥ स एव साधुषु कृतो निःसंगत्वाय कल्पते ॥ न तीर्थपदसेवायै जी
वन्नपि मृतो हि सः ॥ ५६ ॥ साहं भगवतो नूनं वंचिता मायया दृढं ॥ यत्त्वां विमुक्तिदं प्राप्य न मुमुक्षेय ब
धनात् ॥ ५७ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे त्रयोविंशतितमोध्यायः ॥ २३ ॥ श्रीमैत्रेय
उवाच ॥ निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः ॥ दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् ॥ १ ॥ ऋषि
रुवाच ॥ माखिदो राजपुत्रीत्थमात्मानं प्रत्यनिंदिते ॥ भगवांस्तेक्षरो गर्भमदूरात्संप्रपत्स्यते ॥ २ ॥

धेः ॥ ५६ ॥ न मुमुक्षेय मोक्तुमिच्छां न कृतवत्यस्मि ॥ ५७ ॥ इति तृतीये त्रयोविंशः ॥ २३ ॥ चतुर्विंशे ततो जन्म कपि
लस्याह तत्पितुः ॥ प्रव्रज्यतमनुज्ञाप्य स्वर्णत्रयविमोक्षतः ॥ शालिनी श्लाघ्या शुक्लो नोभिव्याहृतं स हाहं त्वां प्र
कल्पयेत्यादि ॥ १ ॥ इत्थं माखिदः खेदमाकार्षीः आत्मानं प्रत्यहं भाववहीनेति ॥ अदूरात् शीघ्रम् ॥ २ ॥ ॥ ॥ १००

अतः अनंतरमेव सद्यः एकस्मिन्नेवाहनि चारुसर्वांग्यः सर्वावयवशोभनाः ४८ प्रव्रजिष्यंतं आलक्ष्य विज्ञाय स्मयमाना
बहिः अंतस्तु विक्लवेन व्याकुलेन विदूयता संतप्यमानेन हृदयेन उवाच इत्युत्तरेणान्वयः नखा एव मणयः तैः श्रीः शो
भा यस्य तेन पदा भुवं लिखंतीति दुरंते चिंतालक्षणं ५० अपि उवाह संपादितवान् अभयमिति भाविनो दैन्यादिनसंसा

अथ सा सुषुवे सद्यो देवहूतिः स्त्रियः प्रजाः सर्वास्ताश्चारुसर्वांग्यो लोहितोत्पलगंधयः ४९ पतिं
सा प्रव्रजिष्यंतं तदालक्ष्योशती सती स्मयमाना विक्लवेन हृदयेन विदूयता लिखंत्यधोमुखी भूमिं
पदा नखमणिश्रिया उवाच ललितां वाचं निरुध्याश्रुकलां शनैः ५० सर्वं तद्भगवान्मह्यमुपोवाह प्र
तिश्रुतं अथापि मे प्रपन्नाया अभयं दातुमर्हसि ५१ ब्रह्मन्दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः क
श्चित्स्यान्मे विशोकाय त्वयि प्रव्रजिते वनं ५२ एतावतालं कालेन व्यतिक्रांतेन मे प्रभो इंद्रियार्थप्रसं
संगेन परित्यक्तपरात्मनः ५३

रभयाद्भयं तन्निवर्तयेत्यर्थः ५१ तत्र दैन्यं निवेदयति तुभ्यं तव दुहितृभिः
स्वयमेवात्मनः समा योग्याः पतयो विमृग्याः इति दैन्यं प्राप्य संसारभयमुररीकृत्याह कश्चिदिति विशोकाय ज्ञानोपदेशा
य त्रिभिः स्मरणेन पाकरणत किंचित्कालं त्वदवस्थानेन ब्रह्मवित्पुत्रः कश्चित्किं स्यादित्यर्थः ५२ विषयान्भुक्त्वा
किं ब्रह्मविद्ययेति चेत्तत्राह एतावतालं पूर्यतां परित्यक्तः परः आत्मा यया तस्या मम ५३ ॥ ५५ ॥ ५

भा०तृ० आगत्य किं कृतवान् तदाह भगवंतमिति द्वाभ्यां तत्वानां संख्यानं यस्मिन् तस्य सांख्यस्य विज्ञप्त्यै विशेषेण ज्ञापनाय भगवं
१०१ तं जातं विद्वान् अजो ब्रह्मा स्वराट् स्वतःसिद्धज्ञानः तस्य चिकीर्षितं सभाजयन् प्रहृष्यमाणैरसुभिरिंद्रियैरुपल
क्षितः कर्दमं चेदमभ्ययादिति द्वयोरन्वयः चकारादेवहूतिं च १० तत्र त्वयेति पंचभिः कर्दमं प्रत्याह अपचितिः पू

भगवंतं परं ब्रह्म सत्वेनांशेन शत्रुहन् तत्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् सभाजयन्
विशुद्धेन चेतसा तच्चिकीर्षितं प्रहृष्यमाणैरसुभिः कर्दमं चेदमभ्ययात् ॥१०॥ ब्रह्मोवाच ॥ त्वया मे
पचितिस्तात कल्पिता निर्व्यलीकतः यन्मे संजगृहे वाक्यं भवान्मानद मानयन् ॥११॥ एतावत्येव
शुश्रूषा कार्या पितरि पुत्रकैः बाढमित्यनुमन्येत गौरवेण गुरोर्वचः १२ इमा दुहितरः सभ्य तव
वत्स सुमध्यमाः सर्गमेतं प्रभावैः स्वैर्बृंहयिष्यंत्यनेकधा १३ अतस्त्वमृषिमुख्येभ्यो यथाशीलं
यथारुचि आत्मजाः परिदेह्यद्य विस्तृणीहि यशो भुवि १४ वेदाहमाद्यं पुरुषमवतीर्णं स्वमा
यया भूतानां सेवधिं देहं बिभ्राणं कपिलं मुने १५

जा कृता यद्यस्मान्निष्कपटं सम्यग्गृहीतवान् ११ अनुमन्यतेति यत् एतावत्येव १२ अनेकधा प्रभावैः स्वैः बृंहयि श्री
ष्यंति १३ ऋषिमुख्येभ्यो मरीच्यादिभ्यः १४ पुनस्तु साक्षादीश्वर इत्याह वेदाहमिति सेवधिं निधिं सर्वाभीष्टदं

१०१

दमेन इंद्रियसंयमेन स्वधर्मेण तपांसि द्रविणदानानि च तैः ३ हृदयग्रंथिं चिज्जडात्मकं अहंकारलक्षणं बंधं
छेत्स्यति औदर्यः पुत्रः सन् ब्रह्म भावयति उपदिशतीति तथा ४ श्रद्धाय विश्वस्य ५ बहुतिथे च बहुतरे कालेऽतिक्रां

धृतव्रतासि भद्रं ते दमेन नियमेन च तपोद्रविणदानैश्च श्रद्धया चेश्वरं भज ३ स त्वयाराधितः शुक्लो
वितन्वन्मामकं यशः छेत्ता ते हृदयग्रंथिमौदर्यो ब्रह्मभावनः ॥ ४ ॥ श्रीमैत्रेय उवाच ॥ देवहूत्यपि सं
देशं गौरवेण प्रजापतेः सम्यक् श्रद्धाय पुरुषं कूटस्थमभजद्गुरुं ५ तस्यां बहुतिथे काले भगवान्म
धुसूदनः कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारुणि ६ अवादयंस्तदा व्योम्नि वादित्राणि घनाघनाः
गायंति तं स्म गंधर्वा नृत्यंत्यप्सरसो मुदा ७ पेतुः सुमनसो दिव्याः खेचरैरपवर्जिताः प्रसेदुश्च दि
शः सर्वा अंभांसि च मनांसि च ८ तत्कर्दमाश्रमपदं सरस्वत्या परिश्रितं स्वयंभूः साकमृषिभि
मरीच्यादिभिरभ्ययात् ९

ते ६ घनाघना इत्येकं पदम् वर्षंतो मेघाः गायंति स्म नृत्यंति स्म ७
अपवर्जिताः मुक्ताः ८ परिश्रितं वेष्टितम् ९ श्रीहरये परमात्मने नमो नमः राम राम राम राम राम राम

८४

निमंत्र्य एष्ठानंदिहर्षप्राप्ताः संतः २३ स च मुनिः त्रियुगं विष्णुं विविक्ते रहसि २४ पापच्यमानानां भ्रंशं दह्यमानानां नि
रये संसारे स्वैरमंगलैः पापैः २५ कुतः सर्वा देवता प्रसन्ना इति तत्राह अलभ्यलाभादित्याह द्वाभ्यां बहुभुजन्मसु वि
पक्वेन सुसिद्धेन सम्यग्योगो भक्तियोगः तस्मिन्समाधिरैकाग्र्यं तेन शून्यागारेषु विविक्तस्थानेषु यस्य तव पदं हेल
नमवज्ञां लाघवं गुरोणप्यगणयित्वा उपचितमेव तत्तदेतदित्याह यस्त्वं स्वानां भक्तानां पक्षं पुष्णासीति तथा सः २६

ततस्तमृषयः क्षत्तः कृतदारान्निमंत्र्य तं प्रतिष्ठन्नंदिमापन्नाः स्वंस्वमाश्रममंडलं २३ स चा
वतीर्णं त्रियुगमाज्ञाय विबुधर्षभं विविक्त उपसंगम्य प्रणम्य समभाषत २४ अहो पापच्यमाना
नां निरये स्वैरमंगलैः कालेन भूयसा नूनं प्रसीदंतीह देवताः २५ बहुयोगविपक्वेन सम्यग्योगसमा
धिना द्रष्टुं यतंते यतयः शून्यागारेषु यत्पदं सेरवं भगवानद्य हेलनं नगणयन्नः मद्गृहं जातो ग्राम्या
णां यः स्वानां पक्षपोषणः २६ स्वीयं वाक्यमृतं कर्तुमवतीर्णोऽसि मे गृहे चिकीर्षुर्भगवान्ज्ञानं भक्ता
नां मानवर्धनः २७ तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव यानियानि च रोचंते स्वजनानामरूपिणः २८

एतत्प्रपंचयति द्वाभ्यां स्वयमेवावतीर्णोऽसि स्ववाक्यं तव पुत्रो भविष्यामीति यत् तत्सत्यं कर्तुं ज्ञानं ज्ञानसाधनं सांख्यं
च विचिकीर्षुः सन् २७ यानि तवालौकिकानि चतुर्भुजादिरूपाणि तान्येव तेऽभिरूपाणि योग्यानि यानि च स्वजनानां रोचंते म
नुष्यरूपाणि तान्यपि ते रोचंते इत्यर्थः स्वरूपिणः प्राकृतरूपरहितस्य २८

देवहूतिं प्रत्याह त्रिभिः ज्ञानं शास्त्रोक्तं विज्ञानमपरोक्षं ते एव योग उपायस्तेन कर्मणां जटा मूलानि वासना उद्धरन्
उत्पाटयिष्यन् पद्ममुद्रायुक्ते पदाम्बुजे यस्य हे मानवि अविद्यास्वरूपाज्ञानं संशयाभिध्यासज्ञानानि तन्मयं तत्र हृद
यग्रंथिं १६ सुसंमतः सुरजितः संवर्गतो प्राप्स्यति १७ कुमारैः सहेति शेषः सहनारदः सनारदः सहितश्च मरीच्यादि

ज्ञानविज्ञानयोगेन कर्म्मणामुद्धरन् जटाः हिरण्यकेशः पद्माक्षः पद्ममुद्रापदाम्बुजः एष मानवि ते ग
र्भं प्रविष्टः कैटभार्दनः अविद्यासंशयग्रंथिं छित्वा गां विचरिष्यति १६ अयं सिद्धगणाधीशः सांख्याचा
र्यैः सुसंमतः लोके कपिल इत्याख्यां गंता ते कीर्तिवर्द्धनः ॥१७॥ श्रीमैत्रेय उवाच ॥ तावाश्वास्य जगत्स्रष्टा
कुमारैः सहनारदः हंसो हंसेन यानेन त्रिधामपरमं ययौ ॥१८॥ गते शतधृतौ क्षत्तः कर्दमस्तेन चोदितः य
थाचितं स्वदुहितॄः प्रादाद्विश्वसृजां ततः १९ मरीचये कलां प्रादादनसूयामथात्रये श्रद्धामंगिरसेयच्छ
त्पुलस्त्याय हविर्भुवं २० पुलहाय गतिं युक्तां क्रतवे च क्रियां सतीं ख्यातिं च भृगवेयच्छद्वसिष्ठाया
प्यरुंधतीं २१ अथर्वणे ददौ शान्तिं यया यज्ञो वितन्यते विप्रर्षभान्कृतोद्वाहान्सदारान्समलालयत् २२

नविवाहार्थमवस्थाप्य नैष्ठिकेतरैस्तिपंचभिः सहितो हंसो ब्रह्मा ययौ त्रिधाम स्वर्गः तस्य परां काष्ठां सत्यलोकं १८ श
तधृतौ ब्रह्मणि १९ २० युक्तां योग्यां अयच्छत् अदात् २१ वितन्यते समृद्धः क्रियते शान्त्यधिष्ठात्री देवतामित्यर्थः सम

लालयन्संतोषितवान् २२

भा० तृ० अहं तावद्ज्ञानोपदेशायैव त्वद्गृहेऽवतीर्णः अतस्त्वद्गृह एव सतोऽपि मुक्तिः सुलभैव यद्यवश्यं गंतव्यमेवेत्याग्रहः
१०३ तथापि मामेवानुस्मरन् गच्छेत्याशयेनाह पर्यन्तेति षड्भिः सत्य लौकिके वैदिके लौकिके च कृत्ये ऽवोक्तस्य प्रामाण्यमभिद
र्शयति यद्यस्मात्त्वं भयं तव पुत्रो भविष्यामीत्यवोचं अथ अतएव अनंतरमृतं यथा भवति तथा मया जनि जन्म स्वीकृतं ३२
दुराशयात् लिंगात् मुमुक्षूणां मुनीनामात्मदर्शने संमताय तत्त्वानां संख्यानाय विद्धीत्युत्तरस्यानुषंगः ३३ नन्वय

श्रीभगवानुवाच॥ मयाप्रोक्तं हि लोकस्य प्रमाणं सत्य लौकिके अथाजनि मया तुभ्यं यदवोचमृतं मुने ३२
एतन्मे जन्म लोकेऽस्मिन्मुमुक्षूणां दुराशयात् प्रसंख्यानाय तत्त्वानां संमतायात्मदर्शने ३३ एष आत्मपथोऽ या २ २५
व्यक्तो नष्टः कालेन भूयसा। तं प्रवर्तयितुं देहमिमं विद्धि मया भृतं ३४ गच्छ कामं मयाऽऽपृष्टो मयि संन्यस्तक
र्मणा॥ जित्वा सुदुर्जयं मृत्युममृतत्वाय मां भज ३५ मामात्मानं स्वयंज्योतिः सर्वभूतगुहाशयं आत्मन्येवा
त्मनान्वीक्ष्य विशोकोऽभयमृच्छसि ३६

आत्मज्ञानमार्गः एवं सिद्ध एव नेदानीमपूर्वं वर्त्म वर्तनीयमत आह एव इति अव्यक्तः सूक्ष्मः ३४ कामं यथेष्टं आपृष्टः
अनुज्ञातः यद्वा यथा त्वं गतमापृष्टवान् तथाऽत्रावस्थातुं मया त्वमापृष्ट इत्यर्थः मयि संन्यस्तेन समर्पितेन कर्मणा
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत इति श्रुतेः ३५ ततश्च मां परमात्मानं आत्मनि स्वस्मिन् आत्मना मन
सान्वीक्ष्य मारोऽभयं मोक्षं प्राप्स्यसि ३६ १०३

अभिवादार्हं पादपीठं यस्य ऐश्वर्यादिभिः पूर्तं पूर्णं २९ ऐश्वर्यादिकं विवृण्वन्नाह परं परमेश्वरं तत्र हेतुः
छंदः स्वाधीना शक्तिर्यस्य तपो यस्य तामेवाह प्रधानं प्रकृतिरूपं पुरुषं तदधिष्ठातारं महांतं महत्तत्त्वरूपं
कालं तेषां क्षोभकं कविं सर्वज्ञं त्रिवृतं अहंकाररूपं लोकात्मकं तत्पालत्वात्तत्मकं च तदेवं मायया प्रधानादिरूपत्व
मुक्त्वा चिच्छक्त्या निष्प्रपंचतामाह आत्मानुभूत्या चिच्छक्त्या अनुगतः स्वस्मिन्लीनः प्रपंचो यस्य तं कविं सर्व

तं सूरिभिस्तत्वबुभुत्सयाद्धा सदाभिवादार्हणपादपीठं ऐश्वर्यवैराग्ययशोवबोधवीर्यश्रिया
पूर्तमहं प्रपद्ये २९ परं प्रधानं पुरुषं महांतं कालं कविं त्रिवृतं लोकपालं आत्मानुभूत्यानुग
तप्रपंचं स्वच्छंदशक्तिं कपिलं प्रपद्ये ३० अस्माभिः पृच्छेद्य पतिं प्रजानां त्वयावतीर्णर्णउता
प्तकामः परिव्रजत्पदवीमास्थितोहं चरिष्ये त्वां हृदि युंजन्विशोकः ३१

सर्वज्ञं प्रधानाद्याविर्भावलयसाक्षिणमित्यर्थः ३० संन्यासानुज्ञां प्रार्थयते अस्माभिः पृच्छे यत्किंचिदभि
भा प्रेतमित्यर्थः त्वया पुत्ररूपेणावतीर्णानि ऋणानि देवादिरूपाणि यस्य सः आप्तकामश्चाहं परि
व्रजतां संन्यासिनां पदवीं मार्गमाश्रितः सन् त्वां युंजन् स्मरन् विचरिष्यामि ३१

भा० त० १०४ तदेयं तेन भागवती गतिः प्राप्ता स एव तां गतिं प्राप्त इति ॥ ४४ ॥ इति तृतीये चतुर्विंशः ॥ २४ ॥ पंचविंशे जनन्यात्
एषो वंधविमोचनं आह वाह परं भक्तिलक्षणं कपिलोक्तं: कपिले न पिता मात्वेगृह भावनियंता योगमार्गि
कामं जूषा स्फुटमुद्दाघ्रते धुनो. उक्तानुवादपूर्वकं कपिल योगं पृच्छति कपिल इति त्रिभिः तत्वानां संख्याता गु
णेकः सांख्यप्रवर्तक इत्यर्थः अज एव स्वयं जातः आत्मप्रज्ञप्तये आत्मज्ञापनाय १ पुंसां मध्ये वर्ष्मणः

दृष्ट्या द्वेषविहीनेन सर्वत्र सम चेतसा भगवद्भक्तियुक्तेन प्राप्ता भागवती गतिः ॥ ४४ ॥ इति श्रीमद्भा
गवते महापुराणे तृतीयस्कंधे कर्दमप्रव्रज्यं चतुर्विंशतितमोऽध्यायः ॥ २४ ॥ शौनक उवाच ॥ कपिल
स्तत्वसंख्याता भगवानात्ममायया जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणां १ न ह्यस्य व
र्ष्मणः पुंसां वरिम्णः सर्वयोगिनां विश्रुतौ श्रुतदेवस्य भूरि तृप्यंति मेऽसवः २ यद्यद्विधत्ते भग
वान्स्वच्छंदात्मात्ममायया तानि मे श्रद्दधानस्य कीर्तन्यान्यनुकीर्तय ३ न्यासः १

वृद्धस्य उत्तमस्येत्यर्थः सर्वयोगिनां मध्ये वरिम्णः वरस्य भावो वरिमा भवति प्रधानोऽयं निर्देशः वरिष्ठस्येत्यर्थः वि
श्रुतौ कीर्तौ असवः इंद्रियाणि अलं न तृप्यंति श्रुतेन श्रवणेन दीव्यति द्योतते इति तत्पात्रस्य यद्वा भूरिवहुशः श्रुतो देवो य
न तस्यापि मे असवः इति संवंधः २ स्वानां छंदेन इच्छया आत्मा वै होयस्य सः यद्यत्कर्म विधत्ते तानि कर्माणि कीर्तनार्हा
णि अनुकीर्तय ३ १०४

मात्रेदेवहूत्यै शमनीं उन्मूलिनीं भयंअतिसीघ्रंनतरिष्यति परमानंदंचप्राप्स्यतीतिचकारार्थः ३७ समुदितः सम्यगु
क्तःसन् तंप्रदक्षिणीकृत्य ३८ मुनीनांव्रतंमौनंहिंसालक्षणं ३९ सदसतःपरं यत्तस्मिन्ब्रह्मणिगुणावभासके
निर्गुणेएकभक्त्या अव्यभिचारिण्याभक्त्याअनुभाविते अपरोक्षीकृते ४० अतोदेहादिष्वहंकारादिरहितः अत

मात्रेआध्यात्मिकींविद्यांशमनींसर्वकर्मणां वितरिष्येययाचासौभयंचातितरिष्यति ३७ श्रीमैत्रे
यउवाच ॥ एवंसमुदितस्तेनकपिलेनप्रजापतेः दक्षिणीकृत्यतंप्रीतोवनमेवजगामह ३८
व्रतंसआस्थितोमौनमात्मैकशरणोमुनिः निःसंगोव्यचरत्क्षोणीमनग्निरनिकेतन ३९ म
नोब्रह्मणियुंजानोयत्तत्सदसतःपरं गुणावभासेविगुणएकभक्त्यानुभाविते ४० निरहंकृति
र्निर्ममश्चनिर्द्वंद्वःसमदृक्स्वदृक् प्रत्यक्प्रशांतधीर्धीरःप्रशांतोर्मिरिवोदधिः ४१ वासुदेवेभ
गवतिसर्वज्ञेप्रत्यगात्मनि परेणभक्तिभावेनलब्धात्मामुक्तबंधनः ४२ आत्मानंसर्वभूतेषु
भगवंतमवस्थितं अपश्यत्सर्वभूतानिभगवत्यपिचात्मनि ४३

एवंनिर्द्वंद्वः शीतोष्णाद्यनाकुलः समदृ
क्भेदाग्राहकः किंतुस्वदृक्स्वमेवपश्यन्प्रत्यक्प्रचरणात्प्रशांताविक्षेपरहिताधीर्यस्य ४१ तदेवंविधं कल्पि
तोपाधिनिवृत्तिमुक्त्वापरमेश्वरपदप्राप्तिमाह वासुदेवइतित्रिभिः प्रतीचोजीवस्यात्मनिलब्धमात्माचित्तंयेन

यतःमुक्तंबंधनमज्ञानंयस्य ४२ लब्ध्वात्मतामाह
आत्मानमिति ४३

भा॰ तृ॰ प्रकृतेःपुरुषस्यचाजिज्ञासयात्वामहंशरणंगतास्मिनमामीत्यन्वयः कुठारं छेत्तारं ११ अपवर्गवर्द्धनं मोक्षरति
१०५ जनकं ईषत्स्मितेनशोभितमाननंयस्य १२ आध्यात्मिकः आत्मनिष्ठः यत्रयस्मिन् १३ १४ तत्रसर्वांगैर्नैपुण्यं
चित्तसंयमाधीनमितिदर्शयन्नाह चेतइति अस्मात् मनोजीवस्यगुणेषुविषयेषुपुंसिपरमेश्वरेवाशक्तंतुशद्धेर्य
तंत्वागताहंशरणंशरण्यंस्वभृत्यसंसारतरोःकुठारं जिज्ञासयाप्रकृतेःपुरुषस्यनमामिसद्धर्म
विदांवरिष्ठं ११ श्रीमैत्रेयउवाच इतिस्वमातुर्निरवद्यमीप्सितंनिशम्यपुंसामपवर्गवर्द्धनं धिया
भिनंद्यात्मवतांसतांगतिर्बभाषईषत्स्मितशोभिताननः १२ श्रीभगवानुवाच योगआध्यात्मिकः
पुंसांमतोनिःश्रेयसायमे अत्यंतोपरतिर्यत्रदुःखस्यचसुखस्यच १३ तमिमंतेप्रवक्ष्यामियमवोचं
पुरानघे ऋषीणांश्रोतुकामानांयोगंसर्वांगनैपुणं १४ चेतःखल्वस्यबंधायमुक्तयेचात्मनोमतं
गुणेषुसक्तंबंधायरतंवापुंसिमुक्तये १५ अहंममाभिमानोत्थैःकामलोभादिभिर्मलैः वीतंय
दामनःशुद्धमदुःखमसुखंसमम् तदापुरुषमात्मानंकेवलंप्रकृतेःपरं निरंतरंस्वयंज्योतिरणि
मानमखंडितं ज्ञानवैराग्ययुक्तेनभक्तियुक्तेनचात्मना परिपश्यत्युदासीनंप्रकृतिंचहतौजसं श्रीरामजी
१५ तथाचचित्तसंयमेपुरुषार्थसिद्धिस्तद्दर्शयति अहमितित्रिभिः मलैर्वीतंविरहितंयदाशुद्धंमनो १६
भवति मनःशुद्धिज्ञापकमाह अदुःखमितिनिरंतरंनिर्भेदं अणिमानंसूक्ष्मं अखंडितमपरिच्छिन्नं हतौजसंक्षी १०५

यथा त्वं मां प्रचोदयसि । एवं प्रचोदितः सन् तथा तत्प्रश्नानुसारेण आन्वीक्षिक्यां आत्मविद्यायां ४ बिंदुसरे बिंदुसर
सि ५ तत्वमार्गस्याग्रं पारं दर्शयतीति तथा एवं मानवि तेगर्भे प्रविष्ट इत्यादि धातुर्वचः ६ असतामिंद्रियाणां तर्षणा
त् विषयाभिलाषात् । निर्विण्णास्मि तास्मि येन संभाव्यमानेन पूर्यमाणेन ७ पारं गमयतीति पारगं त्वमेव श्रेष्टं चक्षुर्मे

सूत उवाच ॥ द्वैपायनसखस्त्वेवं मैत्रेयो भगवांस्तथा । प्राहेदं विदुरं प्रीत आन्वीक्षिक्यां प्रचोदितः ४
श्रीमैत्रेय उवाच ॥ पितरि प्रस्थितेऽरण्यं मातुः प्रियचिकीर्षया । तस्मिन्बिंदुसरेऽवात्सीद्भगवान्कपिलः कि
लः ५ तमासीनमकर्माणं तत्वमार्गाग्रदर्शनं । स्वसुतं देवहूत्याह धातुः संस्मरती वचः ६ ॥ देवहू
तिरुवाच ॥ निर्विण्णा नितरां भूमन्नसदिंद्रियतर्षणात् । येन संभाव्यमानेन प्रपन्नांधं तमः प्रभो ॥ ७ तस्य
त्वं तमसोंधस्य दुष्पारस्याद्य पारगं सच्चक्षुर्जन्मनामंते लब्धं मे त्वदनुग्रहात् ८ य आद्यो भगवा
न्पुंसामीश्वरो वै भवान्किल लोकस्य तमसांधस्य चक्षुः सूर्य इवोदितः ९ अथ मे देव संमोहमपाक्र
ष्टुं त्वमर्हसि योऽवग्रहोऽहं ममेतीत्येतस्मिन्योजितस्त्वया १०

यात् लब्धं त्वदनुग्रहाज्जन्मनामंते भाव्ये सति ८ तत्प्रपंचयति य इति स भगवान् चक्षूरूप उदितः सूर्यो यथा ९
अपाकृष्टुं अपनेतुं कोसौ संमोहः एतस्मिन् देहादौ त्वयैव योजितो योऽहं ममेत्यवग्रहः आग्रहः द्वितीय इति शब्द
स्तु कार्यरोगादिग्रहणार्थः १०

भा० तृ० ततः किमत आह भक्त्येति मम चरणसेवया आदिलीलानस्य अनुचिंतनया तया ऐंद्रियाज्ज्ञातविरागः सुखः सन् दृ-
१०६ ष्टश्रुतान् ऐहिकामुष्मिकात् ततः यतः उद्युक्तः सन् चित्तस्य ग्रहणे यतिष्यते ऋजुभिः भक्तिप्रधानत्वादना-
यासैः २२ तदेवं प्रकृतेर्गुणानामसेवया ज्ञानादिभिश्च अयं जीवः देहे वर्तमानो मामवरुंधे प्राप्नोति २३ काचिदिति कादि

भक्त्या पुमान् जातविराग ऐंद्रियात् दृष्टश्रुतान्मद्रचनानुचिंतया चित्तस्य यत्तो ग्रहणे योगयुक्तो
यतिष्यते ऋजुभिर्योगमार्गैः २२ असेवयायं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृंभितेन यो-
गेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मानमिहावरुंधे २३ ॥ देवहूतिरुवाच ॥ काचित्त्वय्युचिता भ-
शांति क्तिः कीदृशी मम गोचरा यया पदं ते निर्वाणमंजसान्वाश्नवामहम् २४ यो योगो भगवद्बाणो
निर्वाणात्मंस्त्वयोदितः कीदृशः कति चांगानि यतस्तत्त्वावबोधनं २५ तदेतन्मे विजानीहि
यथाहं मंदधीर्हरे सुखं बुध्येय दुर्बोधं योषा भवदनुग्रहात् २६

दित्यर्थः तत्रापि मम स्त्रियाः कीदृशी गोचरा योग्या निर्वाणं मोक्षात्मकं तव पदं स्वरूपं अन्वाश्नवै अनंत-
रमेव सर्वात्मना प्राप्स्यामि अंजसा त्विति पाठे अहं त्विति संबंधः २४ भगवद्बाणः यो भगवंतं लक्षीक-
रोतीत्यर्थः यतः यस्माद्योगात् २५ विजानीहि विशेषेण ज्ञापय सुखं अनायासेन २६ १०६

मनः शुद्धो च भक्तिरेवांतरंगसाधनमित्याह नेति १७ अस्य सर्वस्यापि सत्संगो मूलमित्याह प्रसंगमिति
अपावृतं निरावरणं १८ साधूनां लक्षणमाह तितिक्षव इति चतुर्भिः साधवः शास्त्रानुवर्त्तिनः साधुसुशी
लत्वं देव भूषणं येषां एतान् तापा आध्यात्मिकादयो न तपंति न व्यथयंति कुतः मद्गतचेतो येषां तान् येतापे

नयुज्यमानयाभक्त्याभगवत्यखिलात्मनि सदृशोऽस्ति शिवः पंथा योगिनां ब्रह्मसिद्धये १७
प्रसंगमजरं पाशमात्मनः कवयो विदुः स एव साधुषु कृतो मोक्षद्वारमपावृतं १८ तितिक्षवः
काहणिकाः सुहृदः सर्वदेहिनां अजातशत्रवः शांताः साधवः साधुभूषणाः मय्यनन्येन
भावेन भक्तिं कुर्वन्ति ये दृढां मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबांधवाः मदाश्रयाः कथा मृष्टाः शृ
ण्वंति कथयंति च तपंति विविधास्तापा नैतान्मद्गतचेतसः त एते साधवः साध्वि सर्वसंगवि
वर्जिताः १९ संगस्तेष्वथ ते प्रार्थ्यः संगदोषहरा हि ते २० सतां प्रसंगान्मम वीर्यसंविदो भवंति
हृत्कर्णरसायनाः कथाः तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति २१

नाभिभूयंते साधव इत्यर्थः १९ २० तत्संगस्य भक्त्यंगतामुपपादयति सतामिति वीर्यस्य सम्यग्विदनं यासु
ताः वीर्यसंविदः हृत्कर्णयो रसायनाः सुखदास्ताः ताजोषणात् सेवनात् अपवर्गः विद्याविनिवृत्तिर्वर्त्मयस्मिन् ह

प्रथमं श्रद्धा ततो रतिः ततो भक्तिः अनुक्रमिष्यति क्रमे
ण भविष्यति २१

रति १

था ४

भा० त०
१०७

प्रसन्नानि वक्त्राण्यरुणानि लोचनानि च येषु तैर्मद्रूपैः साकं सह नित्यं परमेश्वरानुभवसुखं भक्तो वधिकमि
ति भावः ३० आत्मानंदस्तत्र स्वयं भावीत्याह तैरिति दर्शनीया मनोहराः अवयवा मुखनेत्रादयो येषु तैः हृ
त आत्मा चित्तं येषां हृतो आकृष्टाः प्राणा इंद्रियाणि येषां तान् भजतः अनिच्छतः इच्छाहीनानपि अगती
गतिं मुक्तिं प्रयुंक्ते प्रापयति कैः साधनैर्हृतात्मनः उदारैर्विलासादिभिः तत्र विलासो लीला वामं मनोह

पश्यंति ते मे रुचिराण्यवंतु संतः प्रसन्नवक्त्रारुणलोचनानि रूपाणि दिव्यानि वरप्रदानि साकं वा
चं स्पृहणीयां वदंति ३० तैर्दर्शनीयावयवैरुदारविलाससहासेक्षितवामसूक्तैः हृतात्मनो हृ
तप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुंक्ते ३१ अथो विभूतिं मम मायया चितामैश्वर्य
मष्टांगमनुप्रवृत्तं श्रियं भागवतीं वा स्पृहयंति भद्रां परस्य मे ते श्नुवते तु लोके ३२

रसूक्तं मधुरभाषणम् ३१ विभूत्याधिकं च तत्राधिकमित्याह अथो अविद्यानिवृत्त्यनंतरं विभूतिं
सत्यलोकादिगतां भोगसंपत्तिं अणिमाद्यष्टांगमैश्वर्यं अनुप्रवृत्तं भक्तिमनुस्वतः एव प्राप्तामपि भा
गवतीं च श्रियं च वैकुंठस्थां संपत्तिं अस्पृहयंति न यद्यपि न स्पृहयंतीत्यर्थः तथापि तु लोके वैकुंठे अश्नुव
ते प्राप्नुवंत्येव ३२

१०७

इत्थं मातुरर्थं प्रयोजनं विदित्वा जातस्नेहस्तत्र हेतुः यत्र यस्यां तन्वा देहेना विर्भूतिः तत्वोन्याम्नायंते अनुक्रम्यंते येय
स्मिन् रकिंतन्नु यत्सांख्यं प्रवदंति तत्प्रोवाच भक्तिवितानं च योगं च २७ कोचित्वेष्युचिता भक्तिरिति पृष्टामुत्तमां भ
क्तिं लक्षयति गुणाः विषयाः लिंग्यंते ज्ञायंते यैस्तेषां देवानां द्योतनात्मनामिंद्रियाणां तदधिष्ठातृणां वा सत्वे सत्वमूर्त्तौ ह
रावेव या वृत्तिः सा भक्तिः सिद्धेर्मुक्तेरपि गरीयसीत्युत्तरेणान्वयः कथंभूता अनिमित्ता निष्कामा स्वाभाविकी अयत्न
सिद्धा तेषां (द्विताः शुद्धसत्वस्येत्यर्थः मुक्तिश्च प्रासंगि) मेवंविधत्वे हेतुमाह गुरोरुच्चारणमनुश्रूयत इत्यनुश्रवो वे

श्रीमैत्रेय उवाच ॥ विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाभिजातः तत्वाम्नायं यत्प्रवदंति सांख्यं
प्रोवाच वै भक्तिवितानयोगं ॥२७॥ श्रीभगवानुवाच ॥ देवानां गुणलिंगानामानुश्रविककर्मणां सत्व
एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥ अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी जरयत्याशु या
कोशं निगीर्णमनलो यथा ॥२८ नैकात्मतां मे स्पृहयंति केचिन्मत्पादसेवाभिरता मदीहाः ये
न्योन्यतो भागवताः प्रसज्य सभाजयंते मम पौरुषाणि २९

दः तद्विहितमानुश्रविकं तदेव कर्म येषां अ
एव एकं एकरूपं अविकृतं मनो यस्य पुंसः शुद्धसत्वस्येत्यर्थः मुक्तिश्च प्रासंगिकी भवत्येवेत्याह या भक्तिः कोशं लिं
गशरीरं जरयति स्वप्रलंबिनेव सिद्धौह ष्टांतः निगीर्णं भुक्तं अन्नं अनलो जाठरो यथा जरयतीति २८ भक्तेर्गरिष्ठत्व
मेवोपपादयति नैकात्मतामिति पंचभिः एकात्मतां सायुज्यमोक्षं मदर्थमीहा क्रिया येषां प्रसज्य आसक्तिं कृत्वा पौ

टीकाभा०स्कं० ३ अ० २५

भा०तृ०
१०८

मद्भजनादेव मोक्ष इत्यत्र सदाचारं प्रमाणयति ज्ञानेति ॥ ४३ ॥ उपसंहरति ॥ एतावानिति मय्यर्पितं सन्म
नः ॥ स्थिरीभवतीति यत् एतावानेव ॥ ४४ ॥ इति तृतीये पंचविंशः ॥ २५ ॥ षड्विंशे पुंप्रकृत्योस्तु विवेकायापवर्गाय
मात्रे संख्यातं तद्व्याख्यास्य
ते संख्यानं सर्वभावानां जन्मलक्षणभेदतः धात्रा पुत्राय यत्प्रोक्तं तद्वै मित्रासुतेन यत्

ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः क्षेमाय पादमूलं मे प्रविशंत्यकुतोभयं ॥ ४३ ॥ एतावाने
व लोकेस्मिन् पुंसां निःश्रेयसोदयः तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरं ॥ ४४ ॥ इति श्रीमद्भागव
ते महापुराणे तृतीयस्कंधे कापिलेये भक्तियोगः पंचविंशतितमोध्यायः ॥ २५ ॥ श्रीभगवानुवाच ॥ अथ
ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक् यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः १ ज्ञानं
निःश्रेयसार्थाय पुरुषस्यात्मदर्शनं यदाहुर्वर्णये तत्ते हृदयग्रंथिभेदनं २

ध्यानेनाहृततत्त्ववित् तत्त्वाम्नायं यत्प्रवदंति सांख्यमित्यत्र सांख्यं भक्तियोगश्चेति त्रयमुद्दिष्टं तत्र भक्ति
मुक्ता इदानीं सांख्यमाह अथेति नानुमुक्तिः ... ज्ञानादेव नेदुतं तत्त्वलक्षणज्ञानात्तमेव विदित्वा अतिमृत्यु
मेतीति श्रुतेः अत आह ज्ञानमिति आत्मदर्शनरूपं ज्ञानं अत एव हृदयग्रंथिभेदनं अहंकारनिवर्तकं निःश्रे
यसप्रयोजनाय यदाहुः तत्ते वर्णयामि तत्त्वलक्षणादेव विविक्तात्मज्ञानं

भगवतीमागः ४
१०८

ननु एवं तर्हि लोकत्वाविशेषात् स्वर्गादिवत् तद्भोग्यानां कदाचिद्विनाशः स्यात्तत्राह हे शांतरूपे यद्वा शांतं
शुद्धसत्वं तद्रूपे वैकुंठे मत्पराः कदाचिदपि न नंक्ष्यंति भोग्यहीना न भवंति अनिमिषो मे हेतिः मदीयं काल
चक्रं च नो लेढि न ग्रसति तत्र हेतुः येषामिति सुतइवस्नेहविषयः सखेव विश्वासास्पदं गुरुरिवोपदेष्टा सु
हृदिव हितकारी इष्टं दैवमिव पूज्यः एवं सर्वभावेन मां ये भजंति तानयं कालचक्रं न ग्रसतीत्यर्थः ३८ एवं

न कर्हिचिन्मत्पराः शांतरूपे नंक्ष्यंति नो निमिषो लेढि हेतिः येषामहं प्रिय आत्मा सुतश्च स
खा गुरुः सुहृदो दैवमिष्टं ३८ इमं लोकं तथैवामुमात्मानमुभयायिनं आत्मानमनु ये चेह
ये रायः पशवो गृहाः विसृज्य सर्वानन्यांश्च मामेवं विश्वतोमुखं भजंत्यनन्यया भक्त्या तान्मृ
त्योरतिपारये ३९ नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात् आत्मनः सर्वभूतानां भयं तीव्रं निवर्तते
४० मद्भयाद्वाति वातोयं सूर्यस्तपति मद्भयात् वर्षतींद्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ४१ ।१ श्र

तां तु मुक्तिं एकांतभक्तेभ्यो ददामीत्याह इममिति द्वाभ्यां उभयायिनं लोकद्वयगामिनं आत्मानमनु ये पुत्रक
लत्रादयस्ते च पश्वादयः रायः धनानि अन्यांश्च परिग्रहान् मृत्योः संसारात् अतिपारये अतितारयामि ३९ अमत्तो
ऽन्यतो न कथंचिदपि मोक्ष इत्याह न मद्भगवतो मत्तो विना सर्वभूतानामात्मनः भगवदादिविशेषणत्रयेण सामर्थ्यं
निःक्षेपत्वं हितकारित्वं चोक्तं ४० एतदेव स्फुटयति मद्भयादिति श्रुतिश्च भीषास्माद्वातः पवते भीषोदेति सूर्य

परामिधानं प्रकृत्यध्यासः तेन प्रकृतेर्गुणैः कर्मसु क्रियमाणेषु कर्तृत्वमात्मनि मन्यते ६ तदिति कर्तृत्वमन
न्नमेवं अस्य पुरुषस्य साक्षिमात्रत्वादकर्तुरेव सतः (तेन प्रकृतेर्गुणैः) कर्मभिर्बंधः ईश्वरस्य अपरोक्षस्यैव कर्मबंध
कृतं भोगापारतंत्र्यं निर्वृत्तात्मनः सुखात्मकस्यैव संसृतिः जन्ममृत्युप्रवाहः प्रकृत्यविवेककृतमेतत्सर्वं भवती
त्यर्थः ७ ननु चैतन्यसामानाधिकरण्येनैव कर्तृत्वादिप्रतीतेस्तस्यैव तद्भोगः क्रियतां नेत्याह कार्येति शरीरं कारणं

एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ६ तदस्य सं
सृतिर्बंधः पारतंत्र्यं च तत्कृतं भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ७ कार्यकारणकर्तृ
त्वे कारणं प्रकृतिं विदुः भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम् ॥ देवहूतिरुवाच ॥ प्रकृतेः पु
रुषस्यापि लक्षणं पुरुषोत्तम ब्रूहि कारणयोरस्य सदसच्च यदात्मकम् ॥ ९ ॥

मिन्द्रियं कर्ता देवतावर्गः तस्य भावस्तत्ता पुरुषस्य प्रकृतिं कारणं विदुः कूटस्थस्य स्वतो विकाराभावात् प्रकृतिप
रिणामभूते देहाद्यहंकारकृतं कर्तृत्वादिकमित्यर्थः भोक्तृत्वे तु पुरुषं कारणं विदुरित्यस्यायं भावः यद्यप्यहंकारग
तमेव कार्यत्वादिकं भोक्तृत्वं च तथापि विकारस्य जडावसानत्वादुपाधिप्राधान्यं भोग्यस्य चिदवसानत्वादुपहितप्रा
धान्यमिति ८ तदेवं संसारिणं पुरुषं तद्धेतुं प्रकृतिं च ज्ञात्वेदानीं जगत्कारणमीश्वरं तत्प्रकृतिं च पृच्छति प्रकृतेरिति
अस्य विश्वस्य सदसच्च स्थूलं सूक्ष्मं च कार्यं यदात्मकं तयोः प्रकृतिपुरुषयोः ९

तत्र पुरुषं लक्षयति अनादिरिति आत्मैव पुरुषः कोऽसावात्मा प्रत्यक्प्रतिलोमं धाम स्फूर्तिर्यस्य तत्क्षणिक
पक्षं व्यावर्तयति प्रकृतेः परः अन्यः असंगः ज्ञानादिगुणत्वं वारयति निर्गुणः मीमांसकाद्यभिमतं ज्ञानविष
यत्वं वारयति स्वयंज्योतिः अनेन प्रभाकराभिमतं ज्ञानाधारत्वेन स्फुरणमपि निरस्तं स्वयंज्योतिष्ट्वे हेतुः
विश्वं येन समन्वितं प्रकाशितमिति शेषः एतैरेव हेतुभिः पुरुषस्य प्रकृतेः परत्वमपि सिद्धं ३ अत्रावरणवि
क्षेपशक्तिभेदेन प्रकृतिर्द्विविधा तत्रावरणशक्त्या सैव जीवोपाधिरविद्या विक्षेपशक्त्या सैव मायापरमेश्व

अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितं ३ स एष
प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः यदृच्छयैवोपगतामभ्यपद्यत लीलया ४ गुणैर्विचित्राः सृज
तीं स्वरूपाः प्रकृतिं प्रजाः विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ५ ॥ ऽऽ

श्वरी पुरुषश्च जीवेश्वररूपेण द्विविधः तत्र यः प्रकृत्यविवेकेन संसरति स जीवः यस्तु प्रकृतिं वशीकृत्य
विश्वस्य सृष्ट्यादि करोति सः परमेश्वरः तत्र प्रकृत्यविवेकेन जीवस्य संसारप्रकारमाह स एष इति पंचभिः सूक्ष्मां त्रि
वर्तिनीं दैवीं देवस्य विष्णोः शक्तिं लीलयोपगतां यदृच्छयैवाभ्यपद्यतेत्यन्वयः ४ तस्या लीलामाह गुणैरिति ज्ञानं गूह
यति आवृणोतीति ज्ञानगूहा तया तथा च श्रुतिः अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयंतीं स्वरूपाः अ

जो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः
इति मुमुहे आत्मानं न स्मृतवान् ५

+ ४ हेतुः अंतरीति तिरोषं समानं तद्देवं प्रकृतेश्चतुर्वि॰ शति तेदंजीवेश्वरयोश्चैक विवक्षा ध

भा०टी० सृष्टि हेतुत्वेन लक्षयति प्रकृतेरिति १७ कोसौ भगवान् तमाह अंत इति सर्वप्राणिनां यः पुरुषरूपेण नियंतृत्वेन स प्रकृ
११० तद्विकाररहित एवानुस्फूर्त्यैव वर्त्तते बहिश्च कालरूपेण एष भगवान् यद्वा यः पुरुष इति प्रसिद्धः कालः स पंचवि
शकः एकेन पुरुषस्य प्रभावं कालमाहुः प्रभाव एवैक लक्षणं यत्र इति पुरुषस्यैव कालत्वे हेतुः प्रकृतेरिति उभ
यथा विवक्षायां अंतः पंचविंशति तत्त्वानि भवंति तयोर्भेद विवक्षायां अंते पंचविंशतितत्त्वानि भवंति तयो

प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि चेष्टा यतः स भगवान् काल इत्युपलक्षितः १७ अं
तः पुरुषरूपेण कालरूपेण यो बहिः समन्वेत्येष सत्त्वानां भगवानात्ममायया १८ दैवात्क्षुभि
तधर्मिण्यां स्वस्यां योनौ परः पुमान् आधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयं १९ विश्वमात्म
गतं व्यंजन् कूटस्थो जगदंकुरः स्वतेजसापिबत्तीव्रमात्मप्रस्वापनं तमः २०

भेदविवक्षायां च षड्विंशतिर्भवंति १८ इदानीं तत्त्वानामुत्पत्तिपूर्वकं लक्षणमाह देवादित्यादिना एतान्यसंह
तान्येतः प्राक्तनेन ग्रंथेन तत्र चित्तस्योत्पत्तिपूर्वकं लक्षणमाह चतुर्भिः दैवात् जीवादृष्टात् क्षुभिता धर्मा गुणा यस्यां २१
योनौ अभिव्यक्तिस्थाने प्रकृतौ वीर्यं चिच्छक्तिं सा प्रकृतिर्महत्तत्त्वमसूत महतत्त्वस्वरूपमाह हिरण्मयं प्रका मुदि
शबहुलं १९ विश्वं अहंकारादिप्रपंचं आत्मगतं स्वस्मिन् सूक्ष्मरूपेण स्थितं व्यंजन् प्रकटयन् तीव्रं प्रलयकालीनं
तमः पिबत् कूटस्थः लयविक्षेपशून्यं आत्मानं प्रस्वापयतीति तथा यत्पूर्वं प्रलयसमये महांतं प्रकृतौ विलापयामास ११०

तत्र प्रकृतिं लक्षयति । यत्प्रधानं तदेव प्रकृतिं प्राहुः किं तत्प्रधानं स्वतोऽविशेषं विशेषवत् विशेषाणामाश्रयः तर्हि किं ब्रह्म
न त्रिगुणं किं महत्तत्त्वादि न ॥ अव्यक्तं अकार्यं किं कालादि न सदसदात्मकं कार्यकारणरूपं किं जीवप्रकृतिः न नित्यं
१० अन्येषां तत्त्वानां लक्षणं वक्तुं तानि गणयति पंचभिरित्यादि संख्याभेदेन एतच्चतुर्विंशतिकं एतानि चतुर्विंशतिर्यस्मि
न् गणे तं गणं प्राधानिकं प्रधानकार्यात्मकं ब्रह्मविदुः ११ एतदेव प्रपंचयति महाभूतानीति त्रिभिः तावंति पंचैव १२ १३ अंतरा

श्रीभगवानुवाच ॥ यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकं प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् १० पंचभिः
पंचभिर्ब्रह्मचतुर्भिर्दशभिस्तथा एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ११ महाभूतानि पंचैव भूरापोऽग्नि
मरुन्नभः तन्मात्राणि च तावंति गंधादीनि मतानि मे १२ इंद्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः वाक्क
रौ चरणौ मेढ्रं पायुर्दशम उच्यते १३ मनो बुद्धिरहंकारश्चित्तमित्यंतरात्मकं चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षण
रूपया १४ एतावानेव संख्यातो ब्रह्मणः सगुणस्य ह संनिवेशो मया प्रोक्तो यः कालः पंचविंशकः १५ प्रभावं पौ
रुषं प्राहुः कालमेके यतो भयं अहंकारविमूढस्य कर्तुः प्रकृतिमीयुषः १६

त्मकमंतःकरणं लक्षणरूपया व्या
वच्छेदिकया १४ यावान्मया प्रोक्तः एतावानेव संख्यातः गणितः तत्त्वज्ञैः काले तु मतद्वयमाह यः कालः स पंचविंशकः
प्रकृतेरेवावस्थाविशेष इत्यर्थः १५ एके तु पौरुषं पुरुषस्येश्वरस्य प्रभावं विक्रमं कालमाहुः तमेव कालं द्वेधा लक्षयति
ति यतो भयं भवति कस्य प्रकृतिं ईयुषः प्राप्तस्य अतएव देहेऽहंकारेण विमूढस्य कर्तुर्जीवस्य अनेन साहंकारत्व

भा० स्त० कर्तृत्वं देवतारूपेण कारणत्वमिंद्रियकार्यत्वं भूतरूपेण शांतत्वादिकं तत्कारणत्रयरूपेण २६ मनसउत्पत्ति
१११ पूर्वकं लक्षणमाह वैकारिकादिति द्वाभ्यां संकल्पश्चिंतनं विकल्पो विशेषचिंतनं यस्य मनसः संकल्पाभ्यां का
मसंभवो वर्त्तन इति कामरूपां वृत्तिं लक्षणत्वेनोक्त्वा न तु प्रद्युम्नव्यूहोत्पत्तिः तस्य संकल्पादिकार्यत्वाभावात् उपा
स्यव्यूहस्य चानिरुद्धस्योक्तेः २७ शारदं शरत्कालीनं इंदीवरं नीलोत्पलं तद्वच्छ्यामं यत् शनैः संराध्यं वशीकर्त्तुं
कर्तृत्वं कारणत्वं च कार्यत्वं चेति लक्षणं शांतघोरविमूढत्वमिति वा स्यादहंकृतेः २६ वैकारिका
द्विकुर्वाणान्मनस्तत्त्वमजायत यत्संकल्पविकल्पाभ्यां वर्त्तते कामसंभवः २७ यद्विदुर्ह्यनिरु
द्धाख्यं हृषीकाणामधीश्वरं शारदेंदीवरश्यामं संराध्यं योगिभिः शनैः २८ तैजसात्तु विकुर्वाणाद्बु
द्धितत्त्वमभूत्सति द्रव्यस्फुरणविज्ञानमिंद्रियाणामनुग्रहः संशयोऽथ विपर्यासो निश्चयः स्मृति
रेव च स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् २९ योग्यं दुर्ग्रहत्वात् २८ बुद्धेरुत्पत्तिपूर्वकं लक्षण
माह तैजसादिति द्वाभ्यां हे सति द्रव्यस्फुरणं ज्ञानं निश्चयरूपं ज्ञानमिति चित्तव्यावृत्त्यर्थमुक्तं इंद्रियाणा
मनुग्रह इति सविग्रहे कल्पज्ञाने हृषीकाणामधीश्वरमित्ति यदुक्तं तत्तु निर्विकल्पज्ञाने स्फुरणस्यैव प्रपंचः
संशयादिः विपर्यासो मिथ्याज्ञानं निश्चयः प्रमाणज्ञानं स्वापो निद्रा प्रमाणविपर्ययविकल्पनिद्रास्मृतय इति

[illegible]

१११

प्रसंगात् चतुर्व्यूहोपासनामाह, यत्तदिति सर्वागमप्रसिद्धत्वमाह स्वच्छं विशदं शांतं रागादिरहितं भगवतः मुपल
ब्धिस्थानं अत एव वासुदेवाख्यं यदाहुः अयमर्थः अधिभूतरूपेण तत्त्वस्यैव महानिति संज्ञा अध्यात्मरूपेण चित्तमि
त्युपास्यरूपेण वासुदेव इति अधिष्ठाता तु तत्र क्षेत्रज्ञः एवमहंकारे संकर्षण उपास्यः रुद्रोऽधिष्ठाता मनस्यनिरुद्ध
उपास्यः चंद्रोऽधिष्ठाता बुद्धौ प्रद्युम्न उपास्यो ब्रह्माधिष्ठातेति ज्ञातव्यं २१ स्वच्छत्वं भगवद्बिंबग्राहित्वं अविका

यत्तत्सत्त्वगुणं स्वच्छं शांतं भगवतः पदं यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकं २१ स्वच्छत्व
म[illegible]कारित्वं शांतत्वमिति चेतसः वृत्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा २२ महत्तत्वाद्विकु
र्वाणाद्भगवद्वीर्यसंभवात् क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत २३ वैकारिकस्तैजसश्च तां
मसश्च यतो भवः मनसश्चेंद्रियाणां च भूतानां महतामपि २४ सहस्रशिरसं [illegible] साक्षाद्यमनंतं
प्रचक्षते संकर्षणाख्यं पुरुषं भूतेंद्रियमनोमयं २५ रित्वं लयविक्षेपराहित्यं अपां प्रकृतिः फेनतरंगा
दिरहितावस्थापन्ना भूतसंसर्गात् प्राक् नीसाय थाम घुकरा स्वच्छा शांता च तद्वदित्यर्थः २२ अहंकारस्योत्पत्ति
पूर्वकं लक्षणमाह महत्तत्वादिति चतुर्भिः क्रियासु शक्तिर्यस्य सः क्रियाशक्तिः २३ त्रैविध्यमाह वैकारिक इति तस्य
कार्यमाह यतः यस्मात् मनआदीनां भव उत्पत्तिः २४ तस्मिन्नुपास्यव्यूहमाह सहस्रशिरसमिति २५ रामा

वि

ती

भा०तृ० कासात्वक्स्पर्शसंग्रहः सम्यग्ग्रहणं यया पुंस्त्वं नियतलिंगत्वात् यद्वा स्पर्शसंग्रहस्ततोभवतीति शेषः शब्दतन्मात्रा

११२ दिना तन्मात्राणामुत्तरोत्तराणां यथोमुक्तं ३४ स्पर्शत्वं स्वरूपलक्षणमित्यर्थः नभस्वतो वायोस्तन्मात्रत्वं च ३५॥

चालनं वृक्षशाखादेः व्यूहनं मेलनं तृणादेः प्राप्तिः संयोगं गंधवतो घ्राणं प्रति तथा शैत्यादिमतः स्पर्शनं प्रति शब्दस्य

श्रोत्रं प्रति नेतृत्वं सर्वेन्द्रियाणामात्मत्वमुपोद्बलकत्वं कर्मणा कार्येणाभिलक्षणं भावेल्युट् कर्मैवाभिलक्षणमिति

नभसः शब्दतन्मात्रात्कालगत्या विकुर्वतः स्पर्शोभवत्ततो वायुस्त्वक्स्पर्शस्य च संग्रहः ३४ मृदुत्वं क

ठिनत्वं च शैत्यमुष्णत्वमेव च एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ३५ चालनं व्यूहनं प्राप्तिर्ने

तृत्वं द्रव्यशब्दयोः सर्वेंद्रियाणामात्मत्वं वायोः कर्माभिलक्षणं ३६ वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरि

तादभूत् समुत्थितं ततस्तेजश्चक्षू रूपोपलंभनं ३७ द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च ते

जस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ३८ द्योतनं पचनं पानमदनं हिममर्द्दनं तेजसो वृत्तय

स्त्वेताः शोषणं क्षुत्तृडेव च ३९ विग्रहेतुकरणे ३६ ३७ द्रव्याकृतित्वं द्रव्यस्याकारसमर्पकत्वं गुणता

द्रव्योपसर्जनतया प्रतीतिः शब्दस्य तु स्वातंत्र्येणैव प्रतीतिः अप्रत्यक्षद्रव्यस्य शंखादेरपि स्वातंत्र्येणैव प्रतीतिः रूप

स्य तु नैवमिति तस्यायं विशेष उक्तः व्यक्तिसंस्थात्वं द्रव्यस्य या संस्था संनिवेशः सैव संस्था यस्य द्रव्यपरिमाण

णतः याप्रतीतिरित्यर्थः तेजसस्तेजस्त्वमसाधारणत्वं ३८ द्योतनं प्रकाशनं पचनं तंडुलादेः क्षुत्तृट् अश

११२

इंद्रियाणामुत्पत्तिमाह तैजसानि तैजसादहंकाराज्जातानि ज्ञानेंद्रियाणां वैकारिकत्वशंकानिरासार्थमेव
कारः द्विविधान्यपींद्रियाणि तैजसान्येवेत्यन्वयः तत्र हेतुः प्राणस्येति हि यस्मात् प्राणस्य क्रियाशक्तिमत्तामिं
द्रियाणां तैजसत्वं तथा बुद्धेस्तैजसत्वात्तदीयज्ञानशक्तिमतामतामपींद्रियाणां तैजसत्वमित्यर्थः ३० तन्मा
त्रोत्पत्तिपूर्वकं आकाशादिमहाभूतोत्पत्तिं तल्लक्षणं चाह तामसादिति पंचदशभिः श्रोत्रं तु शब्दगमित्यादि

तैजसानींद्रियाण्येव ज्ञानकर्मविभागशः प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ३० तामसा
च्च विकुर्वाणाद्भगवद्वीर्यचोदितात् शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं तु शब्दगं ३१ अर्थाश्रयत्वं शब्द
एं ३ स्य द्रष्टुर्लिंगत्वमेव च तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ३२ भूतानां छिद्रदातृत्वं वहिरंतरमे
व च प्राणेंद्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणम् ३३ निर्विषयोत्पत्त्यनंतरं तत्संबंधमात्रं कथ्यते न तत्प
त्तिः प्रागेवोत्पन्नत्वात् शब्दं गच्छति प्राप्नोतीति शब्दगं ३१ शब्दस्य लक्षणमाह अर्थाश्रयत्वं अर्थवाचकत्वं द्रष्टुर्लिंगत्वं
घाद्यंतरितस्य वक्तुर्ज्ञापकत्वं तदुक्तं लिंगं यद्दृष्टदृश्ययोरिति नभसस्तन्मात्रत्वं शब्दस्य लक्षणमित्यन्वयः ३२ छिद्र
दातृत्वं अवकाशदातृत्वं वहिरंतरव्यवहारास्पदत्वं आत्मनः प्राणादीनां धिष्ण्यत्वमाश्रयत्वं नाड्यादि छिद्ररूपेण वृत्ति
ः कार्यमेव लक्षणं वृत्तिलक्षणं एवमुत्तरत्राप्येकेन श्लोकेन तन्मात्रमहाभूतयोरुत्पत्तिः द्वितीयेन तन्मात्रलक्षणं तृ
तीयेन महाभूतलक्षणमित्यनुसंधेयं ३३ ॥ ११

ब्रह्मणो भावनं प्रतिमादिरूपेण साकारत्तापादनं स्थानं जलादिविलक्षणतया नैरपेक्ष्येण स्थितिः धारणं
जलाद्याधारत्वं सत्तामाकाशादीनां विशेषणमवच्छेदकत्वं सर्वेषां सत्वानां प्राणिनां तद्गुणानां च पुंस्त्वादीनामु
द्भेदः परिणामविशेषैः प्रकटीकरणं ४५ श्रोत्रादीनां शब्दादिग्राहकत्वमुक्तं तेषां च लक्षणं तदेवेत्याह पंचभिः श्लो
कार्द्धैः नभसो गुणविशेषः शब्दो यस्यार्थो विषयः ४६ गुणविशेषप्रवृत्त्यावृत्त्ये दर्शयति परस्य कारणस्य धर्मः शब्दा

भावनं ब्रह्मणः स्थानं धारणं सद्विशेषणं सर्वसत्वगुणोद्भेदः पृथ्वीगुणलक्षणं ४५ नभोगु
णविशेषोर्थो यस्य तच्छ्रोत्रमुच्यते वायोर्गुणविशेषोर्थो यस्य तत्स्पर्शनं विदुः ४६ तेजोगुण
विशेषोर्थो यस्य तच्चक्षुरुच्यते अंभोगुणविशेषोर्थो यस्य तद्रसनं विदुः भूमेर्गुणविशेषोऽर्थो
यस्य स घ्राण उच्यते ४७ परस्य दृश्यते धर्मो ह्यपरस्मिन्समन्वयात् अतो विशेषो भावानां भू
मावेवोपलक्ष्यते ४८ एतान्यसंहत्य यदा महदादीनि सप्त वै कालकर्मगुणोपेतो जगदादिरुपाविशत् ४९

दिः अपरस्मिन्कार्ये वाय्वादौ कारणान्वयाद्दृश्यते अतो भावानामाकाशादीनां विशेषो गुणः सर्वोपि शब्दा
दिर्भूमावेवोपलभ्यते चतुर्णां तत्रान्वयात् जलादिषु यथान्वयमेव न सर्वत्र आकाशे त्वन्यान्वयाभावादेक एवे
ति ४६ ४७ एवं कारणोत्पत्तिमुक्त्वा कार्योत्पत्तिमाह सार्द्धैस्त्रिभिः एतान्यसंहत्य यदा अमिलित्वा यदा स्थिता
नि तदा जगदादिरीश्वरः प्राविशत् सप्तेति च प्राधान्याभिप्रायेणोक्तं प्रवेशस्तु सर्वेष्वपि विवक्षित एव ४९ ॥

जिह्वा रसनेंद्रियं रसो गृह्यतेऽनेनेति रसग्रहः यद्वा रसस्य ग्रहस्ततो भवतीति शेषः ४० कषायादिषु लवणोपि द्रष्ट
व्यः भौतिकानां संसर्गे द्रव्याणां य एको मधुरः एवं सन्नेव मनेकधा भिद्यते स रस इत्यर्थः ४१ क्लेदनं आर्द्रीकरणं पि
डनं मृदादि पिंडीकरणं तृप्तिदातृत्वं प्राणनं जीवनं आपोमयः प्राण इति श्रुतेः पानतृट्छेदकत्वं त्यजनि वर्त्तनं उदनं
मृदुकरणं उंदनमिति पाठेपि स एवार्थः भूयस्त्वं कूपादावुद्धृतस्यापि पुनरुद्गमः ४२ गंधगः गंधं प्राप्नोति ४३

रूपमात्राद्विकुर्वाणात्तेजसो दैवचोदितात् रसमात्रमभूत्तस्मादंभो जिह्वा रसग्रहः ४० कषायो
मधुरस्तिक्तः कट्वम्ल इति नैकधा भौतिकानां विकारेण रस एको विभिद्यते ४१ क्लेदनं पिंडनं तृ
प्तिः प्राणनाप्यायनोदनं तापापनोदो भूयस्त्वमंभसो वृत्तयस्त्विमाः ४२ रसमात्राद्विकुर्वाणा
दंभसो दैवचोदितात् गंधमात्रमभूत्तस्मात्पृथ्वी घ्राणस्तु गंधगः ४३ करंभपूतिसौरभ्यशांतो
ग्राम्लादिभिः पृथक् द्रव्यावयववैषम्याद्गंध एको विभिद्यते ४४

करंभो मिश्रगंधः यथा व्यंजनादीनां हिंग्वादिसंस्कारे पूतिर्दुर्गंधः सौरभ्यं कर्पूरादेः शांतः शत
८२ पत्रादेः उग्रो लशुनादेः संसर्गिणां द्रव्यावयविनां वैषम्यात् य एवं विभिद्यते स गंधग इत्यर्थः ४४

भा०२० स्वराडिंद्रः हरिःविस्नुः ५९ अमृतंजातं ६० कुक्ष्यादिषुहृदयमेवाधिष्टानं गिरांपति‍र्ब्रह्मा ६१ चैत्यंक्षेत्रज्ञः ६२ ॥
११४ नाड्योस्यनिरभिद्यंततताभ्योलोहितमाभृतं ५९ नद्यस्ततःसमभवन्नुदरंनिरभिद्यतः क्षुत्पिपासेततः
स्यातांसमुद्रस्त्वेतयोरभूत् ६० अथास्यहृदयंभिन्नंहृदयान्मनउत्थितं मनसश्चंद्रमाजातोबुद्धिर्बुद्धे
गिरांपतिः ६१ अहंकारस्ततोरुद्रश्चित्तंचैत्यस्ततोभवत् ६२ एतेह्यभ्युत्थितादेवानैवास्योत्थापनेशक
मु४ न् पुनराविविशुःखानितमुत्थापयितुंक्रमात् ६३ वह्निर्वाचामुखंभेजेनोदतिष्ठत्तदाविराट् घ्राणे
ननासिकेवायुर्नोदतिष्ठत्तदाविराट् ६४ अक्षिणीचक्षुषादित्योनोदतिष्ठत्तदाविराट् श्रोत्रे
णकर्णौचदिशोनोदतिष्ठत्तदाविराट् ६५ त्वचंरोमभिरोषध्योनोदतिष्ठत्तदाविराट् रेतसाशि
श्नमापस्तुनोदतिष्ठत्तदाविराट् ६६ गुदंमृत्युरपानेननोदतिष्ठत्तदाविराट् हस्ताविंद्रोबले
नैवनोद तिष्ठत्तद तिष्ठत्तदाविराट् ६७ विस्नुर्गत्यैवचरणौनोदतिष्ठत्तदाविराट् नाडीर्नद्योलो
हितेननोदतिष्ठत्तदाविराट् ६८ क्षुत्तृड्भ्यामुदरंसिंधुर्नोदतिष्ठत्तदाविराट् हृदयंमनसाचं
द्रोनोदतिष्ठत्तदाविराट् ६९ बुद्ध्याब्रह्मापिहृदयंनोदतिष्ठत्तदाविराट् रुद्रोभिमत्याहृदयंनोद ११४
तिष्ठत्तदाविराट् ७०
अन्वयव्यतिरेकाभ्यांक्षेत्रज्ञंविवेक्तुंसर्वेषांपुनःप्रवेशमाह एतइतिनवभिः ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७०

अनुविष्टेभ्यः क्षुभितेभ्यः यस्मादंडादसौ विराट् पुरुषः उदतिष्ठत् ५० ५१ भागवतो रूपमिति पुरुषमित्याभि
प्रायेण ५२ तस्मिन्नध्यात्मादिविभागमाह हिरण्मयादिति त्रिभिः उत्थाय औदासीन्यं विहाय तमाविश्याधिष्ठा
य महात्मा सो देवस्य खं छिद्रं ५३ वाण्या सह वह्निरभवत् नासे निरभिद्येतां प्राणेतः प्राणेन कृतः स्फूर्तः सन् घ्राणः

ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽडमचेतनं उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट् ५० एतदंडं विशे
षाख्यं क्रमवृद्धैर्दशोत्तरैः तोयादिभिः परिवृतं प्राधान्येनावृतैर्बहिः ५१ यत्र लोकवितानोयं रूपं भगव
तो हरेः ५२ हिरण्मयादंडकोशादुत्थाय सलिलेशयात् तमाविश्य महादेवो बहुधा निर्बिभेद खं ५३ नि
रभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत् वाण्या वह्निरथो नासे प्राणोतो घ्राण एतयोः ५४ घ्राणाद्वायु
रभिद्येतामक्षिणी चक्षुरेतयोः तस्मात्सूर्यो न्यभिद्येतां कर्णौ श्रोत्रं ततो दिशः ५५ निर्बिभेद विराजस्त्वग्रो
मश्मश्र्वादयस्ततः तत ओषधयश्चासन् शिश्नं निर्बिभिदे ततः ५६ रेतस्तस्मादाप आसन्निरभिद्यत वै गु
दं गुदादपानोऽपानाच्च मृत्युर्लोकभयंकरः ५७ हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट् पादौ च
निरभिद्येतां गतिस्ताभ्यां ततो हरिः ५८

एतयोर्नासिकयोरभवदित्यनुषंगः ५४ घ्राणादनंतरं वायुश्च प्राणेन इति विशेषणं सर्वेंद्रियेष्वपि द्रष्टव्यं न्यभि
द्येतामन्वभिद्येतामिति पाठद्वयेप्येक एवार्थः ५५ ततो दिशः प्राविशत् ५६ ५७ आदिशब्देन केशाः ५८ स्वैरं

भा०स्कं० ननु तर्ह्येवास्तवत्वात्संसृतेः किं तन्निवृत्तिप्रयासेन तत्राह अर्थेहीति ६ यतो विषयध्यानमनर्थहेतुः अतो मनो
११५ नियंतव्यमित्याह अत एवेति असतामिंद्रियाणां पथि विषयमार्गे तीव्रेण दृढेन विरक्त्या च तीव्रया ७ भक्तिविरक्त्योस्तीव्र
त्वे कारणं निवर्णयन् ज्ञाने मोक्षप्रकारमाह षड्भिः यमादिभिर्योगमार्गैश्चित्तमभ्यसन् पुनःपुनरेकाग्रीकुर्वन् श्रा

अर्थेह्यविद्यमानेपि संसृतिर्न निवर्त्तते ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ६ अत एव श
नैश्चित्तं प्रसक्तमसतां पथि भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशं ७ यमादिभिर्योगपथैरभ्य
सेत् श्रद्धयान्वितः मयि भावेन सत्येन मत्कथाश्रवणेन च १ सर्वभूतसमत्वेन निर्वैरेणाप्रसंगतः
ब्रह्मचर्येण मौनेन स्वधर्मेण महीयसा २ यदृच्छयोपस्थितेन संतुष्टो मितभुग्मुनिः विविक्तशरणः शां
तो मैत्रः करुण आत्मवान् सानुबंधे च देहेस्मिन्नकुर्वन्नसदाग्रहं ३ ज्ञानेन दृष्टतत्वेन प्रकृतेः पुरुषस्य
च निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः ४

नानमुपलभ्य सर्वानुस्यूतं ह्यं परमात्मानं प्रतिपद्य तरति षष्ठेनान्वयः सत्येन निष्कपटेन प्रेम्णा १ अप्रसंगतः सं
गत्यागेन महीयसा ईश्वरार्पितेन २ विविक्तशरणः एकांतवासी असदाग्रहं अहंममतां ३ प्रकृतेः पुरु
षस्य च दृष्टं तत्वं येन तेन ज्ञानेन निवृत्तानि बुद्ध्यवस्थानि जाग्रदादीनि यस्य सः अत एव दूरीभूतमन्यदर्शनं य
स्य ४

७१॥ विराट्देहस्य व्यष्टिदेहं दृष्टांतत्वेन दर्शयन्सांख्यानुकथनस्य प्रयोजनमाह॥ अथेति द्वाभ्यां प्रथमं परमेश्वरे
भक्तिस्ततोऽन्यत्र विरक्तिः॥ ततो योगप्रवृत्तया धीः॥ एकाग्रचित्तं॥ ततो यत्ज्ञानं तेन प्रत्यगात्मा देहे क्षेत्रज्ञं॥ अस्मिन्नात्मनि का
र्यकारणसंघाते विविच्य चिंतयेत्॥७२॥ इति तृतीये षड्विंशः॥२६॥ सप्तविंशे ततः सम्यग्वद्धसाधनयोगतः॥ पुंप्रकृत्योर्विवेकेन

चित्तेन हृदयं चैत्य क्षेत्रज्ञः प्राविशद्यदा॥ विराट् तदैव पुरुषः सलिलादुदतिष्ठत॥७१॥ यथा प्रसुप्तं पुरुषं
प्राणेंद्रियमनोधियः प्रभवंति विना येन नोत्थापयितुमोजसा॥ तमस्मिन्प्रत्यगात्मानं धिया योगप्र
वृत्तया भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिंतयेत्॥७२॥ इति श्रीमद्भागवते महापुराणे तृतीयस्क
न्धे कापिलेये तत्त्वसमाम्नाये षड्विंशतितमोध्यायः॥२६॥ श्रीभगवानुवाच॥ प्रकृतिस्थोपि पुरुषो नाज्यते
प्राकृतैर्गुणैः॥ अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत्॥१॥ स एष यर्हि प्रकृतेर्गुणेष्वभिविसज्जते
अहंक्रियाविमूढात्मा कर्तास्मीत्यभिमन्यते॥२॥ तेन संसारपदवीमवशोभ्येत्यनिर्वृतः॥ प्रासंगिकैः
कर्मदोषैः सदसन्मिश्रयोनिषु॥३॥

मोक्षरीतिर्निरूप्यते विवेकज्ञाने मोक्षमुपपादयितुं बद्धस्यैव
पुरुषस्य एवंविधं प्रकृत्यविवेककृतः संसारमनुस्मारयति प्रकृतिस्थोपीति त्रिभिः देहस्थोपि नाज्यते न लिप्यते
गुणैस्तत्कृतैः सुखदुःखादिभिः निर्गुणत्वादकर्तृत्वेन ततो विकारित्वं न स्मात् १ २ अनिर्वृतः सन् प्रकृतिसंग
कृतैः सदसन्मिश्रयोनिषु देवतिर्यग्नरादिषु संसारपदवीं प्राप्नोति ३ ॥ रामरामरामरामरामरा॥

विषय ४

इदानीं सुषुप्तिसाक्षित्वेन शुद्धात्मप्रतिपत्तिमनुभवतो दर्शयति त्रिभिः भूतादिष्वत्र सत्त्वं लयः व्याहृते ऽहृते निद्रया
लीनेषु सत्सु यस्तत्र तदा विनिद्रो निरहंक्रियस्तमात्मानं प्रतिपद्यत इति तृतीयेनान्वयः ननु यदि तदा विनिद्रो ऽसा
वस्ति तर्हि जाग्रत्स्वप्नयोरिव स्फुटः किं नावभासेत तत्राह पूर्वं सद्द्रष्टा आत्मा दृष्टत्वेन सविकल्पकत्वेन यास्फुरत्प्रतीतिः
सुषुप्तौ भूतादेरहंकारस्य लीनत्वात् तद्विषये ऽहंकारे नष्टे सति स्वयमनष्टोपि मृषेवात्मानं नष्टवन्मन्यमानो यः अ
त्र स्वप्नाशे ऽन्यस्य नष्टतुल्यत्वे दृष्टान्तः नष्टवित्तो यथा आतुरो विवशः नष्टवद्भवतीत्यर्थः ननु सुषुप्तौ न किंचि दृ

भूतसूक्ष्मेंद्रियमनोबुद्ध्यादिष्विह निद्रया लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः ॥ मन्यमानस्तदात्मा
नमनष्टो नष्टवन्मृषा नष्टेऽहंकरणे द्रष्टा नष्टवित्त इवातुरः ॥ एवं प्रत्यवमृश्यासावात्मानं प्रतिप
द्यते साहंकारस्य द्रव्यस्य योऽवस्थानमनुग्रहः ॥ चा देवहूतिरुवाच ॥ पुरुषं प्रकृतिर्ब्रह्मन्न विमुंच
ति कर्हिचित् अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो ॥ ९ ॥

भूयते नैवं सुखमहमस्वाप्सं न किंचिदवेदिषमिति विशेषज्ञानं विना केवलस्यात्मनः प्रतिसंधानादित्याह एवमि
ति ननु प्रतिसंधाने साहंकारस्य प्रतीतेः कथं निरहंक्रियत्वं तत्राह साहंकारस्य द्रव्यस्य कारणसंघातस्य अनुग्रहः
प्रकाशकः अवस्थानं च द्रव्यविषयेण तयाहंकारस्यापि दृश्यत्वाद्धर्मं नष्टात्तद्व्यतिरिक्तः तमात्मानमित्यन्वयः दे
न क्विं विरक्तिभ्यां सत्यपि विवेके प्रकृतिपुरुषयोः परस्परत्यागाभावात् कथं मुक्तिरिति पृच्छति पुरुषमिति चतु॥

आत्मनाऽहंकारावछिन्नेन आत्मानं अस्याम् उपलभ्यः एकस्यैवावछेदाभ्यां करणत्वकर्मत्वे दृष्टांतमाह चक्षुषा चक्षु
रवछिन्नेनार्केण गगनस्थमर्कमिव एवमात्मदृक् शुद्धमात्मानं पश्यन् मुक्तलिंगं निरुपाधिकं असतिमिथ्याभूतेऽहंका
रे सदाभासं सद्रूपेणाभासमानं ब्रह्म प्राप्नोति शुद्धजीवरूपाद्विशेषमाह सतः कारणस्य प्रधानस्य वंधुमधिष्ठानं अ
सतः कार्यस्य चक्षुरिव प्रकाशकं सर्वेषु कार्यकारणेष्वनुस्यूतं अद्वयं परिपूर्णः ५ ६ अहंकारोपहितेन शुद्धप्र
त्यप्रतिपत्तिं सदृष्टांतमाह यथेति जलेस्थितः आभासः सूर्यप्रतिविंबो यदा गृहांतर्वर्तिभित्तौ स्फुरति तदा गृहको

उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्मदृक् मुक्तलिंगं सदाभासमसतिप्रतिपद्यते सतोबंधुमसच्च
स्तू २ क्षुः सर्वानुस्यूतमद्वयं ५ ६ यथा जलस्थ आभासः स्थलस्थेनावदृश्यते स्वाभासेन तथा सूर्यो जलस्थे
न दिवि स्थितः एवं त्रिरदहंकारो भूतेंद्रियमनोमयैः स्वभासैर्लक्षितोऽनेन सदाभासेन सत्यदृक् ७

णस्थितैः पुरुषैः भित्त्याद्दौस्थलस्थितेन स्वाभासेन सूर्यप्रतिविंवेन यथा प्रथमं जलस्थो आभासोऽवदृश्यते लक्ष्य
ते गगनस्थस्य गृहमध्ये प्रतिविंवायोगात् चार्थस्तथा पूर्वः यथा चेत्यर्थः यथा जलस्थेन दिवि स्थितः सूर्यो लक्ष्यते
एवंभूतेंद्रियमनोमयैर्देहेंद्रियैर्मनोभिरर्वाचीनैः स्वाभासैः आत्मप्रतिविंवैः त्रिगुणोऽहंकारः सतो ब्रह्मण आभासोऽय
स्मिन् तेन रूपेण लक्षितः अहंकार स्वाभासं विना विषयाभासानुत्पत्तेः अनेन चाहंकारेण सदाभासवता सत्यदृक्
परमार्थदृष्टिरूप आत्मा लक्षित इत्यर्थः ७

अविवेकावस्थायामनर्थहेतुरपि विवेकानंतरं न भवतीति सदृष्टांतरमाह यथेति द्वाभ्यां प्रस्वापः स्वप्नः बहुन
र्थान् विभर्त्ति पुष्णाति प्रबुद्धस्य संस्कारवशेन स्फुरन्नपि १५ १६ उपसंहरति यदैवमिति त्रिभिः बहूनि जन्मानि
यस्मिन् काले प्रतिबुद्धार्थः विदितात्मतत्त्वः कैवल्याख्यं स्वसंस्थानं देहादि व्यतिरिक्तं स्वरूपं मदाश्रयं निःश्रेयसं

यथाह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् स एव प्रतिबुद्धस्य न वै मोहाय कल्पते १५ एवं विदिततत्त्व
स्य प्रकृतिर्मयि मानसं युंजतो नापकुरुत आत्मारामस्य कर्हिचित् १६ यदैवमध्यात्मरतः कालेन बहु
जन्मना सर्वत्र जातवैराग्य आब्रह्मभुवनान्मुनिः मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा निःश्रेयसं
स्वसंस्थानं कैवल्याख्यं मदाश्रयं प्राप्नोतीहांजसा धीरः स्वदृशाच्छिन्नसंशयः यद्गत्वा न निवर्तेत यो
गी लिंगाद्विनिर्गमे १७ यदा न योगोपचितासु चेतो मायासु सिद्धस्य विसज्जतेंग अनन्यहेतुष्वथ मे ग
तिः स्यादात्यंतिकी यत्र न मृत्युहासः १८ निरतिशयानंदं स्वदृशा आत्मज्ञानेन छिन्नाः संशया मिथ्याज्ञानानि य
स्य लिंगाद्विनिर्गमे लिंगशरीरनाशे सतीत्यर्थः १७ तथापि अणिमादिसिद्धयोंऽतरायरूपा भवंति तासु योगेनोपचि
तासु सम्यक्संपन्नासु न योगादन्यो हेतुर्यासां तासु यदा सिद्धस्य चेतो न विसज्जते अंग हे मातः अथ तदा मे गतिः कात्यंतिकी यो
हंससंबंधिनी यत्र यस्यां गतौ मृत्योर्हासो न भवति विषक्तो तु सिद्धोपि मया वशीकृतं मृत्योर्हासो गर्वो भवतीत्यर्थः १८

व्यतिरेकाभावमात्रे दृष्टांतः यथा व्यतिरेकतो भावः सत्ता नास्ति गंधस्य कदाचिदप्यत्यदर्शनाद्दृष्टांतरे अपामिति
बुद्धेः प्रकृतेः परस्य च पुरुषस्य १० ततः किमतआह अकर्तुरिति येगुणा आश्रयो यस्य सः तेषु प्रकृतेस्तु सत्सु पुरुषस्य कै
वल्यं कुतः ११ अतएव कश्चिन्निवृत्तप्रायस्यापि संसारभयस्य पुनरुद्भवो दृश्यतेइत्याह क्वचिदिति १२ नप्रकृतिसंबं

यथा गंधस्य भूमेश्च न भावो व्यतिरेकतः अपां रसस्य च यथा तथा बुद्धेः परस्य च १० अकर्तुः क
र्मबंधोयं पुरुषस्य यदाश्रयः गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथं ॥११॥ क्वचित्तत्वावमर्शेन निवृ
त्तं भयमुल्बणं अनिवृत्तनिमित्तत्वात्पुनः प्रत्यवतिष्ठते ॥१२॥ श्रीभगवानुवाच ॥ अनिमित्तनिमित्तेन
स्वधर्मेणामलात्मना तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरं ज्ञानेन दृष्टतत्वेन वैराग्येण बलीयसा ॥
तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशं तिरोभवित्री शनै
कैरग्नेर्योनिरिवारणिः १३ भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः नेश्वरस्याशुभं धत्ते स्वेमहिम्नि स्थि
यहेतुः किंतु गुणक्षुभ्यात्तदाशंक्यं तन्निवृत्तौ सत्यां मोक्षो घटते क्वचिदुद्भवस्तु साध तस्य च १४
नवैकल्यादित्यभिप्रेत्य साधनानि प्रायं कथयन्परिहरति त्रिभिः निमित्तं फलं तन्निमित्तं प्रवर्त्तकं यस्मिन् निष्कामेण धर्मे
ण अमलात्मना निर्मलेन मनसा श्रुतेन कथाश्रवणेन संभृतया पुष्टया दह्यमाना अभिभूयमाना तिरोहिता भवति १३ ए
वं च सति पुनरुद्भवो नास्तीत्याह भुक्तभोगा यस्याः नित्यशः सदा दृष्टो दोषो यस्याः अतएव परित्यक्ता सती ईश्वरस्य अपर

[illegible] ९८

भा० टी० ३ स्वधिष्ण्यानांप्राणस्थानानांमूलाधारादीनांमध्येएकस्मिन्देशेमनसासहप्राणस्यधारणं आत्मनोमनसःस
११८ माधानं आत्माकारता अन्यैश्चव्रतदानादिभिःपथिभिरुपायैः ६। २ आसनादीनिप्रपंचयति शुचाविति यावत्स
माप्ति आसनंकुशाजिनचैलोत्तरंप्रतिष्ठाप्य स्वस्तिकासनेनयथासुखमितिवा समभ्यसेत् प्राणमितिशेषः ॥

स्वधिष्ण्यानामेकदेशेमनसाप्राणधारणं वैकुंठलीलाभिध्यानंसमाधानंतथात्मनः १ एतैरन्यैश्च
पथिभिर्मनोदुष्टमसत्पथं बुद्ध्यायुंजीतशनकैर्जितप्राणोह्यतंद्रितः ६। २ शुचौदेशेप्रतिष्ठाप्यवि
जितासनआसनं तस्मिन्स्वस्तिकमासीनऋजुकायःसमभ्यसेत् ३ प्राणस्यशोधयेन्मार्गंपूरकुं
भकरेचकैः प्रतिकूलेनवाचित्तंयथास्थिरमचंचलं ४ मनोचिराद्विरजंस्याज्जितश्वासस्ययोगिनः क
वाय्वग्निभ्यांयथालोहंध्मातंत्यजतिवैमलं ५

ऊरुजंघांतरयापादाग्रेजानुमध्यगे योगिनोयत्स्वस्थानंस्वस्तिकंतद्विदुर्बुधाः ३ बाह्यवायोरंतःप्रवेशनंपूर
कः प्रवेशितस्यधारणंकुंभकः धृतस्यबहिर्निःसारणंरेचकः प्रतिकूलेनरेचकपूरककुंभकैः यद्वा इडया
पूर्यपिंगलयारेचनं पिंगलयापूर्यइडयारेचनमिति एवंप्रतिकूलेन वाशोधयेद्यथा स्थिरंसत्पुनरपिचंचलंन
या भवतितथाशोधयेत् ४ ध्मातंसंतप्तमित्यर्थः लोहंस्वर्णंयथामलंत्यजति तथामनोविरजंस्यात् ततश्चा
चलंस्यादितिभावः ५

इति तृतीये सप्तविंशः ॥२७॥ अष्टाविंशे ततोऽष्टांगयोगेन ध्यानशोभिना ॥ सर्वोपाधिविनिर्मुक्तं स्वरूपं ज्ञामीर्य्यते ॥ भक्तिसं
क्षेपतः प्रोच्य सांख्याय विस्तृतं ॥ अथाह दैवहूत्यै एवं योगमष्टांगं कपिलो हरिः सबीजस्य सालंबनस्य प्रसन्नं सत् ॥१॥
तत्रयमनियमानाह त्रिभिः सार्द्धयाधिकैः शक्त्या स्वधर्माचरणं ॥ ग्राम्यस्त्रैवर्गिको धर्म्मः ॥ तस्मान्निवृत्तिः मित

इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कापिलेये प्रकृतिपुरुषविवेकः सप्तविंशोध्यायः ॥२७॥

३२ श्रीभगवानुवाच ॥ योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे मनो येनैव विधिना प्रसन्नं याति सत्प
थं १ स्वधर्माचरणं शक्त्या विधर्माच्च निवर्त्तनं दैवाल्लब्धेन संतोष आत्मविच्चरणार्चनं ॥२॥ ग्राम्यधर्मनि
वृत्तिश्च मोक्षधर्मरतिस्तथा मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनं ॥३॥ अहिंसा सत्यमस्तेयं या
वदर्थपरिग्रहः ब्रह्मचर्य्यं तपः शौचं स्वाध्यायः पुरुषार्च्चनं ॥४॥ मौनं सदासनजयः स्थैर्य्यं प्राणजयः
शनैः प्रत्याहारश्चेंद्रियाणां विषयान्मनसा हृदि ॥५॥ चतन्मेध्यं शुद्धं च तस्यादनं तत्र मितं नाम द्वौ भागौ
पूरयेदन्नैस्तोयेनैकं प्रपूरयेत् मारुतस्य प्रचारार्थं चतुर्थमवशेषयेदिति स्मृतिप्रसिद्धं विविक्तं विजनं क्षेमं नि
र्बाधं तस्य स्थानस्य सेवनं ॥३॥ यावतार्थप्रयोजनं तावन्मात्रस्य परिग्रहः ॥४॥ आसनादीन्यंगान्याह त्रिभिः
सततमासनस्य जयेन स्थैर्य्यम् ॥५॥ रामराम हरे गोविंद राघव रघुपतिः ॥ ९९ ॥

भा०टी० ११९

अपीच्यमतिसुंदरं भक्तिविषयं दर्शनं यस्य कैशोरे तारुण्ये वयसि स्थितं भक्तानामनुग्रहे कातरं व्यग्रं कीर्त्तन्यं
कीर्त्तनार्हं तीर्थं यशो यस्य पुण्यश्लोकावलिप्रमुखास्तेषां यशस्करं समग्राण्यंगानि यस्मिन् न च्यवते नाप
याति १७ ॥ १८ ॥ प्रेक्षणीयमीहितं लीला यस्य १९ तदेवं समग्रं ध्यानमुक्त्वा एकैकावयवध्यानमाह तस्मिन् लब्धं
पदं स्थितिर्येन तच्चित्तं विलक्ष्य विशेषेण लक्षीकृत्य एकत्र एकस्मिन्नंगादावित्यर्थः १० तदेव पदादिक्रमे

अपीच्यदर्शनं शश्वत्सर्वलोकनमस्कृतं सन्तं वयसि कैशोरे भृत्यानुग्रहकातरं १७ कीर्त्तन्यती
र्थयशसं पुण्यश्लोकयशस्करं ध्यायेद्देवं समग्रांगं यावन्न च्यवते मनः १७ ॥ ८ ॥ स्थितं व्रजं
तमासीनं शयानं वा गुहाशयं प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा १९ तस्मिंल्लब्ध
पदं चित्तं सर्वावयवसंस्थितं विलक्ष्यैकत्र संयुज्यादंगे भगवतो मुनिः १० संचिंतयेद्भगव
च्चरणारविंदं वज्रांकुशध्वजसरोरुहलांछनाढ्यं उत्तुंगरक्तविलसन्नखचक्रवाल ज्यो
हतम १ त्स्नाभिराहद्धृदयांधकारं ११ य१

णाह त्रयोदशभिः सम्यक् चिंतयेत् पादतले रेखात्मकानि वज्रादीनि लांछनानि तैराढ्यं युक्तं उत्तुंगाश्चर
क्ताश्च विलसंतो ये नखास्तेषां चक्रवालं मंडलं तस्य ज्योत्स्नाभिराहतं महतां ध्यातॄणां हृदयांधकारो येन
एतच्च सर्वमुपादेयं विशेषणम् ध्येयत्वेनैवोच्यते ११ रामराम ॥ गोविंद हरे मुरारे ॥ ॥ ऽऽ ॥ ऽऽ ११९

प्राणायामादीनां समाधौ धारणाकार्यं तमाह प्राणायामैरिति दोषान् वातश्लेष्मादीन् संसर्गान् अनीश्वरान् रागादीन्
वायुना सह मनसः स्थिरीकरणं धारणा स्थिरस्य वृत्तिसंततिर्ध्यानं वृत्तिनिरोधः समाधिरिति भेदः ६ सुसमाहितं स्थिरं
जातो काष्ठां कालां मूर्त्तिमित्यर्थः स्वनासाग्रेऽवलोकनं यस्य यत् तच्चलयविक्षेपयोः परिहाराय ७ ध्येयं हरिमाह सप्तभिः

प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान् प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ६ य
दा मनः स्वं विरजं योगेन सुसमाहितं काष्ठां भगवतो ध्यायेत् स्वनासाग्रावलोकनः ७ प्रसन्नवदनांभो
जं पद्मगर्भारुणेक्षणं नीलोत्पलदलश्यामं शंखचक्रगदाधरं १ लसत्पंकजकिंजल्कपीतकौशे
यवाससं श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरं २ मत्तद्विरेफकलया परीतं वनमालया परार्ध्य
हारवलयकिरीटांगदनूपुरं ३ कांचीगुणोल्लसच्छ्रोणीं हृदयांभोजविष्टरं दर्शनीयतमं शांतं
मनोनयनवर्द्धनं ४

प्रसन्नं वदनांभोजं यस्य तं ध्यायेदिति षष्ठेनान्वयः पद्मगर्भवदरुणे नेत्रे यस्य नीलोत्पलवत् श्यामं १ लसत्पंक
जस्य किंजल्कवत् पीतकौशेयवाससी यस्य श्रीवत्सो लांछनं वक्षसि यस्य भ्राजत्कौस्तुभेनामुक्ता संश्लिष्टा कंधरा
यस्य २ मत्तद्विरेफाणां कलो मधुरो ध्वनिर्यस्यां तया परीतं व्याप्तं परार्ध्यानि अमूल्यानि हारादीनि यस्य ३ कांचीगु
णेनोल्लसंती श्रोणिर्यस्य भक्तानां हृदयांभोजमेव विष्टरमासनं यस्य भक्तानां मनोनयनानि वर्द्धयति हर्षयतीति तथा ४

भा०स्क० अमुष्य हरेर्नाभिह्रदं ध्यायेत् कथंभूतं भुवनानां कोशस्य समूहस्य गुहा अधिष्ठानं यदुदरं तत्र स्थितं यत्र नाभि
१२० ह्रदे आत्मयोनेर्ब्रह्मणो धिषणा धिष्ण्यं अखिललोकात्मकं पद्मं व्यूढं उत्थितं तथा हरिन्मणिवृषौ मरकतम
णिश्रेष्ठाविव यौ स्तनौ तयोर्द्वयं ध्यायेत् विशदहाराणां मयूखैर्गौरं श्वेतं १४ ऋषभस्य श्रेष्ठस्य महाविभूतेर्म

नाभिह्रदं भुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोकपद्मं व्यूढं हरिन्मणिवृषस्तनयोर
मुष्य ध्यायेद्द्वयं विशदहारमयूखगौरं १४ वक्षोधिवासमृषभस्य महाविभूतेः पुंसां मनोनयननि
र्वृतिमादधानं कंठं च कौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिललोकनमस्कृतस्य १५ बाहूं
श्च मंदरगिरेः परिवर्तनेन निर्णिक्तबाहुवलयानधिलोकपालान् संचिंतयेद्दशशतारमसह्यतेजः
शंखं च तत्करसरोरुहराजहंसम् १६ हृल्लक्ष्म्या अधिवासस्थानं वक्षः कंठं च मनसि कुर्यात् कथंभूतं कं
ठं च मनसि कुर्यात् कथंभूतं कंठं कौस्तुभो मणिर्यो भूषणार्थं धृतः तस्य अधिकं भूषणमर्थः प्रयोजनं यस्य कौस्तुभमणि
मेव स्वयमलंकुर्वतीत्यर्थः पुंसां स्त्रीणां हर्षणं च मनोनयनानां निर्वृतिमादधानमित्युभयोर्विशेषणं १५ नि
र्णिक्तानि उज्ज्वलीकृतानि वलयानि अंगदानि येषु अधिश्रिता लोकपाला येषु दशशतारं चक्रं न सह्यं तेजो यस्य त
स्य करसरोरुहे राजहंसमिव १६ ऽऽ ॥ ऽऽ ॥ = ॥ १२०

किंच यस्य शौचेन क्षालनेन निःसृतायाः सरित्प्रवरायाः गंगायाः उदकेन तीर्थेन संसारतारकेन मूर्ध्नि अधिकृते
न धृतेन शिवोपि शिवोभूत् अत्यधिकं सुखं प्रापेत्यर्थः ध्यातुर्मनसि जः शमलशैलः पापपर्वतः तस्मिन्निसृष्टं
क्षिप्तं वज्रमिव तत् यद्वा शमलशैलेन निसृष्टं तस्य लांछनरूपं वज्रं येन तत् १२ विभोर्जानुद्वयं तत्पर्यंतं जंघा
द्वयं अखिलस्य विधातुर्ब्रह्मणो जनन्या लक्ष्म्या संलालितं तत्स्पर्शचातुर्येण संसेवितं संसारित्वमिव प्रतीतवा

यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोभूत् ध्यातुर्मनःशमलशै
लनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविंदं १२ जानुद्वयं जलजलोचनया जनन्या लक्ष्म्याखिलस्य सु
रवंदितया विधातुः ऊर्वोर्निधाय करपल्लवरोचिषा यत्संलालितं हृदि विभोरभवस्य कुर्यात् ऊ
रू सुपर्णभुजयोरधिशोभमानावोजोनिधी अतसिकाकुसुमावभासौ व्यालंबिपीतवरवाससि
वर्तमानकांचीकलापपरिरंभि नितंबबिंबं १३

रयति अभवस्येति हृदि कुर्यात् ध्यायेत् सुपर्णस्य भुजयोः स्कंधयोः अधिशोभमानौ ओजसो बलस्य निधी
आधारौ अतसिकायाः कुसुमवत्कांत्या भासमानौ व्यालंबि आगुल्फं लंबमानं यत्पीतांबरं वासस्तस्मिन् व
र्तमानो यः कांचीकलापः तेन परिरंभः संश्लेषो विद्यते यस्य तद्विभोर्नितंबबिंबं हृदि कुर्यादिति पूर्वेणैवान्वयः १३

भा०तृ० अवनता ये अखिललोकास्तेषां तीव्रशोकेन यान्यश्रूणि तेषां सागरं विशोषयतीति तथा तं हरेर्हासं अत्युदा
१२२ रं भ्रूमंडलं च ध्यायेत् कथंभूतं निजमायया मकरध्वजस्यापि संमोहनाय रचितं मुनिकृते मुनीनामुपका
राय मुनीनां संमोहने प्रवृत्तम् काममेव मोहयितुमित्यर्थः २१ मंदहासध्यानमुक्त्वा स्फुटहासध्यान
माह विष्णोः प्रहसितं उच्चैर्हसितं ध्यायेत् कीदृशं ध्यानायनं अतिसुंदरतया प्रयत्नं विनैव ध्यानस्य वि

हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारम् संमोहनाय
रचितं [illegible] निजमाययास्य भ्रूमंडलं मुनिकृते मकरध्वजस्य २१ ध्यानायनं
प्रहसितं बहुलाधरोष्ठभासारुणायिततनुद्विजकुंदपंक्ति ध्यायेत्स्वदेहकुहरेवसि
तस्य विष्णोर्भक्त्यार्द्रयार्पितमना न पृथग्दिदृक्षेत् २२

षयभूतम् सौंदर्यमेवाह बहुलया अधिकया अधरोष्ठस्य भासा कांत्या अरुणीभूतास्तनवः सूक्ष्मा
द्विजाः एव कुंददलानि तेषां पंक्तिः स्फुरति यस्मिन् तत् दहरकुहरे हृदयाकाशे अवसितस्य ज्ञानस्य प्रेमरसे
नार्द्रया भक्त्या तस्मिन्नेवार्पितमनाः सन् पृथक् तद्व्यतिरिक्तं द्रष्टुं नेच्छेत् चित्तं न विचालयेदित्यर्थः २२

अरातयोयेभक्तायोद्धारस्तेषां शोणितमेवमेवकर्दमस्तेनदिग्धांलिप्तां अस्यकंठेमालांमणिंचस्मरेत् मधुव्रतानांव
रूथस्यगिराउपघुष्टांनादितां चैत्यस्यजीवस्यतत्त्वंतद्दुक्तं वेत्समवेत आत्मानमस्यंजगतोनिर्लेपमगुणमलंविमुक्ति
कौस्तुभमणिंस्वरूपंभगवान्हरिरिति १७ भक्तेष्वनुकंपिता कृतानुकंपायाधीःतयागृहीतामूर्तिर्येनतस्यविस्फुरती
येमकरकुंडलवल्गितेनप्रचलनेनविद्योतितौ अमलौ कपोलौ यस्मिन्तत् १८ यत्तुस्वयाभक्त्याशोभायाअलिभिःपरिवे

कौमोदकींभगवतोदयितांस्मरेतदिग्धामरातिभटशोणितकर्दमेन मालांमधुव्रतवरूथगिरोपघु
ष्टांचैत्यस्यतत्त्वममलंमणिमस्यकंठे १७ भृत्यानुकंपितधियेहगृहीतमूर्तेःसंचिंतयेद्भगवतोवदना
रविंदं यद्विस्फुरन्मकरकुंडलवल्गितेनविद्योतितामलकपोलमुदारहासं १८ यच्छ्रीनिकेतमलिभिः
परिसेव्यमानंभक्त्यास्वयाकुटिलकुंतलवृंदजुष्टं मीनद्वयाश्रयमधिक्षिपदब्जनेत्रंध्यायेन्मनोमय
५ पत्र मतंद्रितउल्लसद्भ्रु १९ तस्यावलोकमधिकंकृपयातिघोरतापत्रयोपशमनायनिसृष्टमक्ष्णोः स्निग्धस्मिता
नानुगुणितंविपुलप्रसादंध्यायेच्चिरंविततभावनयागुहायां २०

व्यमानंमीनद्वयाश्रयंचश्रीनिकेतंपद्ममधिक्षिपद्वर्तितेतंध्यायेत् तत्रकुंतलैःलीनामाक्षेपः नेत्रद्वयेनमीनद्व
यस्येतिद्रष्टव्यम् अब्जेइवनेत्रेयस्मिन्उत्तुपमानांतरं उल्लसंत्यौभ्रुवौयस्मिन् मनोमयंमनसाव्याविर्भवत् १९
कृपयाधिकमत्यर्थंअक्षिभ्यांनिसृष्टंप्रमुक्तं स्निग्धस्मितेनानुगुणितंसंयुक्तं विपुलःप्रसादोयस्मिन्गुहायां

भा०ए०
१२२

नच सुप्तोत्थित एव पुनः संसरतीत्याह सोपि सच पुरुषः तस्मिन्महिम्नि स्वस्वरूपे अवसितः अवसानं निष्ठां प्राप्तः कया
मनसो निरुत्त्या चरमया ऽविद्यारचितयेति स्तुत्याद्विशेषः तत्र हेतुर्विद्याकृतिर्न त्विदानीं अत्र हेतुः एतया योगाभ्यास
कृतयेत्यर्थः नन्वेवमपि सुखदुःखयोरात्मधर्मत्वे कुतो ब्रह्मैक्यं तत्राह दुःखयोः सुखयोः हेतुत्वं यत्स्वमात्मन्या
सीत् तदपि सति अविद्याकृते कर्त्तरि अहंकारे विधत्ते तन्निष्टमेव पश्यतीत्यर्थः यत उपलब्धपरात्मकाष्टः अपरोक्षी
कृतात्मतत्वः २५ तस्य जीवन्मुक्तिमाह देहं चेति द्वाभ्यां चरमः उत्क्रांतत्वरणसिद्धो देहमपि न विपश्यति कुतः सुखदुःखे

सोप्येतया चरमया मनसो निरुत्त्या तस्मिन्महिम्न्यवसितः सुखदुःखबाह्ये हेतुत्वमप्यसति कर्त्त
रि दुःखयोर्यत्स्वात्मन्विधत्त उपलब्धपरात्मकाष्टः २५ देहं च तं न चरमः स्थितमुत्थितं वा
सिद्धो विपश्यति यतोधिगमत्स्वरूपं दैवादपेतमथ दैववसादुपेतं वासो यथा परिकृतं मदिरा
मदांधः २६ देहोपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः तं सप्रपंचमधिरू
ढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तु २७

आसनादुत्थितं उत्थाय यत्रैव स्थितं तस्मात्स्थानादपेतं ततो दैववशात्पुनरपि उपेतं वा न विपश्यति यतः स्वरूपं प्राप्तः यतो
देहात्स्वरूपमध्यगमत् तं देहमिति वा सतोप्यननुसंधाने दृष्टांतः वासः परिकृतं कटिदेशे परिवेष्टितं स्थितं गतं वा मदिरामदे
नांधो यथा न पश्यतीति २६ ननु तर्हि देहस्य स्वकर्मप्रवृत्तिनिवृत्ति जीवनं वा तत्राह देहोपीति दैवं स्वकर्मसंस्कारस्तद्वशेन गच्छन्नयं या
वत्स्वारंभकं कर्मास्ति तावत्त्यातमीक्षते जीवत्येव सासुः सेंद्रियः ननु तर्हि तस्मिन् पुनः संगः स्यात्तत्राह तं देहं स्वप्नदेहं स्वप्न

अतएव प्रतिबुद्धं वस्तु आत्मतत्त्वं येन सः २७

देहादितुल्यं सप्रपंचं पुत्रादिसहितं पुनर्नभजते अहंमम
मेति नाभिमन्यते आरूढः प्राप्तः समाधिपर्यंतो योगो येन

१२२

समाधिमाह एवमिति द्वाभ्यां निर्वीजः सवीजश्चेति द्विविधो योगः तत्र निर्वीजयोगे यतो यतो निःसरति मन
श्चंचलमस्थिरं ततस्ततो नियम्यैतदात्मन्येव वशं नयेदिति गीतायुक्तमार्गेण क्रियमाणोपि दुष्करस्समाधिः सवीजे
तु सुकरः तत्र हि परमानंदमूर्तौ हरौ ध्यायमाने यत्नंतर एव चित्तोपरमो भवति तदुक्तं हृतात्मनो हृतप्राणांश्च भक्ति
रनिच्छतो गतिमण्वीं प्रयुंक्त इति अतः स एवोपदिशति योगस्य लक्षणं वच्मि सवीजस्येति तदेवायत्नसिद्धत्वं दर्शयति
एवं ध्यानमार्गेण हरौ प्रतिलब्धो भावः प्रेम येन भक्त्या द्रवत् हृदयं यस्य प्रमोदादुत्पन्नानि पुलकानि यस्य उत्कंठ्यप्रवृत्ताश्रु

एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् औत्कंठ्यबाष्पकलया मुहुरर्द्यमा
नस्तच्चापि चित्तबडिशं शनकैर्वियुंक्ते ३४ मुक्ताश्रयं यर्हि निर्विषयं विरक्तं निर्वाणमृच्छति मनः सहसा
यथार्चिः आत्मानमत्र पुरुषोऽव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ३५ ॥ ॥ ॥ ॥

कलया मुहुरर्द्यमानः आनंदसंप्लवे निमज्जमानः दुर्ग्रहस्य भगवतो ग्रहणे बडिशं मत्स्यबंधनमिव आशयभूतं चित्तमपि
ध्येयाद्वियुंक्ते तद्धारणाशिथिलप्रयत्नो भवतीत्यर्थः ३४ यर्हि यदा एवं निर्विषयं अत एव मुक्ताश्रयं च ध्येयसंबंधं विना ध्या
तृध्येयस्यानासंभवात् न च पूर्ववत् शब्दादिविषयः स्यात् यतस्तत्र विरक्तं परमानंदानुभवेन अतो निर्वाणमृच्छति वृत्तिरूप
तां परित्यज्य ब्रह्माकारेण परिणमत इत्यर्थः यथार्चिर्ज्वाला आश्रयविषयापगमे महाभूतज्योतीरूपेणामते अत्र अस्यां
दशायां अव्यवधानं ध्यातृध्येयविभागशून्यं एकं अखंडं आत्मानं गतमीक्षते अत्र हेतुः प्रतिनिवृत्तो गुणप्रवाहो देहोपाधि

भा०टी०
१२३

स्वांशस्य जीवस्य संबंधहेतुं दैवीं देवस्य विष्णोः शक्तिं परमाभाव्य तत्प्रसादेनैव जित्वा स्वरूपेण ब्रह्मत्वेनावतिष्ठ
ते॥३२॥इति तृतीये अष्टादशः॥२८॥एकोनत्रिंशके भक्तियोगस्तु वद्धोच्यते॥कालस्य च वर्त्तं घोरासंसृतिश्च
विरक्तये तत्रानुवाद पूर्वकं मार्गभेदान्पृच्छति द्वाभ्यां लक्षणं महदादीनां यथा सांख्येषु कथा कथितं येन लक्ष्

तस्मादिमां स्वां प्रकृतिं दैवीं सदसदात्मिकां॥ दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते॥३२॥इति श्री
मद्भागवते महापुराणे तृतीयस्कंधे साधनानुष्ठानं नामाष्टाविंशोध्यायः॥२८॥ देवहूतिरुवाच॥ लक्ष
णं महदादीनां प्रकृतेः पुरुषस्य च॥ स्वरूपं लक्ष्यतेमीषां येन तत्पारमार्थिकं॥ यथा सांख्येषु कथितं य
न्मूलं तत्प्रचक्ष्यते॥ भक्तियोगस्य मे मार्गं ब्रूहि विस्तरतः प्रभो॥१॥ विरागो येन पुरुषो भगवान्सर्वतो
भवेत् आचक्ष्व जीवलोकस्य विधा मम संसृतीः कालस्येश्वररूपस्य परेषां च परस्य ते स्वरूपं तव

२ वि

कुर्वंति यद्धेतोः कुशलं जनाः २

नतत्पारमार्थिकं परस्परविभक्तमित्यर्थः योभक्तियोगो मत्तं प्रयोजनं यस्य तत्तत् यन्मूलं तत्कथनं तस्य भक्ति
योगस्य मार्गप्रकारं विस्तरतो ब्रूहि १ येन संसृतीनां आख्यानेन विरक्तो भवेत् ईश्वररूपस्य महाप्रभा
वस्य ते चिदात्मकस्य यद्धेतोः यद्भयात् कुशलं पुण्यं कुर्वंति २॥

मा१

प्रतिषेध प्रकारमाह षड्भिः यथेति अस्नेहवशादात्मत्वेनाभिमतादपि पुत्रादेर्भिन्नत्वं पित्रादिः पुरुष देहादेर्द्रष्टा २८
पृथगस्यान्यभावेपि भेदे सदृष्टांतमाह यथोल्मुकात् इदानीं ज्वलतः काष्ठात्संभवात् अग्नेः संभृतात् आत्मत्वेन
अग्नेः स्वरूपत्वेनाभिमतादपि अत्यंताविवेकिनोपि भूमेरप्यग्न्यभिमानोस्ति उल्मुकात्स्वर्वस्तिष्ठापितदाहकः प्रकाशक
श्चाग्निः पृथगेव २९ भूतादेर्द्रष्टा तेभ्यः पृथक् तस्मादपि जीवसंज्ञिताद्ब्रह्मसंज्ञितः स पृथक् तथा प्रधानादपि तत्प्रव

यथा पुत्राच्च वित्ताच्च पृथक्त्वं प्रतीयते अथात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा २८ यथोल्मु
काद्विस्फुलिंगाद्धूमाच्चापि स्वसंभवात् अथात्मत्वेनाभिमताद्यथाग्निः पृथगुल्मुकात् २९ भू
तेंद्रियांतःकरणात्प्रधानाज्जीवसंज्ञितात् आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः २९ सर्व
भूतेषु चात्मानं सर्वभूतानि चात्मनि ईक्षेतानन्यभावेन भूतेष्वपि तदात्मता ३० स्वयोनिषु
यथा ज्योतिरेकं नाना प्रतीयते योनीनां गुणवैषम्यात्तथात्मा प्रकृतौ स्थितः ३१

त्तैको भगवान्पृथगित्यर्थः २९ उपाधितोप्येकमुक्त्वा तस्यैक्यमाह सर्वभूतेष्विति तदात्मतां महाभूता
त्मतां ३० धर्मभेदस्याप्यौपाधिकत्वे दृष्टांतमाह स्वयोनिषु काष्ठेषु ज्योतिरग्निः गुणवैषम्यात् दीर्घह्रस्वा
दिभेदात् प्रकृतौ देहे ३१ ॥

भा०तृ० तदेवं तामसादिभक्तित्रयस्य त्रयो भेदाः तासु च यथोत्तरं श्रेष्ठं एवं च श्रवणकीर्तनादयो नवापि प्रत्येकं नव नव भेदाः तदेवं स
१२४ गुणभक्तेरेकाशीतिभेदाः निर्गुणभक्तिरेकविधैव तामाह मद्गुणश्रुतिमात्रेणेति द्वाभ्यां अवच्छिन्ना संतता अहैतु
की फलानुसंधानशून्या अव्यवहिता भेददर्शनरहिता मद्गुणश्रुतिमात्रेण मयि पुरुषोत्तमे मनोगतिरिति या भक्तिः
सा निर्गुणभक्तियोगस्य लक्षणमित्यन्वयः लक्षणं स्वरूपं ८ भक्तानां निष्कामतां कैमुत्यन्यायेनाह सालोक्यं मया सहैकस्मि
मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये मनोगतिरविच्छिन्ना यथा गंगांभसोंबुधौ लक्षणं भक्तियोगस्य निर्गु
णस्य ह्युदाहृतं अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ९ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः १० स एव भक्तियोगाख्य आत्यंतिक उदाहृतः येनातिव्रज्य
त्रिगुणं मद्भावायोपपद्यते ११ निषेवितानिमित्तेन स्वधर्मेण महीयसा क्रियायोगेन शस्तेन नातिहिंस्रे
लोके वासः सार्ष्टिः समानैश्वर्यं सामीप्यं निकटवर्तित्वं सारूप्यं समानरूपता एकत्वं सायुज्यं ण नित्यशः १२
उत मयि दीयमानमपि न गृह्णन्ति कुतस्तत्कामनेत्यर्थः १० किमिति तर्हि भजन्तो भक्तेरेव परमफलत्वादित्याह स एवे
ति ननु त्रैगुण्यं हित्वा ब्रह्मप्राप्तिः परमफलं प्रसिद्धं सत्यं तत्तु भक्तावानुषंगिकमित्याह येन भक्तियोगेन मद्भावाय ब्रह्मत्वा
य ११ एवं भूताया भक्तेः साधनान्याह पंचभिः निषेवितेन सम्यगनुष्ठितेन अनिमित्तेन स्वधर्मेण नित्यनैमित्तिकेन महीय
सा श्रद्धादियुक्तेन क्रियायोगेन पंचरात्राद्युक्तपूजाप्रकारेण शस्तेन निष्कामेन १२

अचक्षुषः अन्धस्य अतो मिथ्याभूते देहादावभिमतिरहंकारो यस्य अतः कर्मस्वनुविद्धया आसक्तया धिया श्रान्तस्य अत
एव अनाश्रये अपारे तमसि संसारे चिरं प्रसुप्तस्य प्रबोधनाय त्वं योगप्रकाशको भास्करः किलाविर्भूतोसि ३ लिङ्गानां सद्
४ मार्गैः प्रकारविशेषैः तानेवाह स्वभावतो ये गुणास्तेषां मार्गे एव वृत्तिभेदेन भावः अभिप्रायः फलसंकल्पभेदाद्भक्तिभे
लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य तमस्यनाश्रये श्रान्तस्य कर्मस्वनुविद्धया धिया त्वमाविरासीः कि वि१
ल योगभास्करः ॥३॥ श्रीमैत्रेय उवाच ॥ इति मातुर्वचः श्लक्ष्णं प्रतिनन्द्य महामुनिः ॥ आबभाषे कुरुश्रेष्ठ प्रीतस्तां क
रुणार्दितः ॥४॥ श्रीभगवानुवाच ॥ भक्तियोगो बहुविधो मार्गैर्भाविनि भाव्यते ॥ स्वभावगुणमार्गेण पुंसां
भावो विभिद्यते ५ अभिसंधाय यो हिंसां दम्भं मात्सर्यमेव वा संरम्भी भिन्नदृग्भावं मयि कुर्यात्स तामः
सः ६ विषयानभिसंधाय यश ऐश्वर्यमेव च अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः ७ कर्म
निर्हारमुद्दिश्य परस्मिन्वा तदर्पणम् यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः ८

हइत्यर्थः ५ अभिसंधाय संकल्प्य संरम्भः क्रोधो भिन्नदृक् भेददर्शी यो भावं भक्तिं कुर्यात् स त्रिविधोपि तामसः
६ पृथक्भावः भेददर्शी ७ कर्मनिर्हारं पापक्षयं परस्मिन् परमेश्वरे तदर्पणं कर्मार्पणं भगवत्प्रीतिमुद्दिश्ये
त्यर्थः यष्टव्यमिति विधिसिद्धिमुद्दिश्येत्यर्थः भेददर्शित्वम् अर्चादावर्चितम् त्रिष्वपि समानम् ८ ॥

भा० त०
१२५

तर्हि किमर्चादावर्चनमनर्थकमेव नेत्याह अर्चादाविति सर्वभूतेष्ववस्थितं मां स्वहृदि यावन्न वेद स्वकर्मकृत्
कर्माविरोधेन यथावकाशं अनेन कर्मनिष्ठाया अपि स एवावधिरित्युक्तं भवति २२ आत्मनश्चान्तरं अन्यस्यान्तरं अल्प
मपि भेदं यः पश्यतीत्यर्थः यद्वा अन्तरा मध्ये उदरं शरीरं मृत्युरहं तस्य भयं विदधे करोमि २३ अथ अतः सर्वभूते
षु कृतालयं कृतावासं तत्र हेतुः भूतानामात्मानमन्तर्यामिणं अभिन्नेन च चक्षुषा समदर्शनेन २४ तत्रापि यथोत्तरम्

अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितं २२ आत्मनश्च प
रस्यापि यः करोत्यन्तरोदरं तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणं २३ अथ मां सर्वभूतेषु भू
तात्मानं कृतालयं अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा २४ जीवाः श्रेष्ठा ह्यजीवानां ततः प्राण
भृतः शुभे ततः सचित्ताः प्रवरास्ततश्चेन्द्रियवृत्तयः २५ तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः तेभ्यो गं
धविदः श्रेष्ठास्ततः शब्दविदो वराः २६ मानाद्यतिशयः कर्तव्य इति वक्तुं तारतम्यमाह सार्द्धैः षड्भिः अजीवानां अचेतने
भ्यः ततः तेष्वपि प्राणभृतः प्राणवृत्तिमन्तः सचित्ता ज्ञानवन्तः इंद्रियाणां वृत्तयो येषु इंद्रियवृत्तयो वृक्षाणामपि स्पर्शाः
संत्येव तथाहि महाभारते मोक्षधर्मे स्मर्यते तस्मात् पश्यन्ति पादपाः तस्माज्जिघ्रंति पादपा इति प्रभृतास्तत्र तु स्पर्शनें
द्रियवृत्तिरेव २५ अतस्तेभ्यः स्पर्शवेदिभ्यो रसवेदिनो मत्स्यादयः श्रेष्ठाः गंधविदो भ्रमरादयः शब्दविदः सर्पादयः २६॥

१२५

मद्धिष्ण्यं मत्प्रतिमादि तस्य दर्शनादिभिः सत्वेन धैर्येण असंगेन वैराग्येण १३ मद्धर्मिणः भगवद्धर्मानुष्ठातुः पुरुषस्याशय
श्चित्तं १४ प्रयत्नं विनैव प्राप्नोतीत्याह यथेति वातो रथः प्रापको यस्य आशयात्स्थानात् आवृंक्ते आत्मसात्करोति अविकारि सत्तय

मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः भूतेषु मद्भावनया सत्वेनासंगमेन च १३ महतां बहुमानेन दीना
नामनुकंपया मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च १४ आध्यात्मिकानुश्रवणान्नामसंकीर्तनाच्च मे
आर्जवेनार्यसंगेन निरहंक्रियया तथा १५ मद्धर्मणो गुणैरेतैः परिसंशुद्ध आशयः पुरुषस्यांजसा
भ्येति श्रुतमात्रगुणं हि मां १६ यथा वातरथो घ्राणमावृंक्ते गंध आशयात् एवं योगरतं चेत आत्मानमवि
कारि यत् १७ अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा तमवज्ञाय मां मर्त्यः कुरुतेर्चाविडंबनं १८
यो मां सर्वेषु भूतेषु संतमात्मानमीश्वरम् हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः १९ द्वि
षतः परकाये मां मानिनो भिन्नदर्शिनः भूतेषु बद्धवैरस्य न मनः शांतिमृच्छति २० अहमुच्चाव
चैर्द्रव्यैः क्रिययोत्पन्नयानघे नैव तुष्येर्चितोर्चायां भूतग्रामावमानिनः २१

चेतः १५ चित्तशुद्धस्य सर्वभूतात्मदृष्टिर्भवतीति वक्तुं केवलप्रतिमादिनिष्ठान्निंदन्नाह अहमिति सप्तभिः अ
र्चाविडंबनमनुकरणं अर्चायां पूजाविडंबनमिति वा अवज्ञोपेक्षाद्वेषनिंदाः क्रमेण चतुर्भिर्निषिध्यंते १६ हित्वा
उपेक्ष्य १७ द्रव्यैरुत्पन्नया क्रियया भूतग्रामावमानिनः तन्निंदकस्य १८ १९ २० २१

नानासंसृतिलक्षणं यस्मात्तत् दैवप्रेरितकर्मकृताः संसृतयो विचित्रा इत्यर्थः एतदेव भगवतो रूपं काल इति चाभिधी
यते कीदृशं रूपभेदस्य वस्तूनामन्यथात्वस्य आस्पदं आश्रयः कारणं तत्के हि कालो गुणव्यतिकर इति वक्ष्यते गुणव्य
तिकरः काल इति दिव्यं अद्भुतप्रभावं ३३ तदेवाह भूतानामिति यावत्समाप्तिः महदादीनां तत्तदभिमानिनां जीवानां

रूपं भेदास्पदं दिव्यं काल इत्यभिधीयते ३३ भूतानां महदादीनां यतो भिन्नदृशां भयं योन्तः प्रविश्य भू
तानि भूतैरत्त्यखिलाश्रयः स विष्ण्वाख्योधियज्ञोसौ कालः कलयतां प्रभुः ३४ न चास्य कश्चिद्दयितो
न द्वेष्यो न च बांधवः आविशत्यप्रमत्तोसौ प्रमत्तं जनमंतकृत् ३५ यद्भयाद्वाति वातोयं सूर्यस्तपति
यद्भयात् यद्भयाद्वर्षते देवो भगणो भाति यद्भयात् ३६ यद्वनस्पतयो भीता लताश्चौषधिभिः सह स्वे
स्वे कालेभिगृह्णंति पुष्पाणि च फलानि च ३७ स्रवंति सरितो भीता नोत्सर्पत्युदधिर्यतः अग्निरिंधे सगि
रिभिर्भूर्न मज्जति यद्भयात् ३८ नभो ददाति श्वसतां पदं यन्नियमाददः लोकं स्वदेहं तनुते महान्स
.न्य१
प्तभिरावृतं ३९

भयहेतुमाह भूतैरेव भूतानि संहरति अधियज्ञः यज्ञफलदाता कलयतां वशीकुर्वतां ३४ ३५ ३६ यद्यस्मा
द्भीताः ३७ यतो भीताः सरितः स्रवंति इंधे दीप्यते सह गिरिभिर्भूः ३८ अदो नभः यन्नियमात् यस्याज्ञया महान्
महत्तत्त्वं अंकुरात्मकं स्वदेहं लोकत्वेन विस्तारयति ३९

रूपभेदविदः काकादयः उभयतोदंता येषां अपादेभ्यस्तेभ्यो वहुपदाः तेभ्यश्चतुष्पदा इत्यर्थः द्विपात् मनुष्यः २७ ततः ते
षु वर्णाः २८ संशयछेत्ता मीमांसकस्ततोपि केवलात्स्वकर्मकृत् मुक्तसंगस्य लक्षणं आत्मनोधर्ममदोग्धा निष्काम इत्य
र्थः २९ अर्पिता अशेषाः क्रियाः अर्थाः फलानि आत्मा देहश्च येन अत एव निरंतरः अव्यवहितः ३० अकर्तुः कर्तृत्वाभिमा

रूप भेदविदस्तत्र ततश्चोभयतोदतः तेषांवहुपदाः श्रेष्टाश्चतुष्पादास्ततोद्विपात् २७ ततोवर्णाश्चचत्वा
रस्तेषांब्राह्मणउत्तमः ब्राह्मणेष्वपिवेदज्ञोह्यर्थज्ञोभ्यधिकस्ततः २८ अर्थज्ञात्संशयछेत्ता ततःश्रेयान्स्वकर्म
कृत् मुक्तसंगस्ततोभूयानदोग्धाधर्ममात्मनः २९ तस्मान्मय्यर्पिताशेषक्रियार्थात्मानिरंतरः ३० मय्यर्पि
तात्मनःपुंसोमयिसंन्यस्तकर्मणः नपश्यामिपरंभूतमकर्तुःसमदर्शनात् ३१ मनसैतानिभूतानिप्रणमे
द्बहुमानयन् ईश्वरोजीवकलयाप्रविष्टोभगवानिति ३२ भक्तियोगश्चयोगश्चमयामानव्युदीरितः य
योरेकतरेणैवपुरुषःपुरुषंव्रजेत् ३२ एतद्भगवतोरूपंब्रह्मणःपरमात्मनः परंप्रधानपुरुषंदैवकर्मविचे
ष्टितं ॥

नशून्यात् ३१ जीवानां कलया परिकलनेन अंतर्यामितया प्रविष्ट इति दृष्ट्वेत्यर्थः ३२ उक्तं भक्तियोगं
पूर्वोक्तेनाष्टांगयोगेन सहोपसंहरति भक्तियोगश्चेति हे मानवि पुरुषं परमेश्वरं ३२ यदन्यत्पृष्टं जीवस्य संसृतीः कालस्य स्वरूपंचत
द्वेति तदाह एतदिति सार्धेन एतत्सर्वनियंतृ यद्भगवतोरूपं कीदृशं प्रधानपुरुषात्मकं परं तद्व्यतिरिक्तं च एतदेव दैवमित्यभि

त्यभिधीयते कीदृशं कर्मणां विचेष्टितं ॥

दुर्मतित्वं दर्शयन्दुःखं प्रपंचयति जंतुरिति चतुर्दशभिः ४ नारक्यां नरकाहारादिभिर्जातायां ५ निरूढमू
लं प्रसृतमनोरथं हृदयं यस्य बहु मन्यते कृतार्थोहमिति श्लाघते ६ उद्वहनादिना पोषणचिंतया ७ दुरा

जंतुर्वै भव एतस्मिन्यां यां योनिमनुव्रजेत् तस्यां तस्यां स लभते निर्वृतिं न विरज्यते ४ नरकस्थोपि
देहं वै न पुमांस्त्यक्तुमिच्छति नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः ५ आत्मजायासुतागारप
शुद्रविणबंधुषु निरूढमूलहृदय आत्मानं बहु मन्यते ६ संदह्यमानसर्वांग एषामुद्वहनादि
ना करोत्यविरतं मूढो दुरितानि दुराशयः ७ आक्षिप्तात्मेंद्रियः स्त्रीणामसतीनां च मायया रहो रचि
तयालापैः शिशूनां कलभाषिणां गृहेषु कूटधर्मेषु दुःखतंत्रेष्वतंद्रितः कुर्वन्दुःखप्रतीकारं सुख
वन्मन्यते गृही ८ अर्थैरापादितैर्गुर्व्या हिंसयेतस्ततश्च तान् पुष्णाति येषां पोषेण शेषभुग्यात्यधः
स्वयं पुमान् ९ वार्तायां लुप्यमानायामारब्धायां पुनः पुनः लोभाभिभूतो निःसत्वः परार्थे कुरुते स्पृहां १०

प्रयत्नमाह आक्षिप्त आत्मा इंद्रियाणि च यस्य कायाः असतीनां पुंश्चलीनां परिहासरचितया संभोगादिरूपया मधुरभाषि
णां शिशूनामालापैश्च सुखवन्मन्यत इत्युत्तरेणान्वयः कूटा वित्तशाठ्यादि विकलाधर्मा येषु दुःखप्रधानेषु ८ येषां पोष
णेनाधो याति तान्पुष्णाति शेषभुगिति भोगोपि तस्य दुर्लभ इत्यर्थः ९ वार्तायां जीविकायां निःसत्वः असक्तः परा

ना

गुणाभिमानिनो गुणनियंतारो देवा ब्रह्मादयः अस्य विश्वस्य सर्गादिषु वर्त्तंते अनुयुगं वारंवारमित्यर्थः ६० जनेनेति पित्रा
दिना जनं पुत्रादिं जनयन् हितकृत् मृत्युनांतकमपि मारयन्नंतकरः स्वयं त्वनादिरनंतोऽव्ययश्च ६१ इति तृतीये एको
नत्रिंशः २९ त्रिंशे तु कालकांतादिलालनाकुलचेतसां कामिनां तामसीपापादधोगतिरुदीर्यते कालप्रभावव

गुणाभिमानिनो देवाः स्वर्गादिष्वस्य यद्भयात् वर्त्तंतेनुयुगं येषां वश एवं चराचरं ॥ ६० ॥ सोनंतोऽं[illegible]तकरः
कालोऽनादिरादिकृदव्ययः जनं जनेन जनयन् मारयन्मृत्युनांतकं ॥ ६१ ॥ इति श्रीमद्भागवते महापुराणे
तृतीयस्कंधे एकोनत्रिंशोध्यायः ॥ २९ ॥ श्रीभगवानुवाच ॥ तस्यैतस्य जनो नूनं नायं वेदोरुविक्रमं काल्य
मानोपि बलिनो वायोरिव घनावलिः ॥ १ ॥ यं यमर्थमुपादत्ते दुःखेन सुखहेतवे तं तं धुनोति भगवान् पुमा
न् शोचति यत्कृते २ यदध्रुवस्य देहस्य सानुबंधस्य दुर्मतिः ध्रुवाणि मन्यते मोहाद्गृहक्षेत्रवसूनि च ३

ऽनर्थकं वैराग्याय विचित्रकर्मकृतां संसृतिमध्यायद्वयेन प्रपंचयति तस्यैतस्य बलिनः कालस्य चालितावाधावः
काल्यमानोपि चाल्यमानोपि वायोर्विक्रमं यथा मेघपंक्तिर्न वेद १ विक्रममेवाह यं यमर्थं दुःखेन प्रयासेनोपादत्ते
आपादयति तं तं भगवान्कालो विधुनोति विनाशयति यत्कृते यन्निमित्तं २ शोके हेतुः यद्यस्मात्सानुबंधस्य कलत्र
स्य कलत्रादिसहितस्य देहस्य संबंधीनि गृहादीनि वसु द्रव्यं अनुक्तं समुच्चयार्थश्चकारः ३ ॥ ऽऽ ॥ ऽऽ

धी

आवृत्य निरुध्य १८ तयोस्तर्जनैर्निर्भिन्नं हृदयं यस्य आर्तः सन् चलतीति द्वितीयेनान्वयः क्षुत्तृड्भ्यां परितो व्याप्तः त
प्ताः वालुका यस्मिन् निर्गत आश्रमो विश्रामस्थानमुदकं च यस्मिन् १९ यमसादनं नीतो भवति २० तत्रैव विशेषमाह

यातनादेह आवृत्य पाशैर्बद्ध्वा गले बलात् नयतो दीर्घमध्वानं दंड्यं राजभटा यथा १८ तयोर्निर्भिन्नहृद
यस्तर्जनैर्जातवेपथुः पथि श्वभिर्भक्ष्यमाण आर्त्तो घं स्वमनुस्मरन् क्षुत्तृट्परीतोऽर्कदवानलानिलैः
संतप्यमानः पथि तप्तवालुके कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोपि निराश्रमोदके १९ त
त्र तत्र पतञ्छ्रान्तो मूर्छितः पुनरुत्थितः यथा पापीयसा नीतस्तमसा यमसादनं २० योजनानां स
हस्राणि नवतिं नव चाध्वनः त्रिभिर्मुहूर्त्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः २१ आदीपनं स्वगात्रा
णां वेष्टयित्वोल्मुकादिभिः आत्ममांसादनं क्वापि स्वकृत्तं परतोपि वा २२ जीवतश्चांत्राभ्युद्धा
रः श्वगृध्रैर्यमसादने सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसं २३ कृंतनं चावयवशो गजा
दिभ्यो भिदापनं पातनं गिरिशृंगेभ्यो रोधनं चांबुगर्त्तयोः २४ यास्तामिस्रांधतामिस्रा रौरवाद्याश्च यातनाः
भुंक्ते नरो वा नारी वा मिथः संगेन निर्मिताः २५

अध्वनः संबंधिनां योजनानां नवतिं नव च सहस्राणि पापाधिक्ये द्वाभ्यां नीतः सन् २१ यातनाः संक्षेपतो दर्शयति च
तुर्भिः आदीपनं ज्वलनं प्राप्नोति स्वेन कृत्तं अन्येन वा कृत्तं छिन्नं यत्स्वस्य मांसं तस्य भक्षणमित्यर्थः २२ आत्मनो वै

अकल्पः असमर्थः ११ एवं यथा आद्रियंते तथा आदरं न कुर्वंति कीनाशाः कृपणाः कृषीवलाः गोजरं वृद्धबलीवर्दं
१२ भ्रियमाणः पुष्यमाणः अवमत्या अवज्ञया उपन्यस्तं समीपे प्रक्षिप्तं गृहपालः श्वा आहारान् भुंजमानः १३ आमया

कुटुंबभरणाकल्पो मंदभाग्यो वृथोद्यमः श्रिया विहीनः कृपणो ध्यायन् श्वसिति मूढधीः ११ एवं स्वभर
णाकल्पं तत्कलत्रादयस्तथा नाद्रियंते यथा पूर्वं कीनाश इव गोजरं १२ तत्राप्यजातनिर्वेदो भ्रियमा
णः स्वयं भृतैः जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे आस्तेवमत्योपन्यस्तं गृहपाल इवाहरन् १३ आ
मयाव्यप्रदीप्ताग्निरल्पाहारोल्पचेष्टितः वायुनोत्क्रमतोत्तारः कफसंरुद्धनाडिकः कासश्वासकृतायासः
कंठे घुरुघुरायते १४ शयानः परिशोचद्भिः परिवीतः स्वबंधुभिः वाच्यमानोपि न ब्रूते कालपाशवशं
गतः १५ एवं कुटुंबभरणे व्यापृतात्माजितेंद्रियः भ्रियते रुदतां स्वानामुरुवेदनयास्तधीः १६ यम
दूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुंचति १७

वी रोगी उत्तारो वह्निर्निर्गतनेत्रः कफेन संरुद्धा नाड्यो मार्गा भक्ता यस्य तेन कासश्वासाभ्यां कृत आयासो यस्य घुरुघुरं इति श
ब्दं करोति १४ परिवीतः परिवेष्टितः वाच्यमानः बंधोनाते त्याक्ष्यमानः १५ अस्तधीः नष्टमतिः १६ मृतस्य पुण्यपापा
भ्यां हृगती तत्र पापगतिमाह यमदूतावित्यादि यावत्समाप्तिः सरभसं सक्रोधं ईक्षणं ययोस्तौ दृष्ट्वा १७ ॥ ऽऽ ॥ ऽ॥

एकत्रिंशे विमिश्रैस्तु पुण्यपापैरिहांतरं मनुष्ययोनिसंप्राप्तिर्वर्ण्यते राजसी गतिः पुनरत्राव्रजेदित्युक्तं तदेव विशे
षतो दर्शयति कर्मणा पूर्वकृतेन दैवमीश्वरं तदेव नेत्रं नेतृ प्रवर्तकं यस्य प्रविष्टो भवति १ कललं शुक्रशो
णितमिश्रितं भवति ॥ बुद्बुदं वर्तुलं कर्कंधुः बदरीफलं तदाकारं कठिनं पेशी मांसपिंडाकारं अंडं वान्यतरे २ वा

श्रीभगवानुवाच ॥ कर्मणा दैवनेत्रेण जंतुर्देहोपपत्तये स्त्रियाः प्रविष्ट उदरं पुंसो रेतःकणाश्रयः १
कललं त्वेकरात्रेण पंचरात्रेण बुद्बुदं दशाहेन तु कर्कंधुः पेश्यंडं वा ततः परं २ मासेन तु शिरो
द्वाभ्यां बाह्वंघ्र्याद्यंगविग्रहः नखलोमास्थिचर्माणि लिंगच्छिद्रोद्भवस्त्रिभिः ३ चतुर्भिर्धातवः स
प्त पंचभिः क्षुत्तृडुद्भवः षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे ४ मातुर्जग्धान्नपानाद्यैरेधद्धा
तुरसंमते शेते विण्मूत्रयोर्गर्ते स जंतुर्जंतुसंभवे ५ कृमिभिः क्षतसर्वांगः सौकुमार्यात्प्रतिक्षणं
मूर्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः ६

बाह्वंघ्र्याद्यंगानां विग्रहो विभागः लिंगच्छिद्राणि च तेषामुद्भवः ३ जरायुणा गर्भवेष्टनेन वीतः ४ मातुर्जग्धेन भक्षि
तेनान्नेन पानाद्यैश्च एधमाना धातवो यस्य जंतूनां संभवो यस्मिन् तस्मिन्नसंमते गर्ते शेते तथा मार्कंडेयपुराणे
नाड्याप्यायनी नाम नाभ्यां तस्य निबध्यते स्त्रीणां तथांत्रसुषिरे सा निबद्धोपजायते क्रमंते भुक्तपीतानि स्त्रीणां गर्भोद
रे तथा तैराप्यायितदेहोसौ जंतुर्वृद्धिमुपैति वा इति ५ तत्रत्यैः कृमिभिः खादद्भिः सौकुमार्यात् कोमलत्वेन क्षतानि

न चैतदसंभावितं ॥ अत्रापि दृश्यमानत्वादित्याह ॥ अत्रैवेति ॥ मुधीं भयं कुटुंबं स्वदेहं च ॥ २७ पापार्जितं धनं भुंजते वदन्
कर्तैव तु नरकं यातीत्याह ॥ एक इति ॥ भूतद्रोहेण यद्भृतं तत्तस्य स्थूलकलेवरं च देहं वहित्वा ॥ कुशलादितरत् ॥ पापं तदेव पाथेयं
भोग्यं यस्य ॥ २८ ॥ ननु पापमपि विहाय गच्छेत्तत्राह ॥ दैवेनेति ॥ तस्य कुटुंबपोषणस्य शमलं पापं दैवेनेश्वरेणार्पितं भुंक्ते २९

अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते ॥ या यातना वै नारक्यस्ता इहाप्युपलक्षिताः ॥ २६ ॥ एवं कुटुंबं बिभ्राण
उदरंभर एव वा ॥ विसृज्येहोभयं प्रेत्य भुंक्ते तत्फलमीदृशं ॥ २७ ॥ एकः प्रपद्यते ध्वांतं हित्वेदं स्वकलेवरं ॥ कु
शलेतरपाथेयो भूतद्रोहेण यद्भृतं ॥ २८ ॥ दैवेनासादितं तस्य शमलं निरये पुमान् ॥ भुंक्ते कुटुंबपोषस्य हृ
तवित्त इवातुरः ॥ २९ ॥ केवलेन ह्यधर्मेण कुटुंबभरणोत्सुकः ॥ याति जीवोऽन्धतामिस्रं चरमं तमसः पदं
स २ ॥ ३० ॥ अधस्तान्नरलोकस्य यावतीर्यातनादयः ॥ क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः ॥ ३१ ॥ इति श्रीमद्भा
गवते महापुराणे तृतीयस्कंधे कर्मविपाकस्त्रिंशतितमोध्यायः ॥ ३० ॥ ॥ ॥ ॥ ० ॥ ॥ ० ॥ ॥ ॥

न कुटुंबपोषणं विहितमेव तत्राह केवलेनेति ॥ तमसो नरकस्य च परमं पदं स्थानं ॥ ३० ॥ पुनर्मनुष्यशरीरप्राप्तिकार
णमाह ॥ नरलोकस्य मनुष्यदेहप्राप्तेरधस्तात् ॥ अर्वाक् यावत्यो यातनाः ॥ आदिशब्देन श्वकुक्कुरादयो योनयस्ताः सर्वाः
क्रमेण संप्राप्य भोगेन क्षीणपापः शुचिः सन् ॥ अत्र पुनर्नरत्वं प्राप्नोतीत्यर्थः ॥ ३१ ॥ इति तृतीये त्रिंशः ॥ ३० ॥ ॥ ॥

भा० त० ननु कोसौ यं शरणं व्रजसीति कोवा तव तस्य च विशेषस्तत्रैन सेव्यसेवक[illegible]त्वमित्यपेक्षायामाह अत्र मातुर्देहे
१३० भूतेंद्रियाशयमयीं देहाकारपरिणतां मायां वलंब्य आश्रित्य कर्मभिरावृतस्वरूपः सन् एव आस्ते सोहं अस्तु अत्रैवास्ते
तं नमामि कथंभूतमित्यपेक्षायां तु शब्दोक्तं विशेषं दर्शयति आतप्यमाने हृदये ऽवसितं प्रतीतं एवमप्यविका
रं कुतः विशुद्धं निरुपाधिं न कुतः अखंडो बोधो यस्य तं १२ ननु त्वमपि वस्तुतः शुद्ध एव असंगो ह्ययं पुरुष इत्यादि

यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेंद्रियाशयमयीमवलंब्य मायां आस्ते विशुद्धमवि
कारमखंडबोधमातप्यमानहृदयेऽवसितं नमामि १२ यः पंचभूतरचिते रहितः श
रीरे छन्नो यथेंद्रियगुणार्थचिदात्मकोहं तेनाविकुंठमहिमानमृषिं तमेनं वंदे परं प्र
कृतिपूरुषयोः पुमांसम् १३

अतः तत्कथं युवयोरयं विशेषः तत्राह यः पंचभिर्भूतैः रचिते शरीरे अयथा मिथ्यैव छन्नः न वस्तुतः यतस्तेन
शरीरेण रहितः प्रसंगः अयथैवेंद्रियगुणार्थचिदात्मकः इंद्रियाणि गुणाश्च अर्थाश्च चिदाभासश्च तदात्मकः
सोहं तं वंदे कथंभूतं तेन शरीरेण अविकुंठो महिमा यस्य तं अवगुंठेति पाठे अवरुद्ध एव सन् गुंठनमाचरणं यस्य
महिमा यस्येत्यर्थः तत्र हेतुः प्रकृतिपुरुषयोः परमं नियंतारं कुतः सर्वज्ञविद्याशक्तिकृतो विशेष इति भावः १३ ॥

॥ उल्बणैः दुःसहैः सर्वेष्वंगेषु उत्थिता वेदना यस्य आस्त इत्युत्तरेणान्वयः उल्बेन जरायुणा भुग्नं कुटिलीभूतं पृष्ठं शि
रोधरा ग्रीवा च यस्य ७ दैवात्पूर्वकर्मवशात् लब्धा स्मृतिर्येन दीर्घं दूरं अनुच्छ्वासं यथा भवति तथा तत्र स्थितः सन् ८
सूतिहेतुभिर्वातैर्वेपितः सोदरः समानोदरजन्मा विष्ठाभूः कृमिरिव ९ नाथमानो याचमानः उपतप्यमान इति वा ऋ

कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिरुल्बणैः मातृभुक्तैरुपस्पृष्टः सर्वांगोत्थितवेदनः उल्बेन संवृतस्तस्मिन्नं
त्रैश्च बहिरावृतः आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ॥ अकल्पः स्वांगचेष्टायां शकुंत इव पंजरे ७
तत्र लब्धस्मृतिर्दैवात्कर्म जन्मशतोद्भवं स्मरन्दीर्घमनुच्छ्वासं शर्म किं नाम विंदते ॥ ८ ॥ आरभ्य सप्तमा
न्मासाल्लब्धबोधोऽपि वेपितः नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः ॥ ९ ॥ नाथमान ऋषिर्भीतः सप्तवध्रिः कृतांज
लिः स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः १० ॥ जीव उवाच ॥ तस्योपसन्नमवितुं जगदिच्छयात्तनानात
नोर्भुवि चलच्चरणारविंदं सोऽहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यसतोऽनुरूपा ११

षिर्देहात्मदर्शी भीतः पुनर्भवात् सप्तवध्रयो बंधनभूता धातवो यस्य सः विक्लवया आकुलया १० उपसन्नं जगद्रक्षि
तुं स्वेच्छया गृहीतनानातनोर्भगवतश्चरणारविंदमकुतोभयं सोऽहं शरणं व्रजामि भुवि चलदिति श्रीकृष्णावताराभि
प्रायेण असतो मे अनुरूपा योग्या येनेदृशी गर्भवासलक्षणा गतिर्दर्शिता तस्य ११

तत्कृतमुपकारं स्मरन्नाह एनेदृशीं गतिं ज्ञानं भवादृशेनेति निरुपमेनेत्यर्थः स्वकृतेनैव स्वयं तुष्यतु अंजलिमा
त्रेन तत्कृतोपकारे प्रत्युपकारकः कुर्यादित्यर्थः १७ ईदृशीं गतिमित्यनेन जात्यन्तविलक्षणं ज्ञानं प्रापितवानित्यु
क्तं तदेव वैलक्षण्यमाह पश्यतीति अयमपरः पश्वादिभिः सप्तवध्रिः जीवः स्वदेहशरीरके शरीरभवे भवे
सुखदुःखे केवलं न तु पश्यतीति अहं पुनर्यत्सृष्ट्याधिषण्याय दृत्तेन विवेकज्ञानेन दमशरीरं दमं इत्युप

येनेदृशीं गतिमसौ दशमास्य ईश संग्राहितः पुरुदयेन भवादृशेन स्वेनैव तुष्यतु कृतेन स दी
ननाथः को नाम तत्प्रति विनांजलिमस्य कुर्यात् १७ पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीर
केदमशरीर्यपरः स्वदेहे यत्सृष्टयासत महं पुरुषं पुराणं पश्ये वहिर्हृदि च चैत्यमिव प्रतीतं १८ सोऽ
हं वसन्नपि विभो वहुदुःखवासं गर्भान्न निर्जिगमिषे वहिरंधकूपे यत्रोपयातमुपसर्पति देवमाया
मिथ्यामतिर्यदनु संसृतिचक्रमेतत् १९

लक्षणं शमदमादियुक्तशरीरवान् आसं भवे तमेव च पुराणं अनादिपुरुषं वहिश्च हृदि च पश्ये पश्या
मीत्यन्वयः कथं अपरोक्षतया प्रतीतं चैत्यमिव अहंकारास्पदं भोक्तारमिवेत्यर्थः १९ विवेकज्ञानकृतं संसारो
द्वेगमनुवदन्मोक्षमार्गमेवाध्यावसति सोहमिति द्वाभ्यां हे विभो वहुदुःखवासं यथा भवति तथा गर्भे वसन्नपि सो
हं गर्भाद्वहिर्निर्गंतुमिच्छामि तत्र हेतुः अंधकूपप्राये वहिःरूपे यातं गतं प्राणिनं देवमायया उपसर्पति व्याप्नोति यदनु यां

[illegible]

१३१

ननु ज्ञानयं बंधो निवर्त्स्यते किं परमेश्वरवंदनेन तत्राह यस्य मायया न प्रस्मृतिः सन् संसारसंबंधिनि कस्मिंश्चिद् वि
भ्रमे एवं तत्कृतेन क्लेशेन वर्चरन्नयं जीवः महतस्तस्यैवेश्वरस्यानुग्रहं विना पुनः कया युक्त्या निजस्वरूपं प्रवृणीत संभ
जेत अभिश्रमहेतुत्वेन पंथानं विशिनष्टि उरूणि गुणनिमित्तानि कर्माणि तैरेव बंधनानि यस्मिन् ईश्वरप्रसादं वि
विना ज्ञानाभावात् स एव सेव्य इत्यर्थः १४ ईश्वर एव ज्ञानद इत्युपपादयन्नाह यदेतत् त्रिकालविषयं ज्ञानं तत्त्वां विना कस्तमो

तन्मायया उरुगुणकर्मनिबंधनेस्मिन् सांसारिके पथि चरंस्तदभिश्रमेण नष्टस्मृतिः पुनरयं प्रवृणीत लोकं युक्त्या
कया महदनुग्रहमंतरेण १४ ज्ञानं यदेतददधात् कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्त्तितांशं
तं जीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनाय वयं भजाम १५ देह्यन्यदेहविवरे जठराग्निनासृ
ग्विण्मूत्रकूपपतितो भृशतप्तदेहः इच्छन्नितो विवसितुं गणयन् स्वमासान्निर्वास्यते कृपणधीर्भगवन्कदा
नु १६

सप्यदधात् न कोपि किंतु स देव ईश्वर एव अन्यः प्रकृष्टो जीवो दधातु नेत्याह जीवरूपां कर्मपदवीं
अनुवर्तमानावयमिति तद्व्यतिरेकेण न कोपि समर्थः अन्यस्य त्वसंभवमुक्त्वा तस्य संभवमाह स्थिरेषु चरेषु अं
तर्यामिरूपोऽनुवर्त्तितोंऽशो येन तं भजेम १५ स्वदुःखं विज्ञापयन्नाह देहीति अन्यदेहविवरे मातुरुदरे जठरे यो
ऽसृग्विण्मूत्रकूपः तस्मिन् पतितः तत्र जठराग्निना भृशं तप्तो देहो यस्य अतएव कृपणधीः इतो विवरात् विवसितुं
निर्गन्तुं इच्छन् स्वमासान् गणयन् असौ कदा नु अहो बहिर्निर्वास्यते १६

भा० त० आमकोमलत्वक् यस्य तं विगतं गर्भे ज्ञातं ज्ञानं यस्य २४ शैशवं पंचवर्षाणि ततः पौगंडयौवनादर्वाक् तत्रराध्य
१३२ यनादिदुःखं यौवनदुःखमाह सार्द्धैस्त्रिभिः अलब्धाभीप्सितत्वेन शुचार्पितः व्याप्तः अज्ञानादिद्धो दीप्तो मन्युर्य
स्य सः देहेन सहैव वर्द्धमानेन मन्युना च विरोधं करोति आत्मनोऽन्ताय नाशाय २५ अज्ञानं प्रपंचयति

तुदंत्यामत्वचं दंशा मशका मत्कुणादयः रुदंतं विगतज्ञानं कृमयः कृमिकं यथा २४ इत्ये
वं शैशवं भुक्त्वा दुःखं पौगंडमेव च अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः सह देहे
न मानेन वर्द्धमानेन मन्युना करोति विग्रहं कामी कामिष्वंताय चात्मनः २५ भूतैः पंचभिरारब्धे
देहे देह्यबुधोऽसकृत अहं ममेत्यसद्ग्राहः करोति कुमतिर्मतिं २६ तदर्थं कुरुते कर्म यद्बद्धो या
ति संसृतिं योऽनुयाति ददत्क्लेशमविद्याकर्मबंधनः २७ यद्यसद्भिः पथि पुनः शिश्नोदर
कृतोद्यमैः आस्थितो रमते जंतुस्तमो विशति पूर्ववत् २८ भूतैरारब्धे देहे असद्ग्राहोऽहं ममेति
मतिं करोति २६ तदर्थं देहाद्यर्थं यत् येन कर्मणा बद्धः यो देहं अनुयाति पुनः पुनरुपयाति अनुवर्तते इति वा
कृतः अविद्याकर्मभ्यां बध्यते इति तथा २७ यदि असद्भिः आस्थितः अधिष्ठितः सन् तेषां पथि रमते पिथि
सन्मार्गे आस्थितो यदि असद्भिः सह रमत इति वा तर्हि यातनादेह आवृत्येत्यादि पूर्वोक्तप्रकारेण नरकं प्र १३२

सत्१

तस्मादत्रैवस्थितोपिविगतविक्लवः अव्याकुलः सुहृदा आत्मनासारथिरूपयाबुद्ध्यैव आत्मानंतमसःसंसारादुद्ध
रिष्यामि अनेकरंध्रंनानागर्भवासरूपमेतद्व्यसनंदुःखंयथामेमाभविष्यत् तथा कोत्रतवसाधनसामग्री
तत्राह उपसादितोहृदयंप्राप्तोविष्णोःपादोयेनमयासह २० दशमास्यःपरिच्छेदकायस्येति एवंलक्षणोपल
क्षणं ऋषिर्जीवःसप्तात्क्षणमेवअवाचीनमवाङ्मुखं प्रसूतिहेतुर्मारुतःक्षिपतिनुदति २१ अवसृष्टः अ

तस्मादहंविगतविक्लवउद्धरिष्यआत्मानमाशुतमसःसुहृदात्मनैव भूयोयथाव्यसनमेतदनेकरंध्रंमा
भविष्यदुपसादितविष्णुपादः॥२०॥श्रीभगवानुवाच॥एवंकृतमतिर्गर्भेदशमास्यःस्तुवन्नृषिः सद्यःक्षि
पत्यवाचीनंप्रसूत्यैसूतिमारुतः॥२१॥तेनावसृष्टःसहसाकृत्वावाक्शिरआतुरः विनिष्क्रामतिकृच्छ्रेणनिरुच्छ्वा
सोहतस्मृतिः २२ पतितोभुविविण्मूत्रेविष्ठाभूरिवचेष्टते रोरूयतेगतेज्ञानेविपरीतांगतिंगतः परछंदं
नविदुषापुष्यमाणोजनेनसः अनभिप्रेतमापन्नःप्रत्याख्यातुमनीश्वरः शायितोऽशुचिपर्यंकेजंतुःस्वे
दजदूषिते नेशःकंडूयनेंगानामासनोत्थानचेष्टने २३

धःशिराःसन् २२ रोरूयति रोरूयते परस्य
छंदं अभिप्रायमविदुषा अनभिप्रेतं स्तन्यार्थेरोदने उदरव्यथांप्रकल्प्य निंबरसपानम् उदरव्यथाया
रोदनेस्तनपानमित्यादि आसनोत्थानचेष्टनेचानीशःसन्रोरूयति इत्यनुषंगः २३ ॥ रामरामराम

भा० ट०
२३३

शनैः शनैः शुश्रूषादिभिर्येणोपयाति स योषिद्रूपा मायामृत्युं प्रतिकूलमीक्षेत ३६ मुमुक्षोः स्त्रियं प्रत्येतदु-
ह यामिति द्वाभ्यां ऋषभायती पुरुषवदाचरंती यां मम मायां वित्तादिप्रदं पतिं मन्यते स्त्रीसंगतः अंतका-
ले स्त्रीध्यानेन स्त्रीत्वं प्राप्तो जीवः तां पत्यादिरूपं मृत्युं विजानीयात् मृगयोर्लुब्धकस्य गायनमनुकूलत्वे-
न प्रतीयमानमप्रियं यथा मृगस्य मृत्युः ३७ तदेवं जीवस्य संसृतिः प्रपंचिता तत्र च तस्य कर्मवशेन लोकाल्लोकां-

योपयाति शनैर्माया योषिद्देवविनिर्मिता तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतं ३६ यां मन्य-
ते पतिं मोहान्मन्मायामृषभायतीं स्त्रीत्वं स्त्रीसंगतः प्राप्तो वित्तापत्यगृहप्रदं तामात्मनो विजा-
नीयात्पत्यपत्यगृहात्मकं दैवोपशादितं मृत्युं मृगयोर्गायनं यथा ३७ देहेन जीवभूतेन लोका-
ल्लोकमनुव्रजन् भुंजान एव कर्माणि करोत्यविरतं पुमान् ३८ जीवो ह्यस्यानुगो देहो भूतेंद्रियमनोमयः
तन्निरोधोऽस्य मरणमाविर्भावस्तु संभवः ३९

तरगमनं जन्ममरणं चोक्तं तत्रैवं शंकते ननु व्यापकस्य कथं लोकाल्लोकांतरगमनं नित्यस्य कथं जन्ममरणे भोगेन क-
र्मक्षये च सति जन्ममरणं वध्यते तत्कुतः पुनरपि तस्य कर्मसंभव इति तत्र लोकांतरगमनं कर्म च संभवतीत्याह देहेने-
ति जीवस्योपाधितया भूतेन लिंगदेहेन लोकांतरमनुव्रजन् अविरतं कर्माणि करोतीति कर्मणामसमाप्तिरुक्ता ३८ ज-
न्ममरणसंभवमाह जीवो जीवोपाधिर्लिंगदेहः अस्यात्मनः अनुगः अनुवर्ती भूतेंद्रियमनोमयः स्थूलभूतादिवि-

कारो देहः भोगायतनं तत्योनिरोधः कार्याक्षमता तदस्य जीवस्य मरणमुच्यते आविर्भावस्तु संभवो जन्मोच्यते ३९

१३३

असत्संगं निंदति सत्यमिति त्रिभिः २९ खंडितात्मसु देहात्मबुद्धिषु योषित्क्रीडामृगवदधीनेषु ३० यथा च यो
षित्संगिनां संगतो बंधः तथान्यसंगतो न भवेत् ३१ योषित्संगस्यानर्थहेतुत्वं प्रपंचयति प्रजापतिरिति सप्तभिः रो

सत्यं शौचं दया मौनं बुद्धिर्ह्रीः श्रीर्यशः क्षमा शमो दमो भगश्चेति यत्संगाद्याति संक्षयं २९ तेष्व
शांतेषु मूढेषु खंडितात्मस्वसाधुषु संगं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ३० न तथास्य भवे
न्मोहो बंधश्चान्यप्रसंगतः योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ३१ प्रजापतिः स्वां दुहितरं दृष्ट्वा
तद्रूपधर्षितः रोहिद्भूतां सोन्वधावदृष्यरूपी हतत्रपः ३२ तत्सृष्टसृष्टसृष्टेषु को न्वखंडित
धीः पुमान् ऋषिं नारायणमृते योषिन्मय्येह मायया ३३ बलं मे पश्य मायायाः स्त्रीमय्या जयि
नो दिशां या करोति पदाक्रांतान्भ्रूविजृंभेण केवलं ३४ संगं न कुर्यात्प्रमदासु जातु योगस्य पारं
परमारुरुक्षुः मत्सेवया प्रतिलब्धात्मलाभो वदंति या निरयद्वारमस्य ३५

हिद्भूतां मृगीरूपां सतीं ऋषिरूपी मृगाकारः सन् हतत्रपो निर्लज्जः ३२ तेन ब्रह्मणा सृष्टा मरीच्यादयः तैः सृ
ष्टाः कश्यपादयः तेषु को नु पुमान् खंडितधीः अनाकृष्टमनाः ३३ दिशां जयिनः नृपानपि ३४ प्रतिलब्धः आ
त्मरूपो लाभो येन अस्य मुमुक्षोर्याः प्रमदा निरयद्वारं वदंति योगिनः ३५

भा० टी० १३४

इति तृतीये एकविंशः ॥ ३१ ॥ द्वात्रिंशे सात्त्विको धर्मैर्लब्धगतिरुदीर्य्यते तत्त्वज्ञानविहीनस्य तत्तश्च पुनरागतिः ॥ तदेवं पापकर्मणां गतिमुक्त्वा इदानीं काम्यकर्मणां गतिमाह अथेति चतुर्भिः यो गृहेषु एवावसन् धर्मान् दोग्धि दोहमाह काममर्थं च तान् दुग्धान् धर्मान् भूयः पिपर्त्ति पूरयति अनुतिष्ठति १ सोपि भगव

इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे एकत्रिंशत्तितमोध्यायः ॥ ३१ ॥ श्रीभगवानुवाच ॥ अथ यो
गृहमेधीयान् धर्मानेव वसन् गृहे काममर्थं च धर्मान् दोग्धि भूयः पिपर्त्ति तान् १ स चापि भग
वद्धर्मात्काममूढः पराङ्मुखः यजते क्रतुभिर्देवान् पितॄंश्च श्रद्धयान्वितः २ तच्छ्रद्धयाक्रांतम
तिः पितृदेवव्रतः पुमान् गत्वा चांद्रमसं लोकं सोमपाः पुनरेष्यति ३ यदा चाहीन्द्रशय्यायां शेतेऽनंता
शनो हरिः तदा लोका लयं यांति त एते गृहमेधिनां ४ ये स्वधर्मान्न दुह्यंति धीराः कामार्थहेतवे निः
संगान्यस्तकर्माणः प्रशांताः शुद्धचेतसः ॥

हराधनरूपाद्धर्माच्च पराङ्मुखः सन् प्राकृतानपि देवान् पि
तॄंश्च यजते २ ततः किं तत्राह तेषां श्रद्धयाक्रांता व्याप्ता मतिर्यस्य सः पितृदेवार्थं च व्रतं नियमो यस्य
सोमपाः तत्र सोमं पीत्वेत्यर्थः ३ लोकेति एतेऽपि पुण्यक्षयात्पातमुक्त्वा लोकानामपि लयमाह यदा अह
रहः प्रलये ४ भवाब्धेर्धर्मनिष्ठानां तत्प्राप्तिमेव गतिमाह त्रिभिः ये तु कार्यप्रयोजनाय स्वधर्मं न दुह्यंति

१३४

एवंतद्देवदृष्टांतेन स्पष्टयति द्रव्योपलब्धिस्थानस्य नेत्रगोलकादेर्द्रव्येत्तायांरूपादिदर्शनेकाचकामलादिदोषेणप्र
दायोग्यताभवति तदैवचक्षुषः इंद्रियस्याप्ययोग्यता अनयोःस्थानचक्षुषोर्यदात्रयोग्यता तदैवद्रष्टुर्जीवस्य द्रष्ट
योग्यता एवंस्थूलदेहवैकल्पलिंगस्यकैवल्यंतदेवजीवस्यमरणंनस्वतइत्यर्थः कश्चिदेकश्लोकोऽधिकःपठ्यते तत्रा
यमर्थः द्रव्योपलब्धिस्थानस्यस्थूलशरीरस्यद्रव्येत्तायांयदात्रयोग्यता तत्रपंचत्वंमरणं अहंमानात् इदमेवा

द्रव्योपलब्धिस्थानस्यद्रव्येत्तायोग्यतांयदा तत्पंचत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनं यथाक्षोर्द्रव्यावय
वदर्शनायोग्यतायदा तदैवचक्षुषोद्रष्टुर्द्रष्टृत्वायोग्यतानयोः ६० तस्मान्नकार्यःसंत्रासोनकार्प्प
ण्यंनसंभ्रमः बुद्ध्वाजीवगतिंधीरोमुक्तसंगश्चरेदिह ६१ सम्यग्दर्शनयाबुद्ध्यायोगवैराग्ययुक्तया मा
याविरचितेलोकेचरेन्न्यस्यकलेवरं ६२ इदमेवाहमित्यभिमानेनद्रव्यस्यस्थूलशरीरस्यदर्शनमुत्प
त्तिः अक्ष्णोर्गोलकयोर्द्रव्यवयवस्यरूपादेर्दर्शनेऽयोग्यताशेषंसमानं ६० यस्मान्नवस्तुतोजीवस्यजन्ममर
णादि तस्मान्मरणत्संत्रासोनकार्यः जीवनेनचकार्पण्यंदैन्यंकार्यंसंभ्रमश्चजीवनप्रयत्ने ६१ ननुसर्वविषया
मुक्तसंगत्वेकथंजीवनमतआह सम्यक्पश्यतिविचारयतीतिसम्यग्दर्शिनी तयाबुद्ध्यामायाविरचितेलोकेकले
वरंन्यस्यनिक्षिप्यतस्मिन्नासक्तिंत्यक्त्वाचरेदित्यर्थः ६२

भा० त्रि० १३५

भगवदुपासकास्तु साक्षादेव तं प्राप्नुवंतीति न तु क्रमेण अतस्त्वं साक्षात्तमेव भजेत्याह ॥ एवं तावदुक्ता
नां निरंतरमेतत्प्राप्तिः भगवद्भेदेन हिरण्यगर्भोपासकानां तु क्रमेणेत्युक्तं भेदेनोपासने तु ब्रह्मादयोप्याव
र्तंते किमतोन्ये इत्याह आद्य इति चतुर्भिः यो वेदगर्भः सोपि गुणव्यतिकरे जाते यथापूर्वं ब्रह्मपदाधिक्
तः सन् प्रजायते न केवलं स एवैकः किंतु ऋषिभिर्मरीच्यादिभिश्च सह जन्मनि हेतुद्वयं भेददृष्ट्या
अथ तं सर्वभूतानां हृत्पद्मेषु कृतालयं श्रुत्वाभावं च शरणं व्रजभावेन भामिनि ॥ आद्यः स्थिरचरा
णां यो वेदगर्भः सहर्षिभिः योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः भेददृष्ट्याभिमानेन निः
संगेनापि कर्मणा कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभं स संसृत्य पुनः काले कालेनेश्वरमूर्तिना
जाते गुणव्यतिकरे यथापूर्वं प्रजायते ऐश्वर्यं पारमेष्ठ्यं च तेपि कर्मविनिर्मितं निषेव्य पुनरायां
ति गुणव्यतिकरे सति १०

भिमानेन कर्तृत्वादिति च यथापूर्वत्वे हेतुः निःसंगेनापि निष्कामेणापि कर्मणेति किं तथा प्रजायते प्रथमं पारमे
ष्ठ्यमैश्वर्यं निषेव्य पश्चात्प्रलये सगुणं गुणाधिष्ठातारं प्रथमावतार रूपं पुरुषं संसृत्य प्राप्य तेपि ऋषिप्रमुखाः
स्वकर्मनिर्मितैश्वर्यं निषेव्य पुरुषं च संसृत्य यथापूर्वं स्वाधिकारेण पुनरायांतीत्यन्वयः १० ॥ ६६ ॥ १३५

विश्वमुखं परं पूर्णं पुरुषं यान्ति. तथा च श्रुतिः सूर्यद्वारेण ते विरजाः प्रयांति यत्रामृतः स पुरुषो ह्यव्ययात्मेति
प्रकृतिं उपादानं कारणं उत्पत्त्यंतभावनं निमित्तकारणं ४ परमेश्वरं दृष्ट्वा हिरण्यगर्भोपासकानामपि क्रमेण त
त्प्राप्तिमाह द्विपरार्धावसान इति त्रिभिः परस्य हिरण्यगर्भस्य परिचिंतकाः परमेश्वरं दृष्ट्वा हिरण्यगर्भोपास

निवृत्तधर्मनिरता निर्ममा निरहंकृताः स्वधर्माख्येन सत्वेन परिशुद्धेन चेतसः सूर्यद्वारेण ते
यांति पुरुषं विश्वतोमुखं परावरेशं प्रकृतिमस्योत्पत्त्यंतभावनं ५ द्विपरार्धावसाने यः प्रलयो
ब्रह्मणस्तु ते तावदध्यासते लोकं परस्य परिचिंतकाः ६ क्ष्मांभोनलानिल वियन्मन इंद्रिया
र्थभूतादिभिः परिवृतं प्रतिसंजिहीर्षुः अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं पराख्यमनुभू
य परः स्वयंभूः ७ एवं परेत्य भगवंतमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः तेनैव साकममृतं
पुरुषं पुराणं ब्रह्म प्रधानमुपयांत्यगताभिमानाः ८

काः ६ क्ष्मादीनि पंचभूतानि मनश्च इंद्रियाणि च अर्थाश्च शब्दादयः भूतादिश्च अहंकारः एवमादिभिः परिवृतं युक्तं ब्रह्मांडं
प्रतिसंहर्तुमिच्छुः सन् अव्याकृतमीश्वरं पराख्यं द्विपरार्धलक्षणं कालं ७ परेत्य दूरं गत्वा भगवंतं हिरण्यगर्भमनुप्र
विष्टा ये योगिनः अमृतं परमानंदरूपं प्रधानं उत्कृष्टं ब्रह्म तेनैव सहोपयांति न तु पूर्वं यतस्तदा अगताभिमानाः तथा
च श्रुतिः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदमितीति ८

कथंप्रजायन्तेतदाह ततस्तेपुनरिमंलोकंप्रपतंति विभ्रंशित उदयभोगाद्यसाधनंयेषां १२ परमेष्ठिनंपर
मेष्ठत्वंप्रीत्यात्तस्यगुणानाश्रयतेयाभक्तिस्तया १३ भजनेवज्ञानवैराग्येस्वतएवभवतइत्याह वासुदेवइति
१४ तदेवोपपादयति यदास्यभक्तिरास्यचित्तंभगवद्गुणानुरागेणतस्मिन्नेवनिश्चलंतसेदिंद्रियवृत्तिभि

ततस्तेक्षीणसुकृताः पुनर्लोकमिमंसति पतंतिविवशादेवैः सद्योविभ्रंशितोदयाः १२ त
स्मात्वंसर्वभावेनभजस्वपरमेष्ठिनं तद्गुणाश्रययाभक्त्याभजनीयपदांबुजं १३ वासुदेवेभ
गवतिभक्तियोगःप्रयोजितः जनयत्याशुवैराग्यंज्ञानंयद्ब्रह्मदर्शनं १४ यदास्यचित्तमर्थेषु
समेष्विंद्रियवृत्तिभिः नविगृह्णातिवैषम्यंप्रियमप्रियमप्युत सतदैवात्मनात्मानंनिः
संगंसमदर्शनं हेयोपादेयरहितमारूढंपदमीक्षते १५ ज्ञानमात्रंपरंब्रह्मपरमात्मेश्वरः
पुमान् दृश्यादिभिःपृथग्भावैर्भगवानेकईयते १६

वैषम्यमर्थेषुनगृह्णाति तदैवात्मनात्मानंस्वप्रकाशमीक्षते कथंभूतं समंचदर्शनंच तत्रकुतः निःसंगांसंगादिवै
षम्यंभवति निःसंगत्वेहेतुः हेयोपादेयरहितं तत्कुतः पदंव्यवस्थितमारूढंपरमानंदोहमितिनिश्चयंप्राप्तमि
त्यर्थः १५ सत्येष्वर्थेष्वितिउक्तं तदेवसामान्यंदर्शयति ज्ञानमात्रमेवपरब्रह्मादिशब्दैःप्रसिद्धंदृश्यादिभिर्दृश्यद्रष्

पदाश्रमेयोसक्तानामपिभेददर्शनाभिमानाभ्यामेवमावृत्तिः तदाकाम्यकर्मणां किंवक्तव्यमिति तान्विनिंद
न्नाह षड्भिः योऽन्वहंकर्मस्वासक्तमनसः संतः अप्रतिषिद्धानिकाम्यानिनित्यानिचकर्माणिकुर्वन् स्नानानिकुर्वं
ति तेऽप्यरुणोदक्षिणेनयथाधूममार्गेणपितृलोकंव्रजंतीतिपंचमेनान्वयः मध्येतन्निंदा १ २ हरतिसंसा
रंमेधायस्यकथनीयाउरवोविक्रमायस्य तस्यमधुद्विषःकथायांविमुखाःसंतोयेत्रैवर्गिकाः ३ येचाच्युतस्य

ता ये [illegible]त्वि सक्तम[illegible]नसः कर्मस्वश्रद्धयान्विताः कुर्वंत्यप्रतिसिद्धानिनित्यान्यपिचकृत्स्नसः १ रजसाकुं
ठमनसः कामात्मानोजितेंद्रियाः पितॄन्यजंत्यनुदिनंगृहेष्वभिरताशयाः २ त्रैवर्गिकास्तेपुरुषा
विमुखाहरिमेधसः कथायांकथनीयोरुविक्रमस्यमधुद्विषः ३ नूनंदैवेननिहितायेचाच्यु
तकथासुधां हित्वाशृण्वंत्यसद्गाथाःपुरीषमिवविड्भुजः ४ दक्षिणेनपथार्यम्णःपितृलोकंव्र
जंतिते प्रजानामनुजायंतेश्मशानांताःक्रियाःकृताः ११

कथासुधांहित्वा असतांगाथाःशृण्वंति तेनूनंदैवेननिहता इत्यन्वयः ४ पितृलोकात्पुनःप्रजामनुस्वपु
त्रादिषुप्रजापतेर्गर्भाधानारभ्यश्मशानांताःक्रियाःकृतवंतः यथोक्तकारिण इत्यर्थः ११ रामराम ॥

भा० टी० अनेन च ज्ञानयोगेन भगवानेव प्राप्यो यथा भक्तियोगेनेत्याह नैर्गुण्यो ज्ञानयोगश्च मन्निष्ठो भक्तिलक्षणश्च योगः
१३७ तयोर्द्वयोरप्येक एवार्थः प्रयोजनं को सौ भगवच्छब्दो लक्षणं ज्ञापको यस्य तदुक्तं गीतासु ते प्राप्नुवंति मामेव स
र्वभूतहिते रता इति २२ ननु ज्ञानयोगस्यात्मलाभः फलं शास्त्रेणावगम्यते भक्तियोगस्य तु भजनीयेश्वरप्राप्तिः कुत
स्तयोरेकार्थत्वमित्याशंक्य दृष्टांतेनोपपादयति यथा वह्नूनां रूपरसादीनां गुणानामाश्रयः क्षीरादिः एक एवार्थो मार्ग

ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः २२ यथेंद्रियैः
पृथग्द्वारैरर्थो बहुगुणाश्रयः एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः २३ क्रियया क्रतुभि
२ मर्शनैः र्दानैस्तपःस्वाध्यायसंयमैः आत्मेंद्रियजयेनापि संन्यासेन च कर्मणां योगेन विविधांगेन
भक्तियोगेन चैव हि धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् आत्मतत्त्वावबोधेन वैराग्येण
दृढेन च ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् २४

भेदवत्तैरिंद्रियैर्नाना प्रतीयते चक्षुषा शुक्ल इति रसनेन मधुर इति स्पर्शनेन शीत इत्यादि तथा भगवानेव नानारू
पेणावगम्यते २३ शास्त्रमार्गानेव प्रपंचयति क्रिययेति त्रिभिः क्रियया पूर्तरूपया क्रतुभिर्यागैः मर्शन
मीमांसा आत्मेंद्रियजयो निषिद्धवर्जनं उभयचिह्नेन सकामनिष्कामलक्षणेन तमेवाह य इति सकाम

धर्मप्राप्यं स्वर्गाद्यपि भगवत एव सगुणस्य रूपमेति भावः
एभिर्वर्त्मभिः स्वदृक् स्वप्रकाशः २४

१३७

नन्नुज्ञानमात्रमात्मनः स्वरूपत्वान्नित्यप्राप्तमेवेति किमनेकसाध्येनयोगेनप्राप्यतेतत्राह एतावानिति
युज्यते प्राप्यते प्रपंचसंगव्युदासएवयोगफलमित्यर्थः १७ ननुकथंप्रत्यक्षादिप्रतीतः प्रपंचोव्युदसितुंशक्यते प्रती
तेर्भ्रांतित्वादित्याह ज्ञानमिति पराचीनैः पराङ्मुखैः शब्दादिधर्मोयस्यतेनार्थरूपेणज्ञानरूपंनिर्गुणंब्रह्मैवावभाति
नत्वर्थःपृथगस्तीत्यर्थः १८ अर्थरूपत्वमेवोत्पाद्यदर्शयति यथेति अहंरूपः अहंकारः सचत्रिवृत्त्रिगुणात्म

एतावानेवयोगेनसमग्रेणेहयोगिनः युज्यतेभिमतोह्यर्थोयदसंगस्तुकृत्स्नशः १७ ज्ञान
मेकंपराचीनैरिंद्रियैर्ब्रह्मनिर्गुणं अवभात्यर्थरूपेणभ्रांत्याशब्दादिधर्मिणा १८ यथामह
नहंरूपस्त्रिवृत्पंचविधःस्वराट एकादशविधस्तस्यवपुरंडंजगद्यतः १९ एतद्वैश्रद्धयाभक्त्या
योगाभ्यासेननित्यशः समाहितात्मानिःसंगोविरक्त्यापरिपश्यति २० इत्येतत्कथितंगुर्विज्ञानंतद्ब्र
ह्मदर्शनं येनानुबुध्यतेतत्त्वंप्रकृतेःपुरुषस्यच २१

पुनश्चभूतरूपेणपंचविधः इंद्रियरूपेणैकादशवि
धश्च स्वराट जीवरूपः तस्यपुरं अंडंजगच्च यतोयेभ्योमहदादिभ्यः तथावभाति १९ ननुजनः किमित्येवंनप्रत्ये
तितत्राह एतद्वा इति २० उक्तमेवार्थंसुखप्रतिपत्यर्थंसंक्षेपेणानुवदति हेगुर्विपूज्ये २१ ॥ ऽऽ ॥ ऽऽ॥

अथेतिवाक्यारंभे अजोपितववपुःकेवलंदध्यौनतुदृष्टवान् सचस्वयंसाक्षाद्यस्यजठराब्जाज्जातः सभवानेव
विश्वस्यसर्गादिविधत्ते नतुतवस्वर्गादिकर्त्ताकश्चिदस्ति सएवंभूतस्त्वंमेमयाकथंजठरेणधृतइतित्रयाणाम
न्वयः कथंभूतंवपुःसत्यव्यक्तं तत्रहेतुः अतःशलिलेशयानं कीदृशं भूतानिइंद्रियाणिच अर्थाश्चशब्दादयः
आत्मामनः एतन्मयं एतैर्व्याप्तमित्यर्थः कुतःगुणानांप्रवाहोयस्मिंस्तत् तत्कुतः अशेषस्यकार्य्यकारणस्यबीजंका

देवकृतिरुवाच॥ अप्यज्ञोऽतःसलिलेशयानंभूतेंद्रियार्थात्ममयंवपुस्ते॥ गुणप्रवाहंसदशेष
बीजंदध्यौस्वयंतज्जठराब्जजातः सएवविश्वस्यभवान्विधत्ते गुणप्रवाहेणविभक्तवीर्यः सर्गा
द्यनीहोवितथाभिसंधिरात्मेश्वरोतर्क्यसहस्रशक्तिः सत्वंभृतोमेजठरेणनाथकथंनुयस्यो
दरएतदासीत् विश्वंयुगांतेवटपत्रएकःशेतेस्ममायाशिशुरंघ्रिपानः २

रणा कथंभूतोभवान् सर्गादिविधत्ते गुणप्रवाहरूपेणविभक्तंवीर्य्यंशक्तिर्येनसः शक्तिद्वारेणविधत्ते नसाक्षादि
त्यर्थः यतःअनीहोनिष्क्रियः तर्हिकथंशक्तिद्वारेणापिसर्गादिविधानंतत्राह अवितथाभिसंधिः सत्यसंकल्पः
किमर्थंविधत्ते आत्मनांजीवानांभोगार्थमित्यर्थः ननुकथंविचित्रान्भोगानेकएवविदध्यात् तत्राह अतर्क्याः सहस्रंम
परिमिताःशक्तयोयस्य किंचप्रलयेयस्योदरएतद्विश्वमासीत् सत्वंमयाजठरेणकथंभृतोधृतः ननुशिशोर्मयिकिमेत
दुच्यते तत्राहवटपत्रइति अंघ्रिपादांगुष्ठंपिबतीत्यंघ्रिपानः इदमपिशिशुत्वंतवदेवमायादितिभावः २

न्र॰ विनीताय कर्हिचित् ॥ न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च ॥ न लोलुपायोपदिशेन्न गृ २

तदेवं ज्ञानयोगमुपसंहृत्य तस्य च भक्तियोगाद्युपसंहरति प्रावोचमिति द्वाभ्यां ॥ चतुर्विधं त्रिगुणनिर्गुणभेदेन ॥ अंत
र्धावति उत्पत्तिनिधनानि करोति ॥ एवं गृहे मातः ॥ ३९ ॥ उपदेशे नधिकारिणमाह नैतदिति द्वाभ्यां ॥ खलाय परोद्वेजका
य भिन्नाय दुराचाराय ॥ धर्मध्वजाय दांभिकाय ॥ ४० ॥ अधिकारिणमाह श्रद्दधानायेति द्वाभ्यां ॥ ४१ ॥ ४२ ॥ तच्छ्रवणकीर्तनफल

प्रावोचं भक्तियोगस्य स्वरूपं ते चतुर्विधं ॥ कालस्य चाव्यक्तगतेर्यो ऽन्तर्धावति जंतुषु ॥ जीवस्य संसृती
र्बह्वीरविद्याकर्मनिर्मिताः ॥ यास्वंग प्रविशन्नात्मा न वेद गतिमात्मनः ॥ ३८ ॥ नैतत्खलायोपदिशेन्ना
हारूढचेतसे ॥ नाभक्ताय च मे जातु न मद्भक्तद्विषामपि ॥ ४० ॥ श्रद्दधानाय भक्ताय विनीतायानसूयवे
भूतेषु कृतमैत्राय शुश्रूषाभिरताय च ॥ बहिर्जातविरागाय शांतचित्ताय दीयतां ॥ निर्मत्सराय शुचये
यस्याहं प्रेयसां प्रियः ॥ ४२ ॥ य इदं शृणुयादंब श्रद्धया पुरुषः सकृत् ॥ यो वाभिधत्ते मच्चित्तः स ह्येति पद
वीं च मे ॥ ४३ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे द्वात्रिंशोऽध्यायः ॥ ३२ ॥ श्रीमैत्रेय उवाच ॥ एवं नि
शम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः ॥ विस्रस्तमोहपटला तमभिप्रणम्य
तुष्टाव तत्त्वविषयांकितसिद्धभूमिं ॥ १ ॥

स्यापि मत्पदप्राप्तिरेव फलमित्याह य इति ॥ अप्यर्थे चकारः ॥ सोऽपि मत्पदवीमेतीति हि निश्चितं ॥ ३२ ॥ इति तृतीये द्वात्रिंशः ॥
त्रयस्त्रिंशे तु तस्यैव कपिलस्योपदेशतः ॥ ज्ञानलाभेन तन्मातुर्जीवन्मुक्तिरुदीर्यते ॥ विस्रस्तं मोहरूपं पटलं आवर
णं यस्याः सा ॥ तत्त्वान्येव विषयः ॥ तेनांकिता सिद्धिः सांख्यज्ञानं तस्य भूमिं हेतुं प्रवर्त्तकं ॥ १ ॥

या ३

भा० टी० प्रत्यक्स्रोतसि प्रत्याहृते आत्मनि मनसि संविभाव्य संचिंत्य वेदगर्भे यस्य सः ६ अविक्लवया गंभीरया ७ तेन तव सुसे
१३९ व्येन सुखं सेव्येन मे मया उदितेन आस्थितेन अनुष्ठितेन पराकाष्ठां जीवन्मुक्तिं अवरोत्स्यसि प्राप्स्यसि ८ मायायाया
अंतर्हितः मन्मतम विद्वांसः ९ अनुमतः अनुज्ञातः १० सरस्वत्या आपीडे पुष्पस्तबकुरस्तस्य सरस्वत्येति पाठे

तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्य स्वतेजसा ध्वस्तगुणप्रवाहं वंदे विष्णुं क
पिलं वेदगर्भं ॥६॥ श्रीमैत्रेय उवाच ॥ ईडितो भगवानेवं कपिलाख्यः परः पुमान् वाचाविक्लवयेत्याह मा ये २
तरं मातृवत्सलः ७॥ श्रीभगवानुवाच ॥ मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे आस्थितेन परां का
ष्ठामचिरादवरोत्स्यसि ॥८॥ श्रद्धत्स्वैतन्मतं मह्यं जुष्टं यद्ब्रह्मवादिभिः येन मामभयं याया मृत्युमि
च्छत्यतद्विदः ॥९॥ श्रीमैत्रेय उवाच इति प्रदर्श्य भगवान् सतीं तामात्मनो गतिं स्वमात्रा ब्रह्मवादिन्या क
पिलोनुमतो ययौ ॥१०॥ सा चापि तनयोक्तेन योगादेशेन योगयुक् तस्मिन्नाश्रम आपीडे सरस्वत्याः समा
हिता। अभीक्ष्णावगाहकपिशान्जटिलान्कुटिलालकान् आत्मानं चोग्रतपसा बिभ्रती चीरिणं कृशं ११ ७ ९

स्तकुरेनेव संवेष्टिते विंदुसरसि समाहिता बभूव कथंभूता सती समाहिता तदाह अभीक्ष्णं त्रिषवणं अवगाहं टी
स्नानं तेन कपिशान् पिशंगान् स्वत एव कुटिलान् अलकान् केशान् तथा आत्मानं च देहं चीरधारिणं कृशं च बिभ्रती सा

१३९

अथवानत्वंमयाऽपत्यांतरवज्जठरेधृतः किंतुवाराहाद्यवतारवदिच्छयैवाविर्भूतोसीत्याह त्वंदेहतंत्रः देहपरि
ग्रहः स्वीकृतमूर्त्तिरसि पाप्मनांदुष्टानांनिदेशभाजांआज्ञानुवर्त्तिनांविभूतयेसमृद्धये आत्मपथोपलब्धये ज्ञानमा
र्गप्रदर्शनाय ३ अतस्त्वद्दर्शनाद्दर्शनादहंकृतार्थास्मीतिकैमुत्यन्यायेनाह यन्नामधेयस्यश्रवणमनुकीर्त्तनंचतत
स्मात् क्वचित्कदाचिदपिश्वानमत्तीतिश्वादः श्वपचः सोपिसवनायसोमयागायकल्पतेयोग्योभवति अनेनपूज्य

त्वंदेहतंत्रः प्रशमायपाप्मनांनिदेशभाजांचविभोविभूतये यथावतारास्तवसूकरादयस्तथायम
प्यात्मपथोपलब्धये ३ यन्नामधेयश्रवणानुकीर्त्तनाद्यत्प्रह्वणाद्यत्स्मरणादकीर्त्तनात् श्वादो
पिसद्यः सवनायकल्पतेकुतः पुनस्तेभगवन्नुदर्शनात् ४ अहोवतश्वपचोऽतोगरीयान्यज्जिह्वाग्रेव
र्त्ततेनामतुभ्यं तेपुस्तपस्तेजुहुवुःसस्नुरार्याब्रह्मानूचुर्नामगृणंतियेते ५

त्वल्लक्ष्यते ४ तदुपपादयति अहोवतेत्याश्चर्ये यस्यजिह्वाग्रेतवनामवर्त्ततेसश्वपचोपि अतः अस्मादेवहेतोर्गरी
यान् यद्यस्माद्वर्त्ततेनामअतइतिवा कुतइत्यतआह तएवतपस्तेपुः कृतवंतः जुहुवुः होमंकृतवंतः सस्नुः ती
र्थेषुस्नाता आर्याः तएवसदाचाराः ब्रह्मवेदं अनूचुः अधीतवंतः त्वन्नामकीर्त्तने तपआद्यंतर्भूतमतस्तेपुण्यत
माइत्यर्थः यद्वा जन्मांतरेतैस्तपोहोमादिसर्वंकृतमितित्वन्नामकीर्त्तनेनमहाभाग्यादयादवगम्यतइत्यर्थः ५

भा॰ स्कं॰
१४०

विरहकृतध्यानफलमाह निस्पृहानिर्वासना वत्सविदुर ततः स्वसुतः कपिलोयदाह तद्भगवतोरूपं ध्यायं
तीतदात्मानं विश्वतोमुखं सर्वगं ध्यायंती ब्रह्मण्यवस्थितमतिर्बभूवेतिपूर्वस्यैवानुषंगः केन ध्यायंतीवि
शुद्धेनात्मना मनसा विशुद्धौ कारणान्याह भक्तिप्रवाहरूपेण योगेन वैराग्येण च युक्तानुष्ठानेनजातं यज्ज्ञा
नं तेन च युक्तानुष्ठानं गीतासूक्तं युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगो भवति दुः

तमेव ध्यायती देवमपत्यं कपिलं हरिं वभ्रूवाचिरतो वत्स निस्पृहा तादृशे गृहे ध्यायंती भगव
द्रूपं यदाह ध्यानगोचरं सुतं प्रसन्नवदनं समस्तव्यस्तचिंतया भक्तिप्रवाहयोगेन वैराग्येण बलीय
सा युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना विशुद्धेन तदात्मानं मात्मना विश्वतोमुखं स्वानुभूत्या
तिरोभूतमायागुणविशेषणं ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये १४ निवृत्तजीवापत्तित्वा
त्क्षीणक्लेशाप्तनिर्वृतिः नित्यारूढसमाधित्वात्परावृत्तगुणभ्रमा नसस्मार तदात्मानं स्वप्ने दृष्टमि
वोत्थितः १५

खेति ब्रह्महेतुना ब्रह्मत्वापादकेन विश्वतोमुखदेहेतुः स्वानुभूत्या स्वरूपप्रकाशेन तिरो
भूतं मायागुणानां विशेषणानां परिच्छेदो यस्य कथंभूते ब्रह्मणि आत्मनां संश्रये भगवति १४ तस्या जीवन्मुक्तिमाह सार्द्धेन द्वि
भिः तदा च निवृत्ता जीवापत्तिर्जीवभावो यस्याः तस्य भावस्तत्त्वं तस्मात् विगतक्लेशा प्राप्तनिर्वृतिश्च सती आत्मानं देहं न सस्मारेत्युत्तरे
णान्वयः ननु तथापि गुणानां विद्यमानत्वात्कथमस्मरणं तत्राह नित्यमरूढो लब्धप्रतिष्ठः समाधिर्यस्याः तस्या भावस्तत्त्वं त

१४०

प्रजापतेः कर्द्दमस्य तपोयोगाभ्यां विजृंभितमतिशयितं स्वगार्हस्थ्यं हित्वा पुत्रभूतेश्वरविरहातुरा सती वदनं
किंचिदनिर्वाच्यं शोकव्याकुलं चकारेति षट्केनान्वयः १२ तत्र गार्हस्थ्ये क्षीरफेननिभाः [illegible]म्रदुसुभ्राः शय्याः
आस्तरणानि आभांति दंतघटिता मंचकाश्च स्वर्णमयाः परिकराः आसनानि पीठादीनि सुस्पर्शान्यास्तरणानि येषु

प्रजापतेः कर्द्दमस्य तपोयोगविजृंभितं स्वगार्हस्थ्यमनौपम्यं प्रार्थ्यं वैमानिकैरपि १२ पयःफे
ननिभाः शय्या दांता रुक्मपरिछदाः आसनानि च हैमानि सुस्पर्शास्तरणानि च स्वच्छस्फटिक
कुड्येषु महामारकतेषु च १ रत्नप्रदीपा आभांति ललना रत्नसंयुताः गृहोद्यानं कुसुमितै रम्यं बह्व
मरद्रुमैः कूजद्विहंगमिथुनं गायन्मत्तमधुव्रतं २ यत्र प्रविष्टमात्मानं विबुधानुचरा जगुः वाप्या
मुत्पलगंधिन्यां कर्द्दमेनोपलालितं ३ हित्वा तदीप्सिततममप्याखंडलयोषितां किंचिच्चकारव
दनं पुत्रविश्लेषणातुरा ४ वनं प्रव्रजिते पत्यावपत्यविरहातुरा ज्ञाततत्वाप्यभून्नष्टे वत्से गौरिव वत्सला
१३

बहुभिरमरद्रुमैः रम्यं २ यत्रोद्याने प्रविष्टमात्मानं देवहूतिं ३ आखंडलं इंद्रस्तस्य या योषितः तासामपीप्सिततमं
आप्तुमिष्टतमं तत् हित्वा तत्राभिमानं त्यक्त्वा ४ स्वहृद्वियोगस्य दुःख[illegible]हता माह वनमिति नष्टे वत्से वत्सला गौ

भागवत ८९

भा० तृ० दत्तमर्हणं र्घ्यं निकेतनं च यस्मै ॥ उपशांत्यर्थं समाहितत्रास्ते ॥ ३५ ॥ प्रकरणार्थमुपसंहरति ॥ एतन्निगदितं तावत्त्वया ॥ ३६

१६१

सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः ॥ स्तूयमानः समुद्रेण दत्तार्हणनिकेतनः ॥ आस्ते योगं स
मास्थाय सांख्याचार्यैरभिष्टुतः ॥ त्रयाणामपि लोकानामुपशांत्यै समाहितः ॥ ३५ ॥ एतन्निग
दितं तात यत्पृष्टोहं तवानघ ॥ कपिलस्य च संवादो देवहूत्याश्च पावनः ॥ ३६ ॥ य इदमनुशृणोति
योभिधत्ते कपिलमुनेर्मतमात्मयोगगुह्यं ॥ भगवति कृतधीः सुपर्णकेतावुपलभते भ
गवत्पदारविंदं ॥ ३७ ॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां तृ
तीयस्कंधे विदुरमैत्रेयसंवादे कापिलेयोपाख्याने त्रयस्त्रिंशोध्यायः ॥ ३३ ॥ श्री हरये नमः ॥ ॥

एतच्छ्रवणकीर्तनफलमाह य इति सुपर्णकेतौ गरुडध्वजे उपलभ्यते प्राप्नोति ॥ ३७ ॥ इति श्रीभागवतभा
वार्थदीपिकायां श्रीधरस्वामिविरचितायां तृतीयस्कंधे संबंधिन्यां त्रयस्त्रिंशत्तमोध्यायः ॥ ३३ ॥

परतः पराभिरेव ॥ कर्मस्तष्टविद्याधरीभिः पोषः पोषणं यस्य ॥ आधिर्मनोग्लानिः ॥ तदसंभवात् कृशः ॥ मलैरवच्छन्नोऽ
पि बभौ ॥ १६ ॥ दैवगुप्तं आरब्धकर्मपालितं ॥ १७ ॥ निर्वाणं नित्यमुक्तं ॥ १८ ॥ हे वीर विदुर ॥ १९ ॥ हे सौम्य ॥ तस्यास्तत्र मर्त्यशरीरं सरि

तद्देहः परतः पोषोऽप्यकृशश्चाध्यसंभवात् ॥ बभौ मलैरवच्छन्नः सधूम इव पावकः ॥ १६ ॥ स्वांगं तपो
योगमयं मुक्तकेशं गतांबरं ॥ दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः ॥ १७ ॥ एवं सा कपिलोक्तेन मार्गे
णाचिरतः परं ॥ आत्मानं ब्रह्मनिर्वाणं भगवंतमवाप ह ॥ १८ ॥ तद्वीरासीत्पुण्यतमं क्षेत्रं त्रैलोक्यवि
श्रुतं ॥ नाम्ना सिद्धपदं यत्र सा संसिद्धिमुपेयुषी ॥ १९ ॥ तस्यास्तद्योगविधूतमार्त्यं मर्त्यमभूत्सरि
त् ॥ स्रोतसां प्रवरा सौम्य सिद्धिदा सिद्धसेविता ॥ २० ॥ कपिलोऽपि महायोगी भगवान्पितुराश्र
मात् ॥ मातरं समनुज्ञाप्य प्रागुदीचीं दिशं ययौ ॥ २१ ॥

सैव सरिद्भूता ॥ कथंभूतं ॥ योगेनावधूता विलीना मार्त्या दैहिका धातुमला यस्य ॥ २० ॥ कपिलो ययावित्युक्तं ॥ तदे
व प्रपंचयति ॥ कपिलोऽपीति त्रिभिः ॥ समनुज्ञाप्य अनुज्ञां संप्रार्थ्य ॥ २१ ॥ राम राम राम राम राम राम राम राम

इति

तृतीय स्कंधः

Shrimad Bhagavatham
Tritiya Skandha. III